१　३४र　५र　२　२　१र　३२　२　५
आऽ२३४ । मृतोमर्तिये । षूऽ३वा ॥ होतामन्द्रौ । वाऽ३४३ओऽ३४वा ॥
४　४
तमोऽ५विशाइ । हो५ऽ६इ ॥डा॥　　दी. २४. उत्. ५. मा. १७. ने. ॥४२७॥

४. सᳲहितम् । संहितः । गायत्री । अग्निः ॥

१र२　—१　२—　१　२
अदाभ्य४पुरः । आऽ२इता ॥ विशाऽ२म् । आऽ२३ग्नीः ।
१र—१　२　—१　अ　२
मानूऽ२षाइणाम् ॥ तूऽ२३र्णाः । राऽ२थाः । सदाऽ२३ । हाउवाऽ३ ॥
५　२१२र　—१　२र—
नाऽ२३४वाः ॥ श्रीः ॥ अभिप्रयाᳲसि । वाऽ२हसा ॥ दाश्वᳲऽ२ ।
१　२　१—१　२　—१　अ
श्राऽ२३श्नो । तिमाऽ२र्तीयाः ॥ क्षाऽ२३याम् ॥ पाऽ२वा । कशोऽ२३ ।
२　५　२र१र　२र　—१
हाउवाऽ३ ॥ चीऽ२३४षाः ॥ श्रीः ॥ साह्वान्विश्वाअ । भाऽ२इयुजाः ॥
२—　१　२　१र—१　२　—१
क्रतूऽ२ः । दाऽ२३इवा । नामाऽ२मार्क्ताः ॥ आऽ२३ग्नीः ॥ तूऽ२वाइ ।

४३

२८४. सोभरिः काण्वः । ककुप्सतोवृहत्यौ । अग्निः ॥

६०९. भद्रो नो अग्निराहुतो भद्रा रातिस्सुभग भद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ॥१॥

६१०. भद्रं मनꣳकृणुष्व वृत्रतूर्ये येना समत्सु सासहिः ।
अव स्थिरा तनुहि भूरि शर्द्धतां वनेमा ते अभिष्टये ॥२॥

धा. ४. उ. न. स्व. ३. लि. ॥१०॥

२८५. गोतमो राहूगणः । उष्णिक् । अग्निः ॥

६११. अग्ने वाजस्य गोमत ईशानस्सहसो यहो ।
अस्मे देहि जातवेदो महि श्रवः ॥

---

२८४. भद्रः । नः । अग्निः । आहुतः । आ । हुतः । भद्रा । रातिः । सुभग । सु । भग । भद्रः । अध्वरः । भद्राः । उत । प्रशस्तयः । प्र । शस्तयः ॥ भद्रम् । मनः । कृणुष्व । वृत्रतूर्ये । वृत्र । तूर्ये । येन । समत्सु । स । मत्सु । सासहिः । अव । स्थिरा । तनुहि । भूरि । शर्द्धताम् । वनेम । ते । अभिष्टये ॥

२८५. अग्ने । वाजस्य । गोमतः । ईशानः । सहसः । यहो । अस्मे इति । देहि । जातवेदः । जात । वेदः । महि । श्रवः ॥ सः । ईधानः । वसुः । कविः ।

---

श्रवाऽ२३ । हाउवाऽ३ ॥ ताऽ२३४माः ॥

दी. ८. उत्. ५. मा. २४. णी ॥४१८॥

५. सफम् ॥ देवाः । ककुप् । अग्निः ॥

भद्रोनोऽ३अग्निः । आहूऽ२३४ताः ॥ भद्राराताइस्सूऽ२ । भगभाद्रोऽ३आऽ३ । ध्वाऽ२३४राः ॥ भद्राः ॥ उताप्राऽ३शाऽ३ । स्ताऽ३४५योऽ६"हाइ ॥

दी. ३. उत्. ४. मा. ८. ढै. ॥४१९॥

६. पौष्कलम् ॥ प्रजापतिः । उष्णिक् । अग्निः ॥

अग्नेवाऽ३जस्य । गोमाऽ२३४ताः ॥ ईशानस्सा । हासोया- २३४हो ॥ अस्माइ"देहाइ । जाताऽ२वाऽ२३४५इदाऽ६५६ः ॥ महि-

१ २ ३ १   २र ३ २ ३ २ ३ १ २ ३ २
६१२. स इधानो वसुष्कविरग्निरीडेन्यो गिरा।
३२३ १ २
रेवदस्मभ्यं पुर्वणीक दीदिहि॥१॥

३ १ २ ३२उ ३ १ २ ३ १ २र
६१३. क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः।
१ २ ३ १ २ ३ १ २
स तिग्मजम्भ रक्षसो दह प्रति ॥२॥

धा. १३. उ. १. स्व. २. टा. ॥११॥

तृतीयः खण्डः ॥

२८६. गोपवन आत्रेयः। अनुष्टुब्गायत्र्यौ। अग्निः॥

३ १ २ ३ १ २ ३ १ २ ३ २
६१४. विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम्।
३ २ ३ २३ १ २ ३ २ ३ २ ३ १ २
अग्निं वो दुर्यं वचस्तुषे शूषस्य मन्मभिः ॥१॥

---

३ २ ३ १ २ ४ २ ३२ ३ १ २ ३
अग्निः। ईडेन्यः। गिरा। रेवत्। अस्मभ्यम्। पुर्वणीक। पुरु। अनीक।
२ ३ २ १२र १ २र १ २र ३२ ३१२
दीदिहि॥ क्षपः। राजन्। उत। त्मना। अग्ने। वस्तोः। उत। उषसः। सः।
३ १ २ ३ १२र
तिग्मजम्भ। तिग्म। जम्भ। रक्षसः। दह। प्रति॥

३ १ २ ३ २ ३ १२र ३ १ २ ३
२८६. विशोविशः। विशः। विशः। वः। अतिथिम्। वाजयन्तः। पुरु-
२ ३ २ ३ २ ३ १२र ३ १२र ३
प्रियम्। पुरु। प्रियम्। अग्निम्। वः। दुर्यम्। दुः। यम्। वचः। स्तुषे।

---

१ ३ १ १ १
अवाऽ२३४५ः॥                    दी. ५. उत्. ४. मा. ६. भू. ॥४२०॥

७. अध्यम्॥ प्रजापतिः। उष्णिक्। अग्निः॥

१ २ र — र १ २र१र२ १ २३र२ १ २ १
अग्नेवाजाऽ२स्य। गोमतोवा॥ ईशानस्सा। हसोयहो। अस्मा-
२र १र २र र १ २ १र — १ र
इदेहिजातवेदोम। हा२३इ। अवाउवा॥ अूघियाऽ२॥ श्रीः॥ सइधा-
— १ २ १२र१ २ ३र २ १ २र१२ १ २ र १
नोऽ२व। सुष्कवोवा॥ अग्निरीडाइ। नियोगिरा। रेवदस्मभ्यंपुर्वणीक।
२ १र — १र र — १
दाऽ२३इ। दिहाउवा॥ अूघियाऽ२॥श्रीः॥ क्षपोराजाऽ२नु। तत्मनोवा॥
२ १र२ १ २३र२ १ २ १२र१ २
अग्नेवस्तोः। उतोषसाः। सतिग्मजम्भरक्षसोद। हाऽ२३। प्रताउवा॥
१र — १ २ १
अूघियाऽ२॥ एऽ२३हियाऽ३४३। ओऽ२३४५इ॥डा॥

दी. २३. उत्. ८. मा. ११. ड. ॥४२१॥

६१५. यज्ञनासो हविष्मन्तो मित्रन्न सर्पिरासुतिम् ।
प्रश॒ँसन्ति प्रशस्तिभिः ॥२॥

६१६. पन्याँसञ्जातवेदसं यो देवतात्युद्यता । हव्यान्यैरयद्दिवि ॥३॥

घा. १३. उ. १. स्व. २. टा. ॥११॥

---

शूषस्य । मन्मभिः ॥ यम् । जनासः । हविष्मन्तः । मित्रम् । मि । त्रम् । न । सर्पिरासुतिम् । सर्पिः । आसुतिम् । प्रशँसन्ति । प्र । शँसन्ति । प्रशस्तिभिः । प्र । शस्तिभिः ॥ पन्याँसम् । जातवेदसम् । जात । वेदसम् । यः । देवताति । उद्यता । उत् । यता । हव्यानि । ऐरयत् । दिवि ॥

---

८. श्यावाश्वम् ॥ श्यावाश्वः । अनुष्टुप् । अग्निः ॥

विशोऽ३१ । वाऽ३इशो । वोअ । ताऽ३इथिम् । एहिया ॥ वा । जयन्त४पू । रु । प्रियाऽ२म् । एहियाऽ२ । अग्निवोदूरीऽ३याऽ३म् ॥ वाऽ२३४चाः ॥ ऐहाऽ२इ । एहियाऽ२ । स्तुषेशूषास्याऽ३माऽ३ । न्माऽ३४५मोऽ६"हाइ ॥

दी. ७. उत्. ३. मा. ९. जो. ॥४२२॥

९. आन्धीगवम् ॥ अन्धीगुः । अनुष्टुप् । अग्निः ॥

विशोविशोवोऽ१अताइथाइम् ॥ वाजय । त४पूऽ२३रू । हुम्मा-ऽ२१२ । प्रियमग्निवोदुर्यवचाऽ२३४५ः ॥ स्तूषाऽ३उवा ॥ शूऽ२षा । स्याऽ२३मा । न्मभाइः । औऽ२३होवा ॥श्रीः॥ स्तुषेशूषस्यमाऽ१न्माभाइः ॥ यज्ञना । सौहाऽ२३वा । हुम्माऽ२१२ । ष्मन्तोमित्रन्नसर्पिरासुताऽ२३४५-इम् ॥ प्राशाऽ३उवा ॥ साऽ२न्ताइ । प्राऽ२३शा । स्तिभाइः । औऽ२३-होवा ॥श्रीः॥ प्रशँसन्तिप्रशाऽ१स्ताइभाइः ॥ पन्याँसम् । जाताऽ२३वा । हुम्माऽ२१२ । दसंयोदेवतात्युद्यताऽ२३४५ ॥ हाव्याऽ३उवा ॥ नाऽ२आइ । राऽ२३यात् । दिवा । औऽ३होवा । होऽ५इ ॥डा॥

दी. १५. उत्. ६. मा. २५. पु. ॥४२३॥

२८७. भरद्वाजो वार्हस्पत्यः। वीतहव्य आङ्गिरसो वा। जगती। अग्निः॥

६१७. समिद्धमग्निꣳसमिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम्।
विप्रꣳहोतारं पुरुवारमद्रुहं कविꣳसुम्नैरीमहे जातवेदसम्॥१॥

६१८. त्वान्दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम्।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे॥२॥

६१९. विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानाꣳरजसी समीयसे।
यत्ते धीतिꣳसुमतिमावृणीमहेऽध स्म नस्त्रिवरूथश्शिवो भव॥३॥

धा. २२. उ. न. स्व. २. या.॥१३॥

---

२८७. समिद्धम्। सम्। इद्धम। अग्निम्। समिधा। सम्। इधा। गिरा। गृणे। शुचिम्। पावकम्। पुरः। अध्वरे। ध्रुवम्। विप्रम्। वि। प्रम्। होतारम्। पुरुवारम्। पुरु। वारम्। अद्रुहम्। अ। द्रुहम्। कविम्। सुम्नैः।

---

१०. यज्ञायज्ञीये॥ अग्निर्वैश्वानरः। अनुष्टुप्। अग्निः॥

विशोऽ५वि। शोऽ३वोऽ३अताइथाइम्॥ वाजयन्ताः। पूऽ३रू-
प्रीऽ३याम्। अग्नाऽ२इम्वः। दुरीऽ२३याम्। हुम्माइ॥ वाऽ३२चाः॥
स्तूषेशूषस्यमाऽ२न्मभाउ॥श्रीः॥ स्तूषाइ॥ शूषस्यमन्मभिर्यज्ञनासो। हाऽ३-
वाइष्माऽ३न्ताः। मित्राऽ२न्न। सर्पाऽ२३इरा। हुम्माइ॥ सूऽ३२ताइम्॥
प्राशꣳसन्तिप्रशाऽ२स्तिभाउ॥ श्रीः॥ प्राशा॥ सन्तिप्रशस्तिभिꣳपन्या-
ꣳसज्ञा। ताऽ३वाइदाऽ३साम्। योदेऽ२व। ताताऽ२३ऊ। हुम्माइ॥
याऽ३२ता॥ हाव्यान्यैरयाऽ२द्दिवाउ। दी. ९. उत्. न. मा. २५. लु.॥४२४॥

११. अग्निर्वैश्वानरः। जगती। अग्निः॥

समाऽ५इद्धम्। आऽ३ग्नाऽ३इꣳसमिधा॥ गाइरागृणेशुचिंपावकं-
पुरोआ। ध्वाऽ३राइध्रूऽ३वाम्। विप्राऽ२ꣳहोतारंपुरुवारमद्रु। हङ्काऽ२३-
वीम्। हुम्माइ॥ सूऽ३२म्नाइः॥ आइमहेजातवाऽ२इदसाउ॥ श्रीः॥

ईमहे। जातवेदसम्। जात। वेदसम्॥ त्वाम्। दूतम्। अग्ने। अमृतम्। अ।
मृतम्। युगेयुगे। युगे। युगे। हव्यवाहम्। हव्य। वाहम्। दधिरे। पायुम्।
ईड्यम्। देवासः। च। मर्तासः। च। जागृविम्। विभुम्। वि। भुम्। विश्प-
तिम्। नमसा। नि। सेदिरे। विभूषन्। वि। भूषन्। अग्ने। उभयान्।
अनु। व्रता। दूतः। देवानाम्। रजसी इति। सम्। ईयसे। यत्। ते।
धीतिम्। सुमतिम्। सु। मतिम्। आवृणीमहे। आ। वृणीमहे। अध। स्म।
नः। त्रिवरूथः। त्रि। वरूथः। शिवः। भव॥

---

सान्त्वाम्॥ दूतमग्नेअमृतंयुगेयुगेहव्यवाहन्दधिरेपा। यूऽ३माइडाऽ३याम्।
देवाऽ२सश्चमर्तासश्चजागृ। विंवाऽ२३इभूम्। हुम्माइ॥ वाऽ३२इश्पा॥
ताइन्नमसानिषाऽ२इदिराउ॥ श्रीः॥ राइवाइ॥ भूषन्नग्नउभया॰अनुव्रता-
दूतोदेवाना॰रजसी। साऽ३मीयाऽ३साइ। यत्तेऽ२धीति॰सुमतिमावृणीम।
हआऽ२३धा। हुम्माइ॥ स्माऽ३२नाः॥ त्राइवरूथशिवोऽ२भवाउ॥
वाऽ३४५॥ दी. ३१. उत्. न. मा. ३५. हु.॥४२५॥

१२. कावम्॥ कविः। जगती। अग्निः॥

समोवा॥ धमग्नि॰समिधा। गिरागार्णाऽ२इ। शुचिम्पावकं-
पुरोआ। ध्वरेध्रूवाऽ२म्॥ विप्र॰होतारंपुरुवा। रमद्रूहाऽ२३म्। कावीऽ३-
॰स्रुम्नाइः॥ ईमहाइजाऽ२३। तावाऽ३इदाऽ५"साऽ६५६म्॥ श्रीः॥
तुवोवा॥ दूतमग्नेअमृताम्। युगेयूगाऽ२इ। हव्यवाहन्दधिरेपा। युमी-
डायाऽ२म्॥ देवासश्चमर्तासाः। चजागृवाऽ२३इम्॥ वाइभूऽ३म्वाइश्पा।
तिन्नमासाऽ२३। नाइषाऽ३इदाऽ५इ"राऽ६५६इ॥ श्रीः॥ विभोवा॥
षन्नग्नउभया॰। अनुव्राताऽ२। दूतोदेवाना॰रजसी। समीयासाऽ२इ॥
यत्तेधीति॰सुमतिमा। वृणीमाहाऽ२३इ॥ आधाऽ३स्मानाः। त्रिवरूथा-
ऽ२३ः। शाइवोऽ३भाऽ५"वाऽ६५६॥ दी. २६ उत्. १५. मा. २८. डै.॥४२६॥

२८८. प्रयोगो भार्गवः पावकोऽग्निर्बार्हस्पत्यो वा गृहपतियविष्ठौ सहसः पुत्रावन्यतरो वा । गायत्री । अग्निः ॥

६२०. उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः । वायोरनीके अस्थिरन् ॥१॥

६२१. यस्य त्रिधात्ववृतं बर्हिस्तस्थावसन्दिनम् । आपश्चिन्नि दधा पदम् ॥२॥

६२२. पदन्देवस्य मीढुषोऽनाधृष्टाभिरूतिभिः । भद्रा सूर्य इवोपदृक् ॥३॥

धा. १६. उ. न. स्व. ५. हु. ॥१४॥

चतुर्थः खण्डः ॥

इति पञ्चदशोऽध्यायः ॥

सप्तमप्रपाठकस्य द्वितीयोऽर्धः ॥

---

२८८. उप । त्वा । जामयः । गिरः । देदिशतीः । हविष्कृतः । हविः । कृतः । वायोः । अनीके । अस्थिरन् ॥ यस्य । त्रिधातु । त्रि । धातु । अवृतम् । अ । वृतम् । बर्हिः । तस्थौ । असन्दिनम् । अ । सन्दिनम् । आपः । चित् । नि । दध । पदम् ॥ पदम् । देवस्य । मीढुषः । अनाधृष्टाभिः । अन् । आधृष्टाभिः । ऊतिभिः । भद्रा । सूर्यः । इव । उपदृक् । उप । दृक् ॥

---

१३. वारवन्तीयम् ॥ इन्द्रः । गायत्री । अग्निः ॥

उपत्वाजाऔहोहाइ ॥ मायोगाऽ२३४इराः । देदाइशाऽ२३४हा । तीर्हविष्काऽ३४ । औहोवा । इहाऽ२३४हाइ । उहुवाऽ२३४र्ताः ॥ वायोर । नाइकेअस्थाऽ३४ । औहोवा ॥ इहाऽ२३४हाइ । औहोऽ३१२३४ । रान् । एहियाऽ६हा ॥ श्रीः ॥ यस्यत्रिधाऔहोहाइ ॥ तूआवाऽ२३४र्ताम् । बर्हाइस्ताऽ२३४हाइ । स्थावसन्दाऽ३४ । औहोवा । इहाऽ२३४हाइ । उहुवाऽ२३४नाम् ॥ आपश्चित् । नाइदधापाऽ३४ । औहोवा ॥ इहाऽ२३४-हाइ । औहोऽ३१२३४ । दाम् । एहियाऽ६हा ॥श्रीः॥ पदन्देवाऔहोहाइ ॥ स्यामाइढूऽ२३४षाः । अनाधाऽ२३४हा । ष्टाभिरूताऽ३४ । औहोवा । इहाऽ२३४हाइ । उहुवाऽ२३४भीः ॥ भद्राम्र । यीइवोपाऽ३४ । औहोवा ॥

## अथ षोडशोऽध्यायः ॥

सप्तमप्रपाठकस्य तृतीयोऽर्धः ॥

२८९. मेध्यातिथिः काण्वः । बृहतीसतोबृहत्यौ । इन्द्रः ॥

६२३. अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवस्समस्वरन्रुद्रा गृणन्त पूर्व्यम् ॥१॥

---

२८९. अभि । त्वा । पूर्वपीतये । पूर्व । पीतये । इन्द्र । स्तोमेभिः ।
आयवः । समीचीनासः । सम् । ईचीनासः । ऋभवः । ऋ । भवः । सम् ।
अस्वरन् । रुद्राः । गृणन्त । पूर्व्यम् ॥ अस्य । इत् । इन्द्रः । वावृधे । वृष्ण्यम् ।

---

इहाऽ२३४हाइ । औहोऽ३१२३४ । दृक् । एहियाऽ६हा । होऽ५इ ॥डा॥
दी॰ ३९॰ उत् ॰ ९॰ मा॰ ३३॰ धि॰ ॥४२७॥

१४-१५. [1]जराबोधीये ॥ अग्निः । गायत्री । पवमानस्सोमः ॥

उच्चातेजोवा ॥ तामन्धसाः । दिवाइसाऽ२३ऽद्भू । मियादादाइ ॥
उग्राऽ॰शाऽ१माऽ२३"मा । हि । श्रवोऽ३४५इ ॥डा॥ श्रीः॥ सनइन्द्रोवा ॥
यायज्यवाइ । वरूणाऽ२३या । मरुद्भ्यायाः ॥ वराइवोऽ१वीऽ२३"त्वा ।
रि । स्तवोऽ३४५इ ॥ डा ॥ श्रीः ॥ एनाविश्वोवा ॥ नाअर्यआ । द्युम्नाना-
ऽ२३इमा । जुषाणाम् ॥ सिषासाऽ१न्ताऽ२३"वा । ना । महो-
ऽ३४५इ ॥ डा ॥ दी॰ ६॰ उत् ॰ ९॰ मा॰ १४॰ घी॰ ॥४२८॥

इषन्तोकोवा ॥ यानोदधात् । अस्माभ्याऽ२३॰सो । मविश्वाताः ॥
आपावाऽ१स्वाऽ२३"सा । ह । स्रिणोऽ३४५इ ॥ डा ॥
दी॰ ३॰ उत् ॰ ३॰ मा॰ ३॰ डि॰ ॥४२९॥

१६. वषट्कारणिधनम् ॥ प्रजापतिः । बृहती । इन्द्रः ॥

अभित्वापूर्वपीतये । अभित्वाऽ३पूर्वपीतयाइ ॥ इन्द्रस्तोमेभिऽ३-
रायवाऽ२ः । भिरायाऽ१वाऽ२३ः । ओमोऽ३वा ॥ समीचीनासऋभवस्स-

---

[1] अष्टमेसूक्ते गीयते ।

३ १   २र   ३ २ ३   २ ३  १२  ३२ ३  १ २
९२४. अस्येदिन्द्रो वावृधे वृष्ण्य७शवो मदे सुतस्य विष्णवि ।
३ १  २र   ३ १ २ ३ १   २र    ३१२
अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ।।२।।

धा. १८. उ. न. स्व. ३. रि. ।।१।।

---

१२र  १२र  ३१ २   १ २र   ३ २   ३   २        ३         १ २
शवः । मदे । सुतस्य । विष्णवि । अद्य । अ । द्य । तम् । अस्य । महिमानम् ।
३ १२   १२र  ३      १२
आयवः । अनु । स्तुवन्ति । पूर्वथा ।।

---

१ अ   —      १  २          १र न   २     र
ऽ३मास्वराऽ२न् । समास्वाऽ१राऽ२३न् । ओमोऽ३वा ।। रुद्रागृणन्तऽ३-
१अ  —       १२          १र          ३
पूर्वियाऽ२म् । तपूर्वाऽ१याऽ२३म् । ओम् । ओऽ२ । वाऽ२३४ ।
५र र        ४३र४  ३४र५      र २  ४ ५४र ५     २ र
औहोवा ।। श्रीः ।। रुद्रागृणन्तपूर्वियम् । रुद्रागाऽ३णन्तपूर्वियाम् ।। रुद्रा-
१अ  —     १२      १र न   २   र  र
गृणान्तऽ३पूर्वियाऽ२म् । तपूर्वाऽ१याऽ२३म् । ओमोऽ३वा ।। अस्येदिन्द्रो-
र र    १  अ  —      १  २       १र न  २
वावृधेवृष्णिऽ३या७शवाऽ२ः । ष्णिया७शाऽ१वाऽ२३ः । ओमोऽ३वा ।।
र      १  अ  —     १  २       १र     ^
मदेसुतस्यऽ३वाइष्णवाऽ२इ । स्यवाइष्णाऽ१वाऽ२३इ । ओम् । ओऽ२ ।
३    ५र र     ३४र ३ ४ ३  ४ ५   र२  ४ ५४  ५
वाऽ२३४ । औहोवा ।।श्रीः।। मदेसुतस्यविष्णवि । मदेसूऽ३तस्यविष्णवाइ ।।
२र      १  अ  —      १  २       १र न  २
मदेसुतस्यऽ३वाइष्णवाऽ२इ । स्यवाइष्णाऽ१वाऽ२३इ । ओमोऽ३वा ।।
र      र  १अ  —     १ २       १र न  २
अद्यातमस्यमहिमानऽ३मायवाऽ२ः । नमायाऽ१वाऽ२३ः । ओमोऽ३वा ।।
१अ  —    १२       १र    ^   ३
अनुष्टुवन्तिऽ३पूर्वथाऽ२ । तिपूर्वाऽ१थाऽ२३ । ओम् । ओऽ२ । वा-
५र र    ३   ५
ऽ२३४ । औहोवा ।। ऊऽ२३४पा ।।   दी. ४२. उत्. ६. मा. २८. झै. ।।४३०।।

१७. [१]गौङ्गवम् ।। अग्निः । बृहती । पवमानस्सोमः ।।

५र २  ४र५४र ५    १   —   १ ३र२    ४ ५
प्रसोमाऽ३देववीतयाइ ।। साइन्धूऽ२ः । नपिप्येआऽ३ । णासा ।
२ १र  र       १ ^  ३२  ४५    २ १र  र
अ७शो ४पयसामदाऽ२३इरोऽ२ । नजाऽ३गृवीः । अ७शो ४पयसामदिरः ।
३२  ४५     १ र २र    १      ३ २       ५
नजाऽ३गृवीः ।। आच्छाको । शा । औऽ३हो ।। मधूऽ२३४वा ।
४     ५          ५ र २  ४ ५४  ५       १   —
श्चूऽ५तोऽ६"हाइ ।। श्रीः ।। अच्छाकोऽ३शम्मधुश्चुताम् ।। आच्छाऽ२ ।
१र  ३ २      ४५      २र१  र      १ ^    ३र२
कोशम्मधूऽ३ । श्चूताम् । आहर्यतोअर्ज्जुनोऽ२३आऽ२ । त्केआऽ३-

---

[१] त्रिचत्वारिंशत्तमसूक्ते गीयते ।

४४

२९०. विश्वामित्रो गाथिनः । गायत्री । इन्द्राग्नी ॥

६२५. प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः । इन्द्राग्नी इष आ वृणे ॥१॥

६२६. इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनतम् । साकमेकेन कर्मणा ॥२॥

६२७. इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः । ऋतस्य पथ्या३अनु ॥३॥

६२८. इन्द्राग्नी तविषाणि वाँ सधस्थानि प्रयाँसि च ।
युवोरप्तूर्यँ हितम् ॥ धा. १३. उ. १. स्व. २. टा. ॥२॥

२९१. भर्गः प्रागाथः । बृहतीसतोबृहत्यौ । इन्द्रः ॥

६२९. शग्ध्यू३षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगन्न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥१॥

---

२९०. प्र । वाम् । अर्चन्ति । उक्थिनः । नीथाविदः । नीथ । विदः । जरितारः । इन्द्राग्नी । इन्द्र । अग्नी इति । इषः । आ । वृणे ॥ इन्द्राग्नी । इन्द्र । अग्नी इति । नवतिम् । पुरः । दासपत्नीः । दास । पत्नीः । अधूनतम् । साकम् । एकेन । कर्मणा ॥ इन्द्राग्नी । इन्द्र । अग्नी इति । अपसः । परि । उप । प्र । यन्ति । धीतयः । ऋतस्य । पथ्याः । अनु ॥ इन्द्राग्नी । इन्द्र । अग्नी इति । तविषाणि । वाम् । सधस्थानि । सध । स्थानि । प्रयाँसि । च । युवोः । अप्तूर्यम् । अप् । तूर्यम् । हितम् ॥

२९१. शग्धि । उ । सु । शचीपते । शची । पते । इन्द्र । विश्वाभिः । ऊतिभिः । भगम् । न । हि । त्वा । यशसम् । वसुविदम् । वसु । विदम् । अनु ।

---

व्याता । आहयंतोअजुनोअ । त्केआऽ३व्याता ॥ प्रायस्स्व । ना । औऽ३हो ॥ नमोऽ२३४वा । जाऽ५योऽ६"हाइ ॥ श्रीः ॥ प्रियस्स्वऽ३नुर्न-र्मर्जियाः ॥ प्रायाऽ२ः । स्वनुर्न्माऽ३ । जायाः । तमीँहिन्वन्त्यपाऽ२३-सोऽ२ । यथाऽ२राथाम् ॥ तमीँहिन्वन्त्यपसः । यथाऽ३राथाम् ॥ नादीषु । आ । औऽ३हो ॥ गमोऽ२३४वा । स्ताऽ५योऽ६"हाइ ॥

दी. २४. उत्. ९. मा. २५. धु. ॥४३१॥

६३०. पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः ।
न किहिं दानं परि मर्द्धिषत्त्वे यद्यद्यामि तदा भर ॥२॥

धा. १७. उ. १. स्व. ५. चु. ॥३॥

२९२. भर्गः प्रागाथः । बृहतीसतोबृहत्यौ । इन्द्रः ॥

६३१. त्वꣳह्येहि चेरवे विदा भगं वसुत्तये ।
उद्वा वृषस्व मघवन्गविष्टय उदिन्द्राश्वमिष्टये ॥१॥

---

शूर । चरामसि ॥ पौरः । अश्वस्य । पुरुकृत् । पुरु । कृत् । गवाम् । असि । उत्सः । उत् । सः । देव । हिरण्ययः । न । किः । हि । दानम् । परिमर्द्धिषत् । परि । मर्द्धिषत् । त्वे इति । यद्यत् । यत् । यत् । यामि । तत् । आ । भर ॥

२९२. त्वम् । हि । आ । इहि । चेरवे । विदाः । भगम् । वसुत्तये । उत् । वा । वृषस्व । मघवन् । गविष्टये । गो । इष्टये । उत् । इन्द्र । अश्वमिष्टये ।

---

१८. हारायणम् ॥ इन्द्रः । बृहती । इन्द्रः ॥

शꣳध्यूष्वौहोऽ२इशचीपताइ ॥ आइन्द्रविश्वाभिरूतिभिः । भगाऽ३ही । त्वायशसाम् । वसूऽ३हाइ ॥ वाइदाऽ२म् ॥ अनुशूरचरोवाऽ३ओऽ२३४वा । माऽ५सोऽ६"हाइ ॥ श्रीः ॥ अनुशूरौहोऽ२इचरामसाइ ॥ आनुशूरचरामसि । पौरोआऽ३श्वा । स्यपुरुकृत् । गवाऽ३ꣳहाइ । आसाऽ२इ ॥ उत्सोदेवहिरोवाऽ३ओऽ२३४वा । ण्याऽ५योऽ६"हाइ ॥ श्रीः ॥ उत्सोदेवौहोऽ२इहिरण्ययाः ॥ ऊत्सोदेवहिरण्ययः । नकाइहाऽ३इदा । नम्परिमा । र्धिषाऽ३हाइ ॥ तूवाऽ२इ ॥ यद्यद्यामितदोवाऽ३ओऽ२३४वा । भाऽ५रोऽ६"हाइ ॥　　दी. २१. उत्. न. मा. २७. हे. ॥४३२॥

१९. कौल्मलबर्हिषम् ॥ कुल्मलबर्हिः । बृहती । इन्द्रः ॥

तुवाऽ३ꣳहोऽ३एहिचेरवाइ ॥ विदाभगंवसूऽ२त्तायाऽ२३४इ । उद्वावृषस्वमघावान् ॥ ऐहोइ । गाऽ२विष्टयाइ ॥ उदिन्द्राश्वमोवाऽ३ओऽ२३४वा । ष्टाऽ५योऽ६"हाइ ॥ श्रीः ॥ उदाऽ३इन्द्राऽ३अश्वमिष्टयाइ ॥

९३२. त्वं पुरू सहस्राणि शतानि च यूथा दानाय मꣳहसे ।
आ पुरन्दरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे ॥२॥
धा. १५. उ. २. स्व. न. फौ. ॥४॥

---

अश्वम् । इष्टये ॥ त्वम् । पुरु । सहस्राणि । शतानि । च । यूथा । दानाय । मꣳहसे । आ । पुरन्दरम् । पुरम् । दरम् । चकृम । विप्रवचसः । विप्र । वचसः । इन्द्रम् । गायन्तः । अवसे ॥

---

उदिन्द्राश्वमाऽ२इष्टायाऽ२३४इ । त्वंपुरूसहस्राणी ॥ ऐहोइ । शाऽ२-तानिचा ॥ यूथादानायमोवाऽ३ओऽ२३४वा । हाऽ५सोऽ६"हाइ ॥ श्रीः ॥ यूथाऽ३दाऽ३नायमꣳहसाइ ॥ यूथादानायमाऽ२ꣳहासाऽ२३४इ । आपु-रन्दरश्चकृमा ॥ ऐहोइ । विप्राऽ२वचसाः ॥ इन्द्रङ्गायन्तोवाऽ३ओऽ२३४वा । वाऽ५सोऽ६"हाइ ॥
दी. २३. उत् . ७. मा. २२. ठा. ॥४३३॥

२०. [1]आशुभार्गवम् ॥ भृगुः । गायत्री । पवमानस्सोमः ॥

प्रसोमासोम । दच्यूऽ३ताः ॥ श्रावसेनोऽ३ । माऽ२घोऽ२३४-नाम् ॥ सुतावाऽ१इदाऽ२ ॥ थेआऽ३ । क्राऽ२३४मोऽ६"हाइ ॥
दी. ५. उत् . न. मा. ५. वु. ॥४३४॥

तृतीयो विꣳशः ॥

एकादशस्यार्द्धःप्रपाठकः ॥

१. [2]सत्रासाहीयम् ॥ इन्द्रः । उष्णिक् । पवमानस्सोमः ॥

प्रधाऽ३४ । न्वासोमजागृविः । ओऽ६वा ॥ इन्द्रायेन्दोपरिस्र-वद्युमन्ताऽ२ꣳशू । ष्माऽ२मा । भाऽ२३रा ॥ सुवौऽ३हो । वाहाऽ३४३इ ॥ वाऽ२३४इदोऽ६"हाइ ॥
दी. ८. उत् . न. मा. ४. री. ॥४३५॥

---

[1] चतुश्चत्वारिंशसूक्तस्य प्रथमस्तोत्रीयायां गीयते ।

[2] अस्याधारभूता ऋक् पूर्वार्चिके—सप्तषष्ट्युत्तरपञ्चशतसंख्याका गता । सा च पदपाठसहिता यथा वा—

२. [1]श्यावाश्वम् ॥ श्यावाश्वः । अनुष्टुप् । पवमानस्सोमः ॥

प्रसुऽ२१ । न्वाऽ३ना । यअ । धाऽ३सः । एहिया ॥ मा ।
तोनवष्टा । तत् । वचाऽ२ः । एहियाऽ२ । अपश्वानामाऽ३राऽ३ ॥
धाऽ२३४साम् ॥ एहाऽ२इ । एहियाऽ२ । हतामखान्नाऽ३भुऽ३ । गा-
ऽ३४५वोऽ"६हाइ ॥　　　　दी. ६. उत् ३. मा. ७. गे. ॥४३६॥

३. [2]औदलम् ॥ उद्दलः । अनुष्टुप् । पवमानस्सोमः ॥

प्रसुन्वाना ॥ याआऽ२न्धसाः । मर्तोनवाऽ३ । ष्टातद्वाऽ२३४चाः ॥
अपश्वानाम् ॥ आराऽ२घसाम् । हतामाऽ२३खाऽ३म् । नाऽ२३भुऽ३ ।
गाऽ३४५वोऽ६"हाइ ॥श्रीः॥ आजामिरा ॥ त्केआऽ२व्यता । भुजेनपूऽ३त् ।
त्राओणाऽ२३४योः ॥ सरज्जाराः ॥ नायोऽ२षणाम् । वरोनाऽ२३योऽ३ ।
नाऽ२३इमाऽ३ । साऽ३४५दोऽ६"हाइ ॥ श्रीः ॥ सवीरोदा ॥ क्षासाऽ२-
घनाः । वियस्तस्ताऽ३ । मारोदाऽ२३४साइ ॥ हरि४पवाइ ॥ त्रेआऽ२-
व्यता । वेधानाऽ२३योऽ३ । नाऽ२३इमाऽ३ । साऽ३४५दोऽ६"हाइ ॥
दी. १३. उत् . ६. मा. २१. ट. ॥४३७॥

४. [3]यज्ञायज्ञीयम् ॥ अग्निर्वैश्वानरः । बृहती । अग्निः ॥

प्रदेऽ५वः । दाऽ३सोऽ३आग्नाइः ॥ दाइवइन्द्रो । नाऽ३माज्मा-
ऽ३ना । अनूऽ२मातरंपृथि । वीम्वाऽ२३इवा । हुम्माइ ॥ वाऽ३२ताइ ॥

---

चक्षुर्मानवः । उष्णिक् । पवमानस्सोमः ॥

प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव । द्युमन्तꣳशुष्ममा भर स्वर्विदम् ॥

प्र । धन्व । सोम । जागृविः । इन्द्राय । इन्दो । परि । स्रव । द्युमन्तम् ।
शुष्मम् । आ । भर । स्वर्विदम् । स्वः । विदम् ॥

[1]. त्रयोविंशत्युत्तरद्विशततमसूक्तस्य प्रथमस्तोत्रीयायां गीयते ।

[2] त्रयोविंशत्युत्तरद्विशततमसूक्ते गीयते ।

[3] एकोनसप्तत्युत्तरद्विशततमसूक्ते गीयते । अत्रेदमवधेयम् । तस्मिन्सूक्ते या प्रथमा सात्रोत्तमा । तत्र योत्तमा सात्र प्रथामा ऋगिति । अतोऽस्य वक्रयज्ञायज्ञीयमित्यपि वैदिकी समाख्या ॥

२९३. सोभरिः काण्वः। बृहतीसतोबृहत्यौ। अग्निः॥

६३३. यो विश्वा दयते वसु होता मन्द्रो जनानाम्।
मघोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥१॥

६३४. अश्वन्न गीर्भी रथ्य सुदानवो मर्मृज्यन्ते देवयवः।
उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनाम् ॥२॥

धा. १५. उ. १. स्व. ५. पु. ॥५॥

प्रथमः खण्डः॥

---

२९३. यः। विश्वा। दयते। वसु। होता। मन्द्रः। जनानाम्। मघोः। न। पात्रा। प्रथमानि। अस्मै। प्र। स्तोमाः। यन्तु। अग्नये॥ अश्वम्। न। गीर्भिः। रथ्यम्। सुदानवः। सु। दानवः। मर्मृज्यन्ते। देवयवः। उभे इति। तोके इति। तनये। दस्म। विश्पते। पर्षि। राधः। मघोनाम्॥

---

तास्थौनाकस्यशऽ२र्मणाउ॥ श्रीः॥ णाया॥ स्माद्रेजन्तकृष्टयश्चर्कृत्या। नीऽ३काण्वाऽ३ताः। सहाऽ२स्रसांमेधसा। तावाऽ२३इवा। हुम्माइ॥ त्माऽ३२ना॥ आग्निन्धीभिर्नमाऽ२स्यताउ॥ श्रीः॥ तात्रा॥ दर्शिंगा-तुवित्तमोयस्मिन्स्थिव्रता। नीऽ३आदाऽ३धूः। उपोऽ२सुजातमा। यस्याऽ२३वा। हुम्माइ॥ धाऽ३२नाम्। आग्निभक्षन्तुनोऽ२गिराउ॥ वाऽ३४५॥ दी. १५. उत्. न. मा. २१. व. ॥४३८॥

५. दैर्घश्रवसम्॥ दीर्घश्रवाः। बृहती। अग्निः॥

योविश्वादयतेवस्वोहाओहाऽ३ए॥ होताऽ२मन्द्रोजनाऽ२नाम्। ओऽ३हा। ओऽ३हाऽ३एऽ३४॥ मघोऽ३४र्नपा। त्राप्रथ। मानायस्माइ। ओऽ३हा। ओऽ३हाऽ३एऽ३४॥ प्रस्तोऽ३४मायाऽ३॥ तुवोऽ२३४वा। ग्नाऽ५योऽ६"हाइ॥ श्रीः॥ प्रस्तोमायन्त्वग्नयओहाओहाऽ३ए॥ प्रस्तोमा-ऽ२यन्त्वग्नये। ओऽ३हा। ओऽ३हाऽ३एऽ३४॥ अश्वाऽ३४न्नगाइ॥

भाइरथि । य७ह्नदानवाः । ओऽ३हा । ओऽ३हाऽ३एऽ३४ ॥ मर्मृऽ३४-
ज्यन्ताऽ३इ ॥ देवोऽ२३४वा । याऽ५वोऽ६"हाइ ॥श्रीः॥ मर्मृज्यन्तेदेव-
यवओहाओहाऽ३एऽ३ए ॥ मर्मृज्यन्ताऽ२इदेवयवः । ओऽ३हा । ओऽ३हाऽ३-
एऽ३४ ॥ उभाऽ३४इतोकाइ ॥ तानये । दस्मांविश्पताइ । ओऽ३हा ।
ओऽ३हाऽ३एऽ३४ ॥ पर्षाऽ३४इराधाऽ३ः ॥ मोऽ२३४वा । घोऽ५-
नोऽ६"हाइ ॥ दी. २९. उत्. ७. मा. ३०. थौ. ॥४३९॥

६. ¹अभीवर्तः ॥ अभीवर्तः । बृहती । इन्द्रः ॥

शग्धाऽ३ऊऽ३षुशाचीपतोवा ॥ आइन्द्रविश्वा । भिरूताऽ१इभाऽ२इः ।
भागन्नहाऽ३१२३४इ । त्वायशसम् । वसूवाऽ१इदाऽ२म् ॥ अनूशूऽ१राऽ२ ।
चराऽ३ । माऽ२३४५ ॥ साऽ२३४५इ ॥श्रीः॥ अनूऽ३शूऽ३रचरामसोवा ॥
आनुशूर । चरामाऽ१साऽ२इ । पौरोअश्वाऽ३१२३४ । स्यपुरुकृत् ।
गवामाऽ१साऽ२इ ॥ उत्सोदाऽ१इवाऽ२ ॥ हिराऽ३ । ण्याऽ२३४५ ॥
याऽ२३४५ः ॥श्रीः॥ उत्सोऽ३देऽ३वहिरण्ययोवा ॥ ऊत्सोदेव । हिराण्या-
ऽ१याऽ२ः । नाकिर्हिदाऽ३१२३४ । नम्परिम । षिषाचूऽ१वाऽ२इ ॥
यद्याद्याऽ१माऽ२इ ॥ तदाऽ३ । भाऽ२३४५ ॥ राऽ२३४५ ॥

दी. ८. उत्. ९. मा. १९. ढो. ॥४४०॥

७. ²हाविष्कृतम् ॥ हविष्कृत् । गायत्री । पवमानस्सोमः ॥

स्वादिष्ठयामदाहाउष्ठाया ॥ पवस्वसो । मधाराऽ२३या ॥ इन्द्रा-
ऽ२होऽ१ । याऽ२३पा ॥ तवे । सूऽ२ताऽ२३४औहोवा ॥ श्रीः ॥ रक्षोहा-
विश्वचाहाउर्षणाइः ॥ अभियोनाइम् । अयोहाऽ२३ताइ ॥ द्रोणेऽ२होऽ१इ ।
साऽ२३धा ॥ स्थमा । साऽ२दाऽ२३४औहोवा ॥ श्रीः ॥ वरिवोधातमोहा-
उभूवाः ॥ म७हिष्ठोवा । त्रहन्ताऽ२३माः ॥ पर्षाऽ२होऽ१इ । राऽ२३-

¹ एकनवत्युत्तरद्विशततमसूक्ते गीयते । ² पञ्चदशसूक्ते गीयते ।

घाः ॥ मघोऽ२ । नाऽ२३४औहोवा ॥ हविष्कृतेऽ२३४५ ॥

दी. २५. उत्. १०. मा. १६. मू. ॥४४१॥

८. [1]हाविष्मतम् ॥ हविष्मान् । गायत्री । पवमानस्सोमः ॥

हावस्यप्रत्नामनुद्युतꣳहाउ ॥ शुक्रन्दुदूऽ३ । हेऽहाऽ२३४याः ।
ऐऽ२होऽ१आऽ२३इही ॥ पयास्साऽ३हा ॥ स्वसाम् । आऽ२र्षाऽ२३४-
औहोवा ॥ श्रीः ॥ हावयꣳसूर्यइवोपदृग्घाउ ॥ अयꣳसराऽ३ । साइधावा-
ऽ२३४ताइ । ऐऽ२होऽ१आऽ२३इही ॥ सप्ताप्राऽ३वा ॥ तआ । दाऽ२-
इवाऽ२३४औहोवा ॥ श्रीः ॥ हावयंविश्वानितिष्ठतिहाउ ॥ पुनानोभूऽ३ ।
वानोपाऽ२३४राइ । ऐऽ२होऽ१आऽ२३इही ॥ सोमोदाऽ३इवाः ॥ नस्तू ।
राऽ२याऽ२३४औहोवा ॥ हविष्मतेऽ२३४५ ॥

दी. १९. उत्. ७. मा. २३. थि. ॥४४२॥

९. [2]सꣳहितम् ॥ संहितः । गायत्री । पवमानस्सोमः ॥

यस्तेमदोव । राऽ२इणियाः ॥ तेनाऽ२ । पाऽ२३वा । स्वआऽ२-
न्धासा ॥ दाऽ२३इवा ॥ वाऽ२इरा । घशाऽ२३ । हाउवाऽ३ ॥ साऽ२३४-
हा ॥ श्रीः ॥ जघ्निर्वृत्रम । माऽ२इत्रियाम् ॥ सस्नाऽ२इः । वाऽ२३जाम् ।
दिवाऽ२इदाइवाइ ॥ गोऽ२३षा ॥ ताऽ२इरा । श्वसाऽ२३ः । हाउवाऽ३ ॥
आऽ२३४सी ॥ संमिश्लोअरु । षोऽ२भुवाः ॥ सूपाऽ२ । स्थाऽ२३भीः ।
नधाऽ२इनूभाइः ॥ साऽ२३इदान् ॥ श्याऽ२इनाः । नयोऽ२३ । हाउ-
वाऽ३ ॥ नाऽ२३४इमा ॥ दी. ५. उत्. ३. मा. ९. बो. ॥४४३॥

१०. [3]श्यावाश्वम् ॥ श्यावाश्वः । अनुष्टुप् । पवमानस्सोमः ॥

अयाऽ३१म् । पूऽ३षा । रयिः । भाऽ३गः । एहिया ॥ सो ।
मꣳपुनानो । अ । षताऽ२इ । एहियाऽ२ । पतिर्विश्वास्याऽ३भूऽ३ ॥
माऽ२३४नाः ॥ ऐहाऽ२इ । एहियाऽ२ । वियख्यद्रोदाऽ३सीऽ३ । ऊऽ३४५-

---

[1] एकोनचत्वारिंशत्तमसूक्ते गीयते ।

[2] षष्टितमसूक्ते गीयते ।

[3] एकषष्टितमसूक्ते गीयते ।

२९४. शुनश्शेप आजीगर्तिः । गायत्री । वरुणः ॥

६३५. इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥१॥

धा. ५. उ. न. स्व. १. व. ॥६॥

२९५. सुकक्ष आङ्गिरसः । गायत्री । इन्द्रः ॥

६३६. कया त्वन्न ऊत्याभि प्र मन्दसे वृषन् । कया स्तोतृभ्य आ भर ॥१॥

धा. २. उ. न. स्व. १. य. ॥७॥

---

२९४. इमम् । मे । वरुण । श्रुधि । हवम् । अद्य । अ । द्य । च ।
मृडय । त्वाम् । अवस्युः । आ । चके ॥

२९५. कया । त्वम् । नः । ऊत्या । अभि । प्र । मन्दसे । वृषन् ।

---

भोऽ६"हाइ ॥श्रीः॥ समूऽ३१ । प्रीऽ३याः । अनू । षाऽ३त । एहिया ॥
गा । वोमदाया । घृ । ष्वयाऽ२ः । एहियाऽ२ । सोमास४काण्वाऽ३ता-
ऽ३इ ॥ पाऽ२३४थाः ॥ ऐहाऽ२इ । एहियाऽ२ । पवमानासाऽ३आऽ३इ ।
दाऽ३४५वोऽ६"हाइ ॥श्रीः॥ यओऽ३१ । जाऽ३इष्ठः । तमा । भाऽ३र ।
एहिया ॥ पा । वमानश्रा । वा । यियाऽ२म् । एहियाऽ२ । य४पञ्च-
चार्षाऽ३णीऽ३ः ॥ आऽ२३४भाइ ॥ ऐहाऽ२इ । एहियाऽ२ । रयिंये-
नावाऽ३नाऽ३ । माऽ३४५होऽ६"हाइ ॥ दी.२१. उत्. ९. मा २३. घि. ॥४४४॥

११. [1]आशुभार्गवम् ॥ भृगुः । गायत्री । पवमानस्सोमः ॥

प्रसोमासोवि । पश्चाऽ३इताः ॥ आपोनयाऽ३ । ताऊऽ२मी-
ऽ२३४याः ॥ वनानाऽ१इमाऽ२ । हिषाऽ३ः । आऽ२३४इवोऽ६"हाइ ॥
श्रीः॥ अभिद्रोणानि । बभ्राऽ३वाः ॥ शूक्राऋताऽ३ । स्याधाऽ२राऽ२३४-
या ॥ वाजाङ्गोऽ१माऽ२ । तमाऽ३ । क्षाऽ२३४रोऽ६"हाइ ॥ श्रीः ॥
सुताइन्द्राय । वायाऽ३वाइ ॥ वारुणायाऽ३ । मारूऽ२न्द्राऽ२३४याः ॥
सोमाआऽ१र्षाऽ२ । तुवाऽ३इ । ष्णाऽ२३४वोऽ६"हाइ ॥

दी. १३. उत्. २. मा. १७. ठे. ॥४४५॥

---

[1] द्विचत्वारिंशत्तमसूक्ते गीयते ।

२९६. मेध्यातिथिः काण्वः । बृहतीसतोबृहत्यौ । इन्द्रः ॥

२ ३ २ ३ १ २ ३ १ २ ३क२र ३ २
९३७. इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
१ २ ३ २ ३ १ २ ३ २ ३ १२ ३ १ २
इन्द्रꣳसमीके वनिनो हवामह इन्द्रन्धनस्य सातये ॥१॥
१ २ ३१ २र ३ २ ३ २ ३ १२
९३८. इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रस्सूर्यमरोचयत् ।
१ २ ३ २ ३ १२ ३ १ २ ३ २ ३ १ २
इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रेस्वानास इन्दवः ॥२॥

धा. १५. उ. न. स्व. २. वा. ॥८॥

---

१२र ३ १ २ ३
कया । स्तोतृभ्यः । आ । भर ॥
१२र ३ १ २ १२र ३ २ ३ २ ३ २
२९६. इन्द्रम् । इत् । देवतातये । इन्द्रम् । प्रयति । प्र । यति । अध्वरे ।
१२र ३ २ ३ २ ३ १ २ ३ १२र १२र ३ १ २
इन्द्रम् । समीके । सम् । ईके । वनिनः । हवामहे । इन्द्रम् । धनस्य । सातये ॥
१२र ३ २ १२र३ १ २ ३ १२र १२र ५२र ३
इन्द्रः । मह्ना । रोदसी इति । पप्रथत् । शवः । इन्द्रः । सूर्यम् । अरोचयत् ।
१२र ३ १२र १२र ३ १२र ३ १ २ १२र
इन्द्रे । ह । विश्वा । भुवनानि । येमिरे । इन्द्रे । स्वानासः । इन्दवः ॥

---

१२. यौक्तस्रुचम् ॥ युक्तस्रुक् । बृहती । इन्द्रः ॥

१ २ १२र१ २ १ २ १ —
इन्द्रमिद्देवता ॥ तयाइ । इन्द्रंप्रयतियध्वाऽ२३राइ । आइन्द्राऽ२म् ।
र १र र २१र २ १ — १ २ १ ५
समीकेवनिनोहवामाऽ२३हाइ । आइन्द्राऽ२म् ॥ धानस्यसोऽ२३४वा ॥
३ ५ १ २ १ २ १ २ १र २
ताऽ२३४ये ॥श्रीः॥ इन्द्रंधनस्यह्ना ॥ तयाइ । इन्द्रंधनस्यसाताऽ२३याइ ।
१ — १र र र २१ २ १ — १ २ १
आइन्द्रोऽ२ । मह्नारोदसीपप्रथच्छाऽ२३वाः ॥ आइन्द्राऽ२ः ॥ सूर्यमरो-
५ ३ ५ १ २ १र २ १ र
ऽ२३४वा ॥ चाऽ२३४यात् ॥श्रीः॥ इन्द्रस्सूर्यमरो ॥ चयात् । इन्द्रस्सूर्य-
२१र २ १ — १ र र २१र २ १
मरोचाऽ२३यात् । आइन्द्रेऽ२ । हविश्वाभुवनानियेमाऽ२३इराइ । आ-
— १ र २ १ ५ ३ ५
इन्द्रेऽ२ । स्वानासओऽ२३४वा ॥ दाऽ२३४वाः ॥

दी. १६. उत्. २. मा. २२. स्वा. ॥४४६॥

१३. [1]गौतमम् ॥ गोतमः । अनुष्टुप् । पवमानस्सोमः ॥

५ ३र२र३ ४ ५ २ १ २ १ २ १ ३ २
प्रसुन्वानायअन्धसाः ॥ मर्तोनवा । ष्टतद्वचाऽ२ः । अपा ।
३र ५ १र र र १ ३ १ १ १ ३ २ ३र ५
औहोऽ२३४वा ॥ श्वानमराधसाऽ२३४५म् ॥ हता । औहोऽ२३४वा ।
३ २ ३र ५ ४ ५र र ३ २ ३ र ४ ५
मखा । औहोऽ२३४वा ॥ नभृऽ६गवाः ॥ श्रीः ॥ आजामिरत्केअव्यता ॥

---

[1] त्रयोविंशत्युत्तरद्विशततमसूक्ते गीयते ।

भुजाइनपूत् । त्रश्रोणियोऽ२ः । सरा । औहोऽ२३४वा । जारोनयोषणा-
ऽ२३४५म् ॥ वरा । औहोऽ२३४वा । नया । औहोऽ२३४वा । निमा-
ऽ६सदाम् ॥ श्रीः ॥ सवीरोदक्षसाधनाः ॥ वियास्तस्ता । भरोदसाऽ२इ ।
हरा । औहोऽ२३४वा । पवित्रेअव्यताऽ२३४५ ॥ वेधा । औहोऽ२३४वा ।
नया । औहोऽ२३४वा ॥ निमाऽ५सदाम् । होऽ५इ ॥डा॥

दी. २६. उत्. ८. मा. १७. गे. ॥४४७॥

१४. [1]आजिगम् ॥ अजिगः । गायत्री । पवमानस्सोमः ॥

वृषापावा । स्वधारायाः ॥ मरुत्वते । चामत्साऽ२३राः ॥
विश्वादाधा ॥ नओजाऽ२३साऽ२३४३ ॥श्रीः॥ तन्त्वाधार्ता । रमोणायोः ॥
पवमान । स्रवद्दूऽ२३शाम् ॥ हिन्वेवाजाइ ॥ षुवाजाऽ२३इनाऽ२३४३म् ॥
श्रीः ॥ अयाचाइत्तो । विपानाया ॥ हरि४पव । स्वाधाऽ१राऽ२३या ॥
युजाम्वाजाइ ॥ षुचोदाऽ२३याऽ३४३ । ओऽ२३४५इ ॥डा॥

दी. ५. उत्. ४. मा. १०. भौ. ॥४४८॥

१५. स्वारसौपर्णम् ॥ सुपर्णः । गायत्री । पवमानस्सोमः ॥

वृषापवस्वधाराऽ३या ॥ मरुत्वतेचमा । हुम् । त्साऽ२३४राः ॥
वाइश्वाऽ३उवा ॥ दधा । नओऽ२३४वा । जाऽ५सोऽ६"हाइ ॥ श्रीः ॥
तन्त्वाधर्तारमोणाऽ३योः ॥ पवमानसुवा । हुम् । द्ऽ२३४शाम् ॥ हाइन्वा-
ऽ३उवा ॥ वाजे । षुवोऽ२३४वा । जाऽ५इनोऽ६"हाइ ॥ श्रीः ॥ अया-
चित्तोविपानाऽ३या ॥ हरि४पवस्वधा । हुम् । राऽ२३४या ॥ युजाऽ३-
उवा ॥ वाजे । षुचोऽ२३४वा । दाऽ५योऽ६"हाइ ॥

दी. १८. उत्. ६. मा. १६. दू. ॥४४९॥

१६. [2]दैर्घश्रवसम् ॥ दीर्घश्रवाः । बृहती । पवमानस्सोमः ॥

पुनानस्सोमधारयाओहाओहाऽ३ए ॥ अपोवसानोअर्षसि । ओ-

---

[1] पञ्चपञ्चाशत्तमसूक्ते द्वे सामनी गीयेते ।  [2] नवमसूक्ते गीयते ।

ऽ३हा। ओऽ३हाऽ३एऽ३४ ॥ आराऽ३४त्वघाः ॥ योनिम् । तस्यासीदसाइ ।
ओऽ३हा । ओऽ३हाऽ३एऽ३४ ॥ उत्सोऽ३४देवाऽ३ः । हिरोऽ२३४वा ।
ण्याऽ५योऽ६"हाइ ॥ श्रीः ॥ उत्सोदेवोहिरण्ययओहाओहाऽ३ए ॥ उत्सो-
देवोहिरण्ययः । ओऽ३हा । ओऽ३हाऽ३एऽ३४ ॥ दुहाऽ३४नऊ ॥
धार्दिवि । यम्माधुप्रियाम् । ओऽ३हा । ओऽ३हाऽ३एऽ३४ ॥ प्रत्नाऽ३४-
ऽसधाऽ३ ॥ स्थमोऽ२३४वा । साऽ५दोऽ६"हाइ ॥श्रीः ॥ प्रत्नऽसधस्थ-
मासददोहाओहाऽ३ए ॥ प्रत्नऽसधस्थमासदत् । ओऽ३हा । ओऽ३हाऽ३-
एऽ३४ ॥ आपाऽ३४छियाम् ॥ धारुणम् । वाजायर्षसाइ । ओऽ३हा ।
ओऽ३हाऽ३एऽ३४ ॥ नृभाऽ३४इर्धौताऽ३ः ॥ विचोऽ२३४वा । क्षाऽ५-
णोऽ६"हाइ ॥ दी. ३०. उत्. ८. मा. ३०. बौ. ॥४५०॥

१७. [1]सुरूपोत्तरम् ॥ सुरूपः । गायत्री । पवमानस्सोमः ॥

यस्तेमदौहोऽ२ । इया ॥ वरेणायाऽ२ः । तेनापवौहोऽ२ ।
इया । स्वअन्धासाऽ२ ॥ देवावीरौहोऽ२ । इया ॥ घश ऽसाऽ२३हा-
ऽ३४३ ॥ श्रीः ॥ जघ्निर्वृत्रौहोऽ२ । इया ॥ अमित्रायाऽ२म् । सस्निर्वा-
जौहोऽ२ । इया । दिवेदाइवाऽ२इ ॥ गोषातिरौहोऽ२ । इया ॥ अश्वसा-
आऽ२३साऽ३४३इ ॥ श्रीः ॥ संमिश्लऔहोऽ२ । इया ॥ रुपोभूवाऽ२ः ।
सूपस्थामौहोऽ२ । इया । नधेनूभाऽ२इः । सोदञ्छ्येनौहोऽ२ । इया ।
नयोनाऽ२३इमाऽ३४३ । ओऽ२३४५इ ॥डा॥

दी. १९. उत् १८. मा. १३. दि. ॥४५१॥

१८. [2]शङ्कु ॥ प्रजापतिः । ककुप् । पवमानस्सोमः ॥

तुवऽहिया । एऽ२ । गदा ॥ विया । पवमानजनिमानिद्युमत्ता-
ऽ२३माः ॥ आमाऽ२र्ताऽत्वाऽ२३ ॥ यघोऽ२३४वा । षाऽ५योऽ६"हाइ ॥

---

[1] षष्टितमसूक्ते गीयते । [2] शततमसूक्ते गीयते ।

॥ श्रीः ॥ अमृतत्त्वा । एऽ२ । यघो ॥ षयान् । येनानवग्वादध्यङ्ङ-
पोर्णूऽ२३ताइ ॥ याइनाऽ२वाइआऽ२३ ॥ सओऽ२३४वा । पाऽ५इरो-
ऽ६"हाइ॥श्रीः॥येनविप्रा । एऽ२। सआ ॥ पिराइ । देवानाᳶसुम्नेअमृतस्य-
चारूऽ२३णाः ॥ याइनाऽ२आवाऽ२३ ॥ सियोऽ२३४वा। शाऽ५तो-
ऽ६"हाइ ॥　　　दी. १५. उत्. ३. मा. १५. बु. ॥४५२॥

१९. [1]सुम्नानम ॥ इन्द्रः ॥ उष्णिक्। पवमानस्सोमः ॥

पवस्वदा ॥ ववीतयाइ । इन्दोधाराऽ२ । भिरोजसा ॥ आकला-
शाऽ२म् ॥ मधु । माऽ२न्त्सोऽ२३४औहोवा ॥ मनस्सदएऽ३ ॥ श्रीः ॥
तवद्रप्साः ॥ उदप्रुताः । इन्द्रंमादाऽ२ । यवावृधुः ॥ तुवान्दाइवाऽ२ ॥
सोअ । माऽ२र्ताऽ२३४औहोवा ॥ यकंपपुरेऽ३ ॥ श्रीः ॥ आनस्सुता ॥
सइन्दवाः । पुनानाधाऽ२ । वतारयाइम् ॥ वृष्टिद्युावाऽ२ः॥ रीति ।
आऽ२पाऽ२३४औहोवा ॥ सुववींदएऽ३उपाऽ२३४५ ॥
　　　दी. १७. उत्. १५. मा. २८. चौ. ॥४५३॥

२०. [2]आसिताद्यम् ॥ असितः । अनुष्टुप् । पवमानस्सोमः ॥

अयंपूषारयाइः ॥ भगाः । सोम᳴पुनानोअर्षाऽ२३ताइ । पाता-
ऽ२इर्वाइश्वाऽ२ । स्यभूमनाः ॥ वायाऽ२ख्याद्रोऽ२ ॥ दसोवाऽ३ओ-
ऽ२३४वा । ऊऽ५भोऽ६"हाइ ॥ श्रीः ॥ समुप्रियाअनू ॥ षता ।
गावोमदायघृष्वाऽ२३याः । सोमाऽ२सा᳴काऽ२ । ण्वतेपथाः ॥ पावा-
ऽ२मानाऽ२ ॥ सओवाऽ३ओऽ२३४वा । दाऽ५वोऽ६"हाइ ॥ श्रीः ॥ यओ-
जिष्ठस्तमा ॥ भरा । पवमानश्रवाआऽ२३याम् । या᳴पाऽ२आचाऽ२ ।

---

[1] अयुत्तरद्विशततमसूक्ते गीयते ।

[2] एकषष्टितमसूक्ते गीयते ।

षणीरभाइ ॥ रायीऽ२स्याइनाऽ२ ॥ वनोवाऽ३ओऽ२३४वा ॥ माऽ५-
होऽ६''हाइ ॥ दी. १५. उत्. ७. मा. २३. फि. ॥४५४॥

चतुर्थो विंशः ॥

एकादशः प्रपाठकः ॥

१. ऋषभं पवमानः ॥ ऋषभः । गायत्री । पवमानस्सोमः ॥

हाहाउच्चातेजा ॥ हाऽ३ । हाऽ३इ । तामाऽ२न्धाऽ२३४साः ।
दिविसद्भूमियाऽ१दाऽ३दे ॥ उग्रंशाऽ२३४र्मा ॥ ओमोऽ३ । महोवा ।
श्राऽ५वोऽ६''हाइ ॥श्रीः॥ हाहाउसनइन्द्रा ॥ हाऽ३ । हाऽ३इ । याया-
ऽ२ज्याऽ२३४वाइ । वरुणायमरूऽ१द्भ्याऽ२याः ॥ वरिवोऽ२३४वीत् ॥
ओमोऽ३ । परोवा । स्वाऽ५वोऽ६''हाइ ॥श्रीः॥ हाहावेनाविश्वा ॥ हाऽ३ ।
हाऽ३इ । नाआऽ२र्याऽ२३४आ । द्युम्नानिमानूऽ१षाऽ३णाम् ॥ सिषासा-
२३४न्ताः ॥ ओमोऽ३ । वनोवा । माऽ५होऽ६''हाइ ॥
दी. १५. उत्. १. मा. १७. पे. ॥४५५॥

२. गौषूक्तम् ॥ गौषूक्तिः । गायत्री । पवमानस्सोमः ॥

उच्चातेजातमौ । हौहोवाहाइ । धसाः ॥ दिविसद्भूमियौऽ२ ।
हुवाइ । हुवाऽ२इ । दादाऽ२इ ॥ उग्रंशर्ममहौऽ२ । हुवाइ । हुवाऽ२इ ॥
श्रावाऽ२३ः । होऽ२वाऽ२३४औहोवा ॥श्रीः॥ सनइन्द्राययौ । हौहोवाहाइ ।
ज्यवाइ ॥ वरुणायमरौऽ२ । हुवाइ । हुवाऽ२इ । द्भ्यायाऽ२ः । वरिवो-
वित्परौऽ२ । हुवाइ । हुवाऽ२इ ॥ स्त्रावाऽ२३ । होऽ२वाऽ२३४औहोवा ॥
श्रीः ॥ एनाविश्वानियौ । हौहोवाहा । यंआ ॥ द्युम्नानिमानुषौऽ२ ।
हुवाइ । हुवाऽ२इ । षाणाऽ२म् ॥ सिषासन्तोवनौऽ२ । हुवाइ ।
हुवाऽ२इ ॥ माहाऽ२३इ । होऽ२वाऽ२३४औहोवा ॥ अग्निराहुता-
ऽ२३४५ः ॥ दी. २७. उत्. ६. मा. २७. चे. ॥४५६॥

[१] अष्टमरुक्ते द्वे सामनी गीयेते ।

३. [1]उत्सेधः ॥ अङ्गिरसः । बृहती । पवमानस्सोमः ॥

अभिसोमासआयवः । पव । तेमाऽ३४औहोवा ॥ दियंमदाऽ२म् । हाऽ३१उवाऽ२३ । ऊऽ३४पा ॥ समूऽ३द्रस्या । औहोवाहाइ ॥ घाइ-विष्टपाइ । मनीषाइणाः । हाऽ३१उवाऽ२३ । ऊऽ३४पा ॥ मत्साऽ३रासः । औहोवाहाइ ॥ मदाऽ३च्यूऽ५ताऽ६५६ः ॥ श्रीः ॥ मत्सरासोमदच्युतः । मत्स । रासऽ३४औहोवा ॥ मदच्युताऽ२ः । हाऽ३१उवाऽ२३ । ऊऽ३४पा ॥ तराऽ३त्सम् । औहोवाहाइ ॥ द्राम्पवमा । नऊमाइणा । हाऽ३१उवाऽ२३ । ऊऽ३४पा ॥ राजाऽ३देवः । औहोवाहाइ । ऋताऽ३-म्बृऽ५हाऽ६५६त् ॥ श्रीः ॥ राजादेवऋतंबृहत् । राजा । देवाऽ३४औहोवा ॥ ऋतंबृहाऽ२त् । हाऽ३१उवाऽ२३ । ऊऽ३४पा ॥ अर्षाऽ३मित्रा । औहोवा-हाइ ॥ स्यावरुणा । स्यधर्माणा । हाऽ३१उवाऽ२३ । ऊऽ३४पा ॥ प्रहाऽ३इन्वानः । औहोवाहाइ ॥ ऋताऽ३म्बृऽ५हाऽ६५६त् ॥ ऊऽ२३४५ ॥

दी. ३४. उत् ६. मा. ३६. तू. ॥४५७॥

४. [2]वारवन्तीयम् ॥ इन्द्रः । गायत्री । पवमानस्सोमः ॥

परिसुवाऔहोहाइ ॥ नोगाइराऽ२३४इष्ठाः ॥ पवाइत्रेऽ२३४हाइ । सोमोअक्षाऽ३४ । औहोवा । इहाऽ२३४हाइ । उहुवाऽ२३४रात् ॥ श्रीः ॥ तुवंविप्राऔहोहाइ ॥ तूवङ्काऽ२३४वीः ॥ मधूप्राऽ२३४हा । जातमन्धा-ऽ३४ । औहोवा । इहाऽ२३४हाइ । उहुवाऽ२३४साः ॥श्रीः॥ तुवेविश्वा-औहोहाइ ॥ साजोषाऽ२३४साः ॥ देवासाऽ२३४हाइ । पीतिमाशाऽ३४ । औहोवा । इहाऽ२३४हाइ । उहुवाऽ२३४ता ॥ मदेषु । सार्वधाआऽ३४ । औहोवा ॥ इहाऽ२३४हाइ । औहोऽ३१२३४ । साइ । एहियाऽ६हा । होऽ५इ ॥डा॥

दी. २५. उत्. ७. मा. २४. फी. ॥४५८॥

---

[1] त्रिसप्ततितमसूक्ते गीयते ।　　[2] पञ्चचत्वारिंशदुत्तरशततमसूक्ते गीयते ।

५. [1]श्रुध्यम् ॥ प्रजापतिः । उष्णिक् । पवमानस्सोमः ॥

प्राणाशिशूऽ२र्म । हीनोवा ॥ हिन्वन्नृता । स्यदीधिताइम् ।
विश्वापरिप्रियाभुवद् । धाऽ२३ । द्विताउवा ॥ श्रूधियाऽ२ ॥ श्रीः ॥ उप-
त्रिताऽ२स्य । पापियोवा ॥ अभक्तयात् । गुहापदाम् । यज्ञस्यसप्तधामभिर ।
धाऽ२३ । प्रियाउवा ॥ श्रूधियाऽ२ ॥श्रीः॥ त्रीणित्रिताऽ२स्य । धारयोवा ॥
पृष्ठेषुवाइ । रयद्रयाइम् । मिमीतेअस्ययोजनावि । सूऽ२३ । क्रताउवा ॥
श्रूधियाऽ२ ॥ एऽ२३हियाऽ३४३ । ओऽ२३४५इ ॥डा॥

दी. १९. उत् . ७. मा. १२. था. ॥४५९॥

६. [2]निषेधः ॥ अङ्गिरसः । अनुष्टुप् । पवमानस्सोमः ॥

पुरोजितीवोऽ३अन्धसाः ॥ सुतायमा । दयित्नवाऽ२इ । इहाऽ३ ॥
आपाऽ३श्वानाम् । हाहोऽ२३४हा ॥ श्नथिष्टाऽ२३ना । इहाऽ३ ॥ सखा-
ऽ३योदाइ । हाहोऽ२३४हा ॥ धजाऽ३इह्वाऽ५याऽ६५६म् ॥श्रीः॥ सखायो-
दीर्घाऽ३जिह्वियाम् ॥ योधारया । पावकयाऽ२ । इहाऽ३ ॥ पाराऽ३-
इप्रास्या । हाहोऽ२३४हा ॥ दतेसूऽ२३ताः । इहाऽ३ ॥ आइन्दूऽ३राश्वाः ।
हाहोऽ२३४हा ॥ नकाऽ३त्वीऽ५याऽ६५६ः ॥श्रीः॥ इन्दुरश्वोनाऽ३कृत्वियाः ॥
तन्दूरोषाम् । अभीनराऽ२ः । इहाऽ३ ॥ सोमाऽ३म्वाइश्वा । हाहोऽ२३४-
हा ॥ चियाधाऽ२३या । इहाऽ३ ॥ याज्ञाऽ३यासा । हाहोऽ२३४हा ॥
तुवाऽ३द्राऽ५याऽ६५६ः ॥ हेऽ२३४५ ॥

दी. १२. उत् . ९. मा. १८. झै. ॥४६०॥

७. [3]वाजदावर्यः ॥ वाजदावर्यः । अक्षरपङ्क्तिः । पवमानस्सोमः ॥

परिप्रधा ॥ न्वाऽ२ईऽ२३४न्द्रा । याऽ२सोऽ२३४मा । स्वाऽ२दूः ।
माऽ२३इत्रा ॥ याऽ२पू । ष्णेभोऽऽ२३४वा । गाऽ५योऽ६"हाइ ॥ श्रीः ॥

---

[1] त्रयोविंशत्युत्तरशततमसूक्ते गीयते ।

[2] अष्टादशसूक्ते गीयते ।

[3] सप्तदशोत्तरद्विशततमसूक्ते गीयते ।

एवामृता ॥ याऽ२माऽ२३४हे । क्षाऽ२याऽ२३४या । साऽ२शू ॥ क्रो-
ऽ२३आ ॥ षाऽ२दाइ ॥ व्य४पोऽ२३४वा । यूऽ५षोऽ६"हाइ ॥ श्रीः ॥
इन्द्रस्तेसो ॥ माऽ२ह्रूऽ२३४ता । स्याऽ२पेऽ२३४यात् । क्राऽ२त्वे ॥
दाऽ२३क्षा ॥ याऽ२वाइ । श्वेचोऽ२३४वा । दाऽ५इवोऽ६"हाइ ॥

दी. ५. उत्. ३. मा. ११. ब. ॥४६१॥

८. [1]आमहीयवम् ॥ अमहीयुः । गायत्री । पवमानस्सोमः ॥

पवमाऽ३नस्यजिघ्नताः ॥ हराइआऽ१न्द्राऽ२ः । असाऽ२३र्वता ॥
जीराअजाइ ॥ रक्षोऽ२३चिषाउ । वाऽ३ ॥ श्रीः ॥ पवमाऽ३नोरथीतमाः ॥
शुभ्राइभाऽ१इश्नूऽ२ । अशाऽ२३स्तमाः ॥ हरिश्चन्द्राः ॥ मरूऽ२३द्गणाउ ।
वाऽ३ ॥ श्रीः ॥ पवमाऽ३नवियश्नुहाइ ॥ रश्माइभाऽ१इर्वाऽ२ । जसाऽ२३-
तमाः ॥ दधत्स्तोत्राइ ॥ सुवाऽ२३इरियाउ । वाऽ३ ॥ स्तौषेऽ३४५ ॥

दी. ६. उत्. ६. मा. १९. को. ॥४६२॥

९. [2]पार्थम् ॥ पृथुः । त्रिष्टुप् । पवमानस्सोमः ॥

ओऽ३होऽ३होइ । साकमुक्षो । मर्जय । तस्वसाराः ॥ दशधीरा ।
स्याऽ२धीत । योधनुत्रीः ॥ हरि४पर्या । द्रवज्जाः । सूरियस्या ॥
द्रोणननना । क्षेऽ३अति । योऽ३४३ । नाऽ३वाऽ५"जाऽ६५६इ ॥ श्रीः ॥
संमातृभाइः । नशिशुः । वावशानाः ॥ वृषादधा । न्वेऽ३पुरु । वारोअ-
द्भाइः ॥ मर्योनयो । षाऽ३मभि । निष्कृतंयान् ॥ सञ्जच्छताइ । कलशे ।
ऊऽ३४३ । स्रोऽ३याऽ५"भाऽ६५६इः ॥श्रीः॥ उतप्रपाइ । प्याऽ३ऊधः ।
अघ्नियायाः ॥ इन्दुर्धारा । भीऽ३स्सच । तेसुमेधाः ॥ मूर्धानङ्गा । वा-
ऽ३४पय । साचमूषू ॥ ओऽ३होऽ३होइ । अभिश्रीणा । तीऽ२वसु ।
भाऽ३४३इः । नाऽ३नाऽ५इ"क्ताऽ६५६इः ॥

दी. १५. उत्. १६. मा. २८. पै. ॥४६३॥

[1] सप्तनवत्युत्तरशततमसूक्ते गीयते । [2] पञ्चत्रिंशोत्तरद्विशततमसूक्ते गीयते ।

२९७. विश्वकर्मा भौवनः । त्रिष्टुप् । विश्वकर्मा ॥

६३९. विश्वकर्मन्हविषा वावृधानस्वयं यजस्व तन्व३ँस्वा हि ते ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥१॥

धा. ९. उ. न. स्व. २. ला. ॥९॥

२९८. अनानतः पारुच्छेपिः । अत्यष्टिः । पवमानः सोमः ॥

६४०. अया रुचा हरिण्या पुनानो विश्वा द्वेषाँसि तरति
सयुग्वभिस्सूरो न सयुग्वभिः ।
धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।
विश्वा यद्रूपा परियास्यृक्वभिस्सप्तास्येभिर्ऋक्वभिः ॥१॥

६४१. प्राचीमनु प्रदिशं याति चेकितत्सँरश्मिभिर्यतते दर्शतो रथो दैव्यो
दर्शतो रथः । अग्मन्नुक्थानि पौँस्येन्द्रं जैत्राय हर्षयन् । वज्रश्च
यद्भवथो अनपच्युता समत्स्वनपच्युता ॥२॥

६४२. त्वँह त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य
धीतिभिर्दमे । परावतो न साम तद्यत्रा रणन्ति धीतयः । त्रिधातु-
भिररुषीभिर्वयो दधे रोचमानो वयो दधे ॥३॥

धा. ४१. उ. ५. स्व. ७ ङे. ॥१०॥

द्वितीयः खण्डः ॥

---

२९७. विश्वकर्मन् । विश्व । कर्मन् । हविषा । वावृधानः । स्वयम् । यजस्व । तन्वम् । स्वा । हि । ते । मुह्यन्तु । अन्ये । अन् । ये । अभितः । जनासः । इह । अस्माकम् । मघवा । सूरिः । अस्तु ॥

२९८. अया । रुचा । हरिण्या । पुनानः । विश्वा । द्वेषाँसि । तरति । सयुग्वभिः । स । युग्वभिः । सूरः । न । सयुग्वभिः । स । युग्वभिः । धारा । पृष्ठस्य । रोचते । पुनानः । अरुषः । हरिः । विश्वा । यत् । रूपा । परि- यासि । परि । यासि । ऋक्वभिः । सप्तास्येभिः । सप्त । आस्येभिः । ऋक्वभिः ॥

२९९. भरद्वाजो बार्हस्पत्यः। गायत्री। पूषा॥

९४३. उत नो गोषणिन्धियमश्वसां वाजसामुत। नृवत्कृणुह्यूतये॥१॥

धा. २. उ. न. स्व. न. यौ. ॥११॥

३००. गोतमो राहूगणः। गायत्री। मरुतः॥

९४४. शशमानस्य वा नरस्स्वेदस्य सत्यशवसः। विदा कामस्य वेनतः॥१॥

धा. ५. उ. न. स्व. १. व. ॥१२॥

३०१. ऋजिश्वा भारद्वाजः। गायत्री। विश्वेदेवाः॥

९४५. उप नस्सूनवो गिरश्शृण्वन्त्वमृतस्य ये। सुमृडीका भवन्तु नः॥१॥

धा. ३. उ. न. स्व. न. रौ. ॥१३॥

---

प्राचीम्। अनु। प्रदिशम्। प्र। दिशम्। याति। चेकितत्। सम्। रश्मिभिः। यतते। दर्शतः। रथः। दैव्यः। दर्शतः। रथः। अग्मन्। उक्थानि। पौंस्या। इन्द्रम्। जैत्राय। हर्षयन्। वज्रः। च। यत्। भवथः। अनपच्युता। अन्। अपच्युता। समत्सु। स। मत्सु। अनपच्युता। अन्। अपच्युता॥ त्वम्। ह। त्यत्। पणीनाम्। विदः। वसु। सम्। मातृभिः। मर्जयसि। स्वे। आ। दमे। ऋतस्य। धीतिभिः। दमे। परावतः। न। साम। तत्। यत्र। रणन्ति। धीतयः। त्रिधातुभिः। त्रि। धातुभिः। अरुषीभिः। वयः। दधे। रोचमानः। वयः। दधे॥

२९९. उत। नः। गोषणिम्। गो। सनिम्। धियम्। अश्वसाम्। अश्व। साम्। वाजसाम्। वाज। साम्। उत। नृवत्। कृणुहि। ऊतये॥

३००. शशमानस्य। वा। नरः। स्वेदस्य। सत्यशवसः। सत्य। शवसः। विदा। कामस्य। वेनतः॥

३०१. उप। नः। सूनवः। गिरः। शृण्वन्तु। अमृतस्य। अ। मृतस्य। ये। सुमृडीकाः। सु। मृडीकाः। भवन्तु। नः॥

३०२. वामदेवो गौतमः। गायत्री। द्यावापृथिवी॥

६४६. प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे। शुची उप प्रशस्तये ॥१॥

६४७. पुनाने तन्वा मिथस्स्वेन दक्षेण राजथः। ऊह्याथे सनादृतम् ॥२॥

६४८. मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम्। परि यज्ञन्नि षेदथुः ॥३॥

धा. ६. उ. १. स्व. २. का. ॥१४॥

३०३. शुनश्शेप आजीगर्तिः। गायत्री। इन्द्रः॥

६४९. अयमु ते समतसि कपोत इव गर्भधिम्। वचस्तच्चिन्न ओहसे ॥१॥

६५०. स्तोत्रꣳराधानां पते गिर्वाहो वीर यस्य ते। विभूतिरस्तु सूनृता ॥२॥

६५१, ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो। समन्येषु ब्रवावहै ॥३॥

धा. १६. उ. न. स्व. १. इ. ॥१५॥

३०४. हर्यतः प्रागाथः। गायत्री। अग्निः॥

६५२. गाव उप वदावटे मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ॥१॥

६५३. अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु। अवटस्य विसर्जने ॥२॥

---

३०२ प्र। वाम्। महि। द्यवी इति। अभि। उपस्तुतिम्। उप। स्तुतिम्। भरामहे। शुची इति। उप। प्रशस्तये। प्र। शस्तये॥ पुनाने इति। तन्वा। मिथः। स्वेन। दक्षेण। राजथः। ऊह्याथे इति। सनात्। ऋतम्॥ मही इति। मित्रस्य। मि। त्रस्य। साधथः। तरन्ती इति। पिप्रती इति। ऋतम्। परि। यज्ञम्। नि। सेदथुः॥

३०३. अयम्। उ। ते। सम्। अतसि। कपोतः। इव। गर्भधिम्। गर्भ। धिम्। वचः। तत्। चित्। नः। ओहसे॥ स्तोत्रम्। राधानाम्। पते। गिर्वाहः। वीर। यस्य। ते। विभूतिः। वि। भूतिः। अस्तु। सूनृता। सू। नृता। ऊर्ध्वः। तिष्ठ। नः। ऊतये। अस्मिन्। वाजे। शतक्रतो। शत। क्रतो। सम्। अन्येषु। अन्। येषु। ब्रवावहै॥

३०४. गावः। उप। वद। अवटे। मही इति। यज्ञस्य। रप्सुदा। रप्सु।

६५४. सिञ्चन्ति नमसावटमुच्चाचक्रं परिज्मानम् । नीचीनबारमक्षितम् ॥२॥

धा. ८. उ. न. स्व. २. रा. ॥१६॥

तृतीयः खण्डः ॥

३०५. देवातिथिः काण्वः । बृहतीसतोबृहत्यौ । इन्द्रः ॥

६५५. मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥१॥

६५६. सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
मध्वा संपृक्तास्सारघेण धेनवस्तूयमेहि द्रवा पिब ॥२॥

धा. १०. उ. न. स्व. ४. वी. ॥१७॥

३०६. मेध्यातिथिः काण्वः । बृहतीसतोबृहत्यौ । इन्द्रः ॥

६५७. इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाश्शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥१॥

---

दा । उभा । कर्णा । हिरण्यया ॥ अभ्यारम् । अभि । आरम् । इत् । अद्रयः । अ । द्रयः । निषिक्तम् । नि । सिक्तम् । पुष्करे । मधु । अवटस्य । विसर्जने । वि । सर्जने ॥ सिञ्चन्ति । नमसा । अवटम् । उच्चाचक्रम् । उच्चा । चक्रम् । परिज्मानम् । परि । ज्मानम् । नीचीनबारम् । नीचीन । बारम् । अक्षितम् । अ । क्षितम् ॥

३०५. मा । भेम । मा । श्रमिष्म । उग्रस्य । सख्ये । स । ख्ये । तव । महत् । ते । वृष्णः । अभिचक्ष्यम् । अभि । चक्ष्यम् । कृतम् । पश्येम । तुर्वशम् । यदुम् ॥ सव्याम् । अनु । स्फिग्यम् । वावसे । वृषा । न । दानः । अस्य । रोषति । मध्वा । संपृक्ताः । सम् । पृक्ताः । सारघेण । धेनवः । तूयम् । आ । इहि । द्रव । पिब ॥

३०६. इमाः । उ । त्वा । पुरूवसो । पुरु । वसो । गिरः । वर्धन्तु । याः । मम । पावकवर्णाः । पावक । वर्णाः । शुचयः । विपश्चितः । विपः । चितः । अभि । स्तोमैः । अनूषत ॥ अयम् । सहस्रम् । ऋषिभिः । सहस्कृतः ।

६५८. अयꣳसहस्रमृषिभिस्सहस्कृतस्समुद्र इव पप्रथे ।
सत्यस्सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥२॥

धा. १८. उ. न. स्व. ३. रि. ॥१८॥

३०७. वालखिल्यः। बृहतीसतोबृहत्यौ। इन्द्रः ॥

६५६. यस्यायं विश्वआर्यो दासश्शेवधिपा अरिः ।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥१॥

---

सहः । कृतः । समुद्रः । सम् । उद्रः । इव । पप्रथे । सत्यः । सः । अस्य । महिमा । गृणे । शवः । यज्ञेषु । विप्रराज्ये । विप्र । राज्ये ॥

३०७. यस्य । अयम् । विश्वः । आर्यः । दासः । शेवधिपाः । शेवधि ।

---

१०. श्यैतम् ॥ प्रजापतिः । बृहती । इन्द्रः ॥

इमाउत्त्वापुरू । वसाऽ३४औहोवा ॥ गाइरोवर्द्धे । तुयाममा-ऽ२३४ । ओऽ६हा । पावकवर्णाः । शूचाऽ२३याः । विपाऽ२ः । चाऽ२३४इताः ॥ अभिस्तोमाइराऽ३नू ॥ हुम्माइ । षाऽ२ताऽ२३४औहोवा ॥ श्रीः ॥ अभिस्तोमैरनू । षताऽ३४औहोवा ॥ आभिस्तोमैः । अनूषता-ऽ२३४ । ओऽ६हा । अयꣳसहस्रम् । आर्षाऽ२३इभाइः । सहाऽ२ः । काऽ२३४र्ताः ॥ समुद्राइवाऽ३पा ॥ हुम्माइ । प्राऽ२थाऽ२३४औहोवा ॥ श्रीः ॥ समुद्रइवप । प्रथाऽ३४औहोवा ॥ सामुद्रइ । वपाप्रथाऽ२३४इ । ओऽ६हा । सत्यस्सोअस्य । माहाऽ२३इमा । गृणाऽ२इ । शाऽ२३४वाः ॥ यज्ञेषुवाइप्राऽ३रा ॥ हुम्माइ । जाऽ२याऽ२३४औहोवा ॥ वाऽ२३४ऌ ॥

दी. २६. उत्. ६. मा. ३३. कि. ॥४६४॥

११. कालेयम् ॥ कलिः । बृहती । इन्द्रः ॥

यस्यायाऽ३म्विश्वाआर्याः ॥ दासाश्शेवा । धिपाअराऽ२३इः । तिर-श्चिदाऽ३ । येंऽ२३४ । रुशमेपवी । राऽ३वाइ ॥ तुभ्येत्सऔ । वाऽ३४३ओ-ऽ३४वा ॥ ज्यतेऽ५रयाइः ॥श्रीः॥ तुभ्येत्सोऽ३अज्यतेरयाइः ॥ तुभ्येत्सोआ ।

९६०. तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः ।
अस्मे रयिᳫपप्रथे वृष्ण्यᳫशवोऽस्मे स्वानास इन्दवः ॥२॥

धा. १४. उ. १. स्व. १. त. ॥१९॥

---

पाः । अरिः । तिरः । चित् । अर्ये । रुशमे । पवीरवि । तुभ्य । इत् । सः । अज्यते । रयिः ॥ तुरण्यवः । मधुमन्तम् । घृतश्चुतम् । घृत । श्चुतम् । विप्रासः । वि । प्रासः । अर्कम् । आनृचुः । अस्मे इति । रयिः । पप्रथे । वृष्ण्यम् । शवः । अस्मे इति । स्वानासः । इन्दवः ॥

---

ज्यतेरयाऽ२३इः । तुरण्यवोऽ३ । माऽ२३४ । धुमन्तङ्घृत । श्चूऽ३ताम् ॥ विप्रासऔ । वाऽ३४३ओऽ३४वा ॥ कमाऽ५नृचूः ॥ श्रीः ॥ विप्रासो-ऽ३अर्कमानृचूः ॥ विप्रासोआ । कमानृचूऽ२३ः । अस्मेरयाऽ३इः । पाऽ२३४ । प्रथेवृष्णियम् । शाऽ३वाः ॥ अस्मेस्वानौ । वाऽ३४३ओ-ऽ३४वा ॥ सआऽ५इन्दवाः । होऽ५इ ॥डा॥

दी. १८. उत् . ३. मा. ३३. डि. ॥४६५॥

१२. [1]सᳫहितम् ॥ संहितः । गायत्री । पवमानस्सोमः ॥

पवमानोअ । जाऽ२इजनात् ॥ दिवाऽ२ः । चाऽ२३इत्राम् । नताऽ२न्यातूम् ॥ ज्योऽ२३तीः ॥ वाऽ२इश्वा । नराऽ२३म् । हाउवाऽ३ ॥ बृऽ२३४हात् ॥श्रीः॥ पवमानर । साऽ२स्तवा ॥ मदोऽ२ । राऽ२३जान् । अदूऽ२च्छूनाः ॥ वाऽ२३इवा ॥ राऽ२मा । व्यमाऽ२३ । हाउवाऽ३ ॥ षाऽ२३४ती ॥श्रीः॥ पवमानस्य । ताऽ२इरसाः ॥ दक्षोऽ२ । वाऽ२३इरा । जताऽ२इद्यूमान् ॥ ज्योऽ२३तीः ॥ वाऽ२इश्वाम् । सुवाऽ२३ । हाउ-वाऽ३ ॥ दऽ२३४शे ॥

दी. ४. उत् . ३. मा. २५. दु. ॥४६६॥

१३. [2]सफम् ॥ देवाः । ककुप् । पवमानस्सोमः ॥

आसोताऽ३परि । षिश्चाऽ२३४ता ॥ अश्वन्नस्तोमाऽ२म् । अप्तु-

---

[1] पञ्चाशीतितमसूक्ते गीयते ।    [2] षड्विंशत्युत्तरद्विशततमसूक्ते गीयते ।

३०८. पर्वतनारदौ । उष्णिक् । पवमानः सोमः ॥

६६१. गोमन्न इन्दो अश्ववत्सुतस्सुदक्ष धनिव ।
शुचिञ्च वर्णमधि गोषु धारय ॥१॥

६६२. सनो हरीणां पत इन्दो देवप्सरस्तमः ।
सखेव सख्ये नर्यो रुचे भव ॥२॥

---

३०८. गोमत् । नः । इन्दो । अश्ववत् । सुतः । सुदक्ष । सु । दक्ष । धनिव । शुचिम् । च । वर्णम् । अधि । गोषु । धारय ॥ सः । नः । हरीणाम् ।

---

रा७राऽ३जाऽ३ । स्तूऽ३२३४राम् ॥ वना ॥ प्रक्षामूऽ३दाऽ३ । प्रूऽ३४५- तोऽ६"हाइ ॥ श्रीः ॥ वनग्राऽ३क्षमु । दस्रूऽ२३४ताम् ॥ सहस्रधाराऽ२म् । वृषभांपाऽ३योऽ३ । दूऽ३२३४हाम् ॥ प्रियाम् ॥ देवायाऽ३जाऽ३ । न्माऽ३४५नोऽ६"हाइ ॥ श्रीः ॥ प्रियन्देऽ३वाय । जन्माऽ२३४नाइ ॥ ऋतेनयाआऽ२ । तजातोऽ३वाऽ३इ । वाऽ३२३४धाइ । ऋतेनयाआऽ२ । तजातोवाऽ३इवाऽ३ । वाऽ३२३४द्धाइ । ऋतेनयाआऽ२ । तजातोऽ३- वाऽ३इ । वाऽ३२३४द्धाइ ॥ राजा ॥ देवाआऽ३र्ताऽ३म् । बृऽ३४५- होऽ६"हाइ ॥

दी. १०. उत्. १५. मा. २१. म. ॥४६७॥

१४. श्रुध्यम् ॥ प्रजापतिः । उष्णिक् । पवमानस्सोमः ॥

गोमन्नाऽ२इन्दो । अश्ववोवा ॥ सुतस्सुदा । क्षधनिवा । शुचिञ्च- वर्णमधिगोषु । धाऽ२३ । रयाउवा । श्रुधियाऽ२ ॥ श्रीः ॥ सनोहराऽ२- इणाम् । पतोवा ॥ इन्दोदेवा । प्सरस्तमाः । सखेवसख्येनरियोरु । चाऽ२३इ । भवाउवा ॥ श्रूधियाऽ२ ॥श्रीः॥ सनेमितूऽ२वम् । अस्मदोवा ॥ आदेवङ्काम् । चिदत्रिणाम् । साहा७इन्दोपरिबाधोअ । पाऽ२३ । द्वया-

९६३. सनेमि त्वमस्मदा अदेवं कश्चिदत्रिणम् ।
साह्वाँ इन्दो परि बाधो अप द्वयुम् ॥३॥
धा. ९. उ. न. स्व. १. ल. ॥२०॥

---

पते । इन्दो । देवप्सरस्तमः । देव । प्सरस्तमः । सखा । स । खा । इव । सख्ये ।
स । ख्ये । नर्यः । रुचे । भव ॥ सनेमि । त्वम् । अस्मत् । आ । अदेवम् । अ ।
देवम् । कम् । चित् । अत्रिणम् । साह्वान् । इन्दो । परि । बाधः । अप । द्वयुम् ॥

---

उवा । श्रुधियाऽ२ ॥ एऽ२३हियाऽ३४३ । ओऽ२३४५इ ॥ डा ॥
दी. २१. उत्. ७. मा. १४. खी. ॥४६८॥

१५. [1]श्यावाश्वम् ॥ श्यावाश्वः । अनुष्टुप् । पवमानस्सोमः ॥

अभाऽ३१इ । नोऽ३वा । जसा । ताऽ३मम् । एहिया ॥ रा ।
यिमर्षशा । त । स्पृहाऽ२म् । एहियाऽ२ । इन्दोसहास्राऽ३भाऽ३ ॥
खाऽ२३४साम् ॥ ऐहाऽ२इ । एहियाऽ२ । तुविद्युम्नांवाऽ३इभाऽ३ ।
साऽ३४५होऽ६"हाइ ॥ श्रीः ॥ वयाऽ३१म् । तेऽ३अ । स्यरा । घाऽ३सः ।
एहिया ॥ वा । सोवसोपू । रु । स्पृहाऽ२ः । एहियाऽ२ । निनेदिष्ठाता-
ऽ३माऽ३ः ॥ आऽ२३४इषाः ॥ ऐहाऽ२इ । एहियाऽ२ । स्यामसुम्नाइते-
ऽ३आऽ३ । ध्राऽ३४५इगोऽ६"हाइ ॥ श्रीः ॥ पराऽ३१इ । स्याऽ३स्वा ।
नोअ । क्षाऽ३रत् । एहिया ॥ आइ । दुरव्येमा । द । च्युताऽ२ः ।
एहियाऽ२ । धारायऊर्ध्वोऽ३आऽ३ ॥ ध्वाऽ२३४राइ ॥ ऐहाऽ२इ । एहि-
याऽ२ । आजानयाताऽ३इगाऽ३ । व्याऽ३४५योऽ६"हाइ ॥
दी. २४. उत्. ९ मा. ३०. धौ. ॥४६९॥

१६. आन्धीगवम् ॥ अन्धीगुः । अनुष्टुप् । पवमानस्सोमः ॥

अभीनोवाजसाऽ१तामाम् ॥ रयिम । षशाऽ२३ता । हुम्माऽ२१२ ।
स्पृहमिन्दोसहस्रभर्णसाऽ२३४५म् ॥ तूवाऽ३उवा ॥ द्युऽ२म्नाम् । वाऽ२३-

---

[1] द्वे सामनी द्व्यशीत्युत्तरशततमसूक्ते गीयेते ।

३०९. अत्रिर्भौमः। जगती। पवमानः सोमः ॥

९६४. अञ्जते व्यञ्जते समञ्जते क्रतुꣳरिहन्ति मध्वाभ्यञ्जते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणꣳहिरण्यपावाःपशुमप्सु गृभ्णते ॥१॥

९६५. विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति ।
अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीडन्नसरद्वृषा हरिः ॥२॥

---

३०९. अञ्जते। वि। अञ्जते। सम्। अञ्जते। क्रतुम्। रिहन्ति। मध्वा।
अभि। अञ्जते। सिन्धोः। उच्छ्वासे। उत्। श्वासे। पतयन्तम्। उक्षणम्।
हिरण्यपावाः। हिरण्य। पावाः। पशुम्। अप्सु। गृभ्णते ॥ विपश्चिते। विपः।
चिते। पवमानाय। गायत। मही। न। धारा। अति। अन्धः। अर्षति।
अहिः। न। जूर्णिम्। अति। सर्पति। त्वचम्। अत्यः। न। क्रीडन्। असरत्।

---

इभा। सहाम्। औऽ२३होवा ॥श्रीः॥ वयन्तेअस्यराऽ१धासाः ॥ वसोर्व।
सोपूऽ२३रू। हुम्माऽ२१२। स्पृहोनिनेदिष्ठतमाइषाऽ१ः ॥ स्यामाऽ३-
उवा ॥ सूऽ२म्नाइ। तेऽ२३आ। धिगा। औऽ३होवा ॥श्रीः॥ परिस्य-
स्वानोआऽ१क्षारात् ॥ इन्दुर। व्येमाऽ२३दा। हुम्माऽ२१२। च्युतो-
धारायऊर्ध्वोअध्वराऽ१इ ॥ आजाऽ३उवा ॥ नाऽ२या। ताऽ२३इगा।
व्ययूः। औऽ२३होवा। होऽ५इ ॥डा॥ दी. १८. उत्. ६. मा. २२. टा. ॥४७०॥

१७. कावम् ॥ कविः। जगती। पवमानस्सोमः ॥

अञ्जोवा ॥ ताइवियञ्जताइ। समञ्जाताऽ२इ। क्रतुꣳरिहन्तिमधुवा।
भियञ्जाताऽ२इ। सिन्धोरुच्छ्वासेपतया। तमुक्षाणाऽ२३म् ॥ हाइरा-
ऽ३ण्यापा। वाःपशूमाऽ२३। प्सूगाऽ३भ्णाऽ५ताऽ६५६इ ॥ श्रीः ॥
विपोवा ॥ चितेपवमाना। यगायाताऽ२। महीनधाराअतिया। धोअर्षा-
ताऽ२इ ॥ अहिर्नजूर्णामतिसा। पतित्वाचाऽ२३म् ॥ आत्योऽ३नाक्री।

९६६. अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
हरिर्घृतस्नुस्सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥३॥
धा. ३९. उ. न. स्व. ७. ले. ॥२१॥

चतुर्थः खण्डः ॥
इति षोडशोऽध्यायः ॥
सप्तमप्रपाठकस्य तृतीयोऽर्धः ॥
सप्तमः प्रपाठकः ॥

---

वृषा । हरिः ॥ अग्रेगः । अग्रे । गः । राजा । अप्यः । तविष्यते । विमानः ।
वि । मानः । अह्नाम् । अ । ह्नाम् । भुवनेषु । अर्पितः । हरिः । घृतस्नुः । घृत ।
स्नुः । सुदृशीकः । सु । दृशीकः । अर्णवः । ज्योतीरथः । ज्योतिः । रथः । पवते ।
राये । ओक्यः ॥

---

उन्नसाराऽ२३त् । वार्षीऽ३हाऽ५"राऽ६५६इः ॥ श्रीः ॥ अग्रोवा ॥ गोराजा-
अपियाः । तविष्याताऽ२इ । विमानोअह्नांभुवनाइ । षुवर्पाइताऽ२ः ॥
हरिर्घृतस्नुस्सुदृशाइ । कोअर्णावाऽ२३ः ॥ ज्योतीऽ३राथाः । पवताइ-
राऽ२३ । याओऽ३काऽ५"याऽ६५६ः ॥ दी.२०. उत्. १५. मा.२८. मै. ॥४७१॥

१८. [1]आष्टादंष्ट्रोत्तरम् ॥ अष्टादंष्ट्रः । बृहती । पवमानस्सोमः ॥

परीतोषिञ्चतासुतमैयादौ । होऽ३वा ॥ सोमोयउत्तमम् । हावा-
ऽ२३इः । ऐयाऽ२३त् । औऽ२३होवा ॥ दधन्वांयोनर्योअप्सुव ।
ताराऽ२३ । ऐयाऽ२३त् । औऽ२३होवा ॥ सुषावसोमम । द्राइभाऽ२३इः ॥
ऐयाऽ२३त् । औऽ२३होवाऽ३४३ ॥ श्रीः ॥ सुषावसोमममद्रिभिरैयादौ ।
होऽ३वा ॥ सुषावसोमम । द्राइभाऽ२३इः । ऐयाऽ२३त् । औऽ२३होवा ॥
नूनंपुनानोविभिःपरि । स्रावाऽ२३ । ऐयाऽ२३त् । औऽ२३होवा ॥
अदब्धस्सुरभि । ताराऽ२३ः । ऐयाऽ२३त् । औऽ२३होवाऽ३४३ ॥श्रीः॥

---

[1] अष्टनवत्युत्तरशततमसूक्ते गीयते ।

अदब्धस्सुरभिन्तरऐयादौ । होऽ३वा ॥ अदब्धस्सुरभि । ताराऽ२३ः ।
ऐयाऽ२३त् । औऽ२३होवा ॥ सुतेचित्वाप्सुमदामोअ । घासाऽ२३ ।
ऐयाऽ२३त् । औऽ२३होवा ॥ श्रीणन्तोगोभिरु । ताराऽ२३म् । ऐया-
ऽ२३त् । औऽ२३होवाऽ३४३ । ओऽ२३४५इ ।।डा।।

दी. ५१. उत्. ७. मा. २६. खू. ।।४७२।।

१९. [1]कण्वरथन्तरम् ॥ कण्वः । बृहती । इन्द्रः ॥

आभित्वाशूरनोनुमाः ॥ अदुग्धाआइ । वाऽ३धाइनाऽ३वाः ।
ईशानमस्यजगतस्सुवर्दशाऽ२३४मैही ॥ ईशानाऽ२३४मीं ॥ द्रस्थूऽ३आ
उवाऽ२३ ॥ एऽ३ । स्थुषआ ॥ श्रीः ॥ आइशानमिन्द्रसुस्थुषाः ॥ ईशान-
माइ । द्राऽ३स्थूस्थूऽ३षाः । नत्वावा॰अन्योदिवियोनपार्थिवाऽ२३४ऐही ॥
नजातोऽ२३४ना ॥ जनाऽ३१उवाऽ२३ ॥ एऽ३ । ष्यतआ ॥ श्रीः ॥
नाजातोनजनिष्यताइ ॥ नजातोना । जाऽ३नाइष्याऽ३ताइ । अश्वायन्तो-
मघवन्निन्द्रवाजिनाऽ२३४ऐही ॥ गव्यन्ताऽ२३४स्त्वा ॥ हवाऽ३१उवा-
ऽ२३ ॥ एऽ३ । महआ ॥

दी. ३०. उत्. ९. मा. २२. भा. ।।४७३।।

२०. [2]सदोविशीयम् ॥ प्रजापतिः । बृहती । इन्द्रः ॥

आनोविश्वासुहव्यमोहाओहाऽ३ए । औहोऔहोऽ३वा ॥ इन्द्र-
॰समत्सुभूषत । ओऽ३हा । उपन्नह्माणिसवनानिवृत्रहन् । ओऽ३हा ॥
परामाऽ१ज्याऽ२ः । ओऽ२हा । ओऽ३हाऽ३ए । औऽ३होइ । औऽ३-
होऽ३वा ॥ ऋची । षाऽ२माऽ२३४औहोवा ॥ श्रीः ॥ परमज्याऋचीषम-
ओहाओहाऽ३ए । औहोऔहोऽ३वा ॥ परमज्याऋचीषम । ओऽ३हा ।
त्वन्दाताप्रथमोराधसास्सि । ओऽ३हा ॥ असाइसाऽ१त्याऽ२ः । ओऽ३हा ।
ओऽ३हाऽ३ए । औऽ३होइ । औऽ३होऽ३वा ॥ ईशा । नाऽ२काऽ२३४-

---

[1] एकादशसूक्ते गीयते ।

[2] षष्ट्यधिकद्विशततमसूक्ते गीयते ।

औहोवा ॥ श्रीः ॥ असिसत्यईशानकृदोहाओहाऽ३ए । औहोऔहोऽ३वा ॥ असिसत्यईशानकृत् । ओऽ३हा । तुविद्युम्नस्ययुज्यावृणीमहे । ओऽ३हा ॥ पुत्रास्याऽ१शाऽ२ । ओऽ३हा । ओऽ३हाऽ३ए । औऽ३होइ । औऽ३हो-ऽ३वा ॥ वसः । माऽ२हाऽ२३४औहोवा ॥ सदोविशाऽ२३४५ः ॥

दी. ५०. उत्. ६. मा. ३०. पौ. ॥४७४॥

पञ्चमो विंशः ॥
द्वादशस्यार्द्धः प्रपाठकः ॥

१. [1]श्यावाश्वम् ॥ श्यावाश्वः । अनुष्टुप् । पवमानस्सोमः ॥

पराऽ३१इ । त्याऽ३ ह । यंतम् । हाऽ३रिम् । एहिया ॥ बा । भ्रुंपुनन्ताइ । वा । रेणाऽ२ । एहियाऽ२ । योदेवान्वाइश्व ऽ३आऽ३इत् ॥ पाऽ२३४राइ ॥ ऐहाऽ२इ । एहियाऽ२ । मदेनसाहाऽ३गाऽ३ । छा-ऽ३४५तोऽ६"हाइ ॥श्रीः॥ द्वियाऽ३१म् । पाऽ३श्व । स्वय । शाऽ३सम् । एहिया ॥ सा । खायोअद्राइ । स । हताऽ२म् । एहियाऽ२ । प्रिय-मिन्द्रास्याऽ३काऽ३ ॥ माऽ२३४याम् ॥ ऐहाऽ२इ । एहियाऽ२ । प्रस्ना-पयान्ताऽ३ऊऽ३ । माऽ३४५योऽ६"हाइ ॥श्रीः॥ इन्द्राऽ३१ । याऽ३सो । मपा । ताऽ३वे । एहिया ॥ वा । अघ्नेपराइ । षि । च्यसाऽ२इ । एहियाऽ२ । नरेचदाक्षाऽ३इणाऽ३ ॥ वाऽ२३४ताइ ॥ ऐहाऽ२इ । एहियाऽ२ । वीरायसादाऽ३नाऽ३ ॥ साऽ३४५दोऽ६"हाइ ॥

दी. २५. उत्. ६. मा. २६. भू. ॥७७५॥

२. आन्धीगवम् ॥ अन्धीगुः ॥ अनुष्टुप् । पवमानस्सोमः ॥

परित्य हर्यताऽ१ हाराइम् ॥ बभ्रुंपु । नन्ताऽ२३इवा । हुम्मा-ऽ२१२ । रेणयोदेवान्विश्वा इत्पराऽ२३४५इ ॥ मादाऽ३उवा ॥ नाऽ२सा । हाऽ२३गा । छता । औऽ३होवा ॥ श्रीः ॥ द्वियंपञ्चस्वयाऽ१शासाम् ॥

---

[1] चतुरधिकद्विशततमसूक्ते सामनी गीयेते ।

सखायः । अद्राऽ२३इसा । हुम्माऽ२१२ । हतंप्रियमिन्द्रस्यकामिया-ऽ२३४५म् ॥ प्रास्नाऽ३उवा ॥ पाऽ२या । ताऽ२३ऊ । मया । औ-ऽ३होवा ॥ श्रीः ॥ इन्द्रायसोमपाऽ१तावाइ ॥ वृत्रघ्ने । पराऽ२३इषा । हुम्माऽ२१२ । च्यसेनरेचदक्षिणावताऽ२३४५इ ॥ वाइराऽ३उवा ॥ या-ऽ२सा । दाऽ२३ना । सदा । औऽ३होवा । ह्रोऽ५इ ॥डा॥

दी. १३. उ. ६. मा. १८. टै. ॥४७६॥

३. [1]कावम् ॥ कविः । जगती । पवमानस्सोमः ॥

पवोवा ॥ त्रन्तेविततंब्रा । ह्मणस्पाताऽ२इ । प्रभुर्गात्राणिपरियाइ । षिविश्वाताऽ२ः ॥ अतप्ततनूर्नतदा । मोअश्नुताऽ२३इ ॥ शार्ताऽ३साईत् । वहन्तास्साऽ२३म् । तादाऽ३शाऽ५"ताऽ६५६ ॥ श्रीः ॥ तपोवा ॥ पवित्रं-विततम् । दिवस्पादाऽ२इ । अर्चन्तोअस्यतन्तवो । वियस्थाइराऽ२न् ॥ अवन्त्यस्यपविता । रमाशावाऽ२३ः ॥ दाइवाऽ३ ४पार्ष्ठम् । अधिरोहाऽ२३ । ताइताऽ३इजाऽ५''साऽ६५६ ॥ श्रीः ॥ अरोवा ॥ रुचदुषस ४पा । श्निरग्रा-याऽ२ः । उक्षामिमेतिभुवनाइ । षुवाजायूऽ२ः ॥ मायाविनोभमिरेआ । स्यमायायाऽ२३ ॥ नार्चाऽ३क्षासाः । पितरोगाऽ२३ । भामाऽ३-दाऽ५''धूऽ६५६ः ॥

दी. १५. उत्. १५. मा. २४. मी. ॥४७७॥

४. [2]दक्षणिधनमौक्ष्णम् ॥ भरद्वाजः । गायत्री । पवमानस्सोमः ॥

स्वादिष्ठयामदिष्ठया । औहोवा ॥ इहश्रुधाइ । पवस्वाऽ२३सो । मधारया ॥ इन्द्रायाऽ२३पाऽ३ । होवाऽ३हा ॥ तवेसूऽ२३४५ताऽ६५६ः ॥ श्रीः ॥ रक्षोहाविश्वचर्षणिः । औहोवा ॥ इहश्रुधाइ । अभियोऽ२३नीम् । अयोहताइ ॥ द्रोणेसाऽ२३धाऽ३ । होवाऽ३हा ॥ स्थमासाऽ२३४५दा-ऽ६५६त् ॥श्रीः॥ वरिवोधातमोभुवः । औहोवा ॥ इहश्रुधाइ । मᳫहिष्ठो-

[1] अशीतितमसूक्ते गीयते । [2] पञ्चदशसूक्ते गीयते ।

प्रसोमासोवा ॥ वाइपश्चिताः । अपोनाऽ२३या । तऊर्मायाः ॥
वनानाऽ१इमाऽ२३"हाइ । षाः । इवोऽ३४५इ ॥डा॥श्रीः॥ अभिद्रोणोवा ॥
नाइबभ्रवाः । शुक्राआऽ२३र्ता । स्यधाराया ॥ वाजाङ्गोऽ१माऽ२३"न्ताम् ।
अ । क्षरोऽ३४५इ ॥डा॥श्रीः॥ सुताइन्द्रोवा ॥ यावायवाइ । वरूणाऽ२३-
या ॥ मरुद्भ्यायाः । सोमाआऽ१र्षाऽ२३"न्तू । वि । ष्णवोऽ३४५इ ॥डा॥
दी. १०. उत्. ९. मा. १८. भै. ॥५४४॥

१३. सोमसाम ॥ सोमः । गायत्री । पवामानस्सोमः ॥

प्रसोमासाः ॥ विपाश्चिताः । आपोनायाऽ३न्ताऽ३इ । ऊर्मयाः ॥

---

[1] सप्तदशे सूक्ते गीयते ।

[2] द्विचत्वारिंशत्तमसूक्ते त्रीणि सामानि गीयन्ते ।

वानानाइमाऽ३४ । हाउ ॥ हिषाऽ५इवा ॥श्रीः॥ अभाइद्रोणा ॥ निवाश्रवाः ।
शुक्राआर्ताऽ३स्याऽ३ । धारया ॥ वाजाङ्गोमाऽ३४ । हाउ ॥ तमाऽ५-
क्षरान् ॥श्रीः॥ सुताइन्द्रा ॥ यवायवाइ । वारूणायाऽ३माऽ३ । रुद्भियाः ॥
सोमाआर्षाऽ३४ । हाउ ॥ तुवाऽ५इष्णवाइ । हौऽ५इ ॥डा॥

दी. ४. उत्. न. मा. २०. लौ. ॥५४५॥

१४. रोहितकूलीयम् ॥ इन्द्रः । गायत्री । पवमानस्सोमः ॥

प्रसोमासोविपाः ॥ चिताऽ२ः । अपोनयन्तऊर्माऽ२३याः ॥
वानाऽ२नाइमाऽ२३ ॥ द्विषोऽ२३४वा । आऽ५इवोऽ६"हाइ ॥ श्रीः ॥
अभिद्रोणानिवा ॥ श्रवाऽ२ः । शुक्राऋतस्यधाराऽ२३या ॥ वाजाऽ२-
ङ्गोमाऽ२३ ॥ तमोऽ२३४वा । क्षाऽ५रोऽ६"हाइ ॥श्रीः॥ सुताइन्द्रायवा ॥
यवाऽ२इ । वरुणायमरुद्भ्याऽ२३याः ॥ सोमाऽ२आर्षाऽ२३ ॥ तुवो-
ऽ२३४वा । ष्णाऽ५वोऽ६"हाइ ॥ दी. १२. उत्. ८. मा. १५. जु. ॥५४६॥

१५. आहारान्तं यौधाजयम् ॥ युधाजित् । बृहती । पवमानस्सोमः ॥

प्रसोऽ३१ । माऽ३दे । व । वाइताऽ२३४याइ ॥ साइन्धूऽ३ः ।
नपाऽ२इ । प्येअर्णाऽ३४५ । साऽ२३४५ । अ॰शो×पया । सा । मदि-
रोऽ२ । नजागृऽ३४५ । वीऽ२३४५ः ॥ अच्छाऽ२ ॥ कोशाऽ२म् ।
मधुश्चूऽ३४५ ॥ ताऽ२३४५म् ॥ श्रीः ॥ अच्छाऽ३१ । कोऽ३शम् ।
म । धूश्चूऽ२३४ताम् ॥ आच्छाऽ३ । कोशाऽ२म् । मधुश्चूऽ३४५ । ता-
ऽ२३४५म् । आहार्यतो । अ । जुनोआऽ२ । त्केअव्याऽ३४५ ।
ताऽ२३४५ ॥ प्रियाऽ२ः ॥ सूनूऽ२ः । नमर्जाऽ३४५ । याऽ२३४५ः ॥
श्रीः ॥ प्रियाऽ३१ः । सूऽ३नुः । न । मार्जाऽ२३४याः ॥ प्रायाऽ३ः ।
सूनूऽ२ः । नमर्जाऽ३४५ । याऽ२३४५ः । तमाइ॰हिन्वा । ति । अप-

[1] त्रिचत्वारिंशत्तमसूक्ते गीयते ।

सोऽ२ । यथाराऽ३४५ । थाऽ२३४५म् ॥ नदाऽ२इ ॥ षूवाऽ२ ।
गभस्ताऽ३४५ । योऽ२३४५ः ॥ दी.९. उत्. ६. मा. २८. तै. ॥५४७॥

१६. [1]स्वारं सौपर्णम् ॥ सुपर्णः । गायत्री । इन्द्रः ॥

उदुघेदभिश्रुतामाऽ३घाम् ॥ वृषभन्नर्या । हुम् । पाऽ२३४साम् ॥
आस्ताऽ३उवा ॥ रामाइ । षिसूऽ२३४वा । राऽ५योऽ६"हाइ ॥ श्रीः ॥
नवयोनवतिंपूऽ३राः ॥ विभेदबाहुवो । हुम् । जाऽ२३४सा ॥ आहा-
ऽ३उवा ॥ चन्नृ । त्रहोऽ२३४वा । वाऽ५घोऽ६''हाइ ॥श्रीः॥ सनइन्द्रश्शि-
वस्साऽ३खा ॥ अश्वावद्गोमद्या । हुम् । वाऽ२३४मात् ॥ ऊराऽ३उवा ॥
धारे । वदोऽ२३४वा । हाऽ५तोऽ६''हाइ ॥

दी. १३. उत्. ६. मा. १५. टु. ॥५४८॥

१७. [2]आक्षारम् ॥ प्रजापतिः । उष्णिक् । पवमानस्सोमः ॥

इन्द्रम् । अच्छाऽ३४ । औहोऽ५सुताइमाइ ॥ वृषणंयन्तुहरा-
ऽ२३याऽ३४ः ॥ श्रुष्टाऽ३४इजाता ॥ सइन्दवाः । सूऽ३वर्विं ॥ दा-
२३४५ः ॥ श्रीः ॥ अयम् । भराऽ३४ । औहोऽ५यसानसाइः ॥ इन्द्राय-
पवतेसूऽ२३ताऽ३४ः ॥ सोमोऽ३४जैत्रा ॥ स्यचेतताइ । याऽ३थावि ॥ दा-
ऽ२३४५इ ॥ श्रीः ॥ अस्येत् । इन्द्रोऽ३४ । औहोऽ५मदेषुवा ॥ ग्राभं-
गृभ्णातिसानाऽ२३साऽ३४इम् ॥ वज्राऽ३४श्चवा ॥ षणंभरात् । साऽ३-
मप्सु ॥ जीऽ२३४५त् ॥ दी. १७. उत्. ३. मा. १९. जो. ॥५४९॥

१८. [3]वैखानसम् ॥ वैखानसाः । जगती । पवमानस्सोमः ॥

अभिप्रीऽ३याणिपवताइ ॥ चनोहिताः । नामानियाऽ२३ ।
ह्वोअधियाइ । षुवार्द्धताइ । आसूरिया । स्यबृऽ२हतोऽऽ२३ । बृहन्नधाइ ॥

---

[1] चतुश्चत्वारिंशदुत्तरद्विशततमसूक्ते गीयते ।

[2] सप्तदशेसूक्ते गीयते ।

[3] एकोनविंशतितमसूक्ते गीयते ।

रथाविष्वा । चमरुहाऽ२३त् ॥ विचक्षणाऽ३४३ः ॥श्रीः॥ ऋतस्याऽ३जिह्वा-
पवताइ ॥ मधूप्रियाम् । वक्तापताऽ२३इः । धियोऽस्याः । अदाभियाः ।
दधातिपूत् । त्रऽपाऽ२इत्रोऽ२३ः । अपीचियाम् ॥ नामातृताइ । यम-
धिरोऽ२३ ॥ चनन्दिवाऽ३४३ः ॥ श्रीः ॥ अवद्यू३तान२कलशान् ॥
अचाइक्रदात् । नृभिर्येमाऽ२३ । ण२कोशआ । हिराण्ययाइ । अभीऋता ।
स्यदोऽ२हनाऽ२३ः । अनूषता ॥ अधाइत्रिपा । ष्ठउषसोऽ२३ ॥ विराज-
साऽ३४३इ । ओऽ२३४५इ ॥डा॥ दी. १८. उत्. ९. मा. ३२. ढा. ॥५५०॥

१९. [1]आशुभार्गवम् ॥ भृगुः । गायत्री । पवमानस्सोमः ॥

अस्यप्रत्नाम । नुद्युऽ३ताम् ॥ शूक्रंदुदुऽ३ । हेआऽ२हाऽ२३४याः ॥
पयास्साऽ१हाऽ२ ॥ स्रसाऽ३म् । आऽ२३४र्षोऽ६"हाइ ॥श्रीः॥ अय७सूर्यः ।
इवोपाऽ३दृक् ॥ आय७सराऽ३ । साइधाऽ२वाऽ२३४ताइ ॥ सप्ताप्रा-
ऽ१वाऽ२ ॥ तआऽ३ । दाऽ२३४इवोऽ६"हाइ ॥ श्रीः ॥ अयंविश्वानि ।
तिष्ठाऽ३ताइ ॥ पूनानोभूऽ३ । वानोऽ२पाऽ२३४राइ ॥ सोमोदाऽ१-
इवाऽ२ः ॥ नस्पऽ३ । राऽ२३४योऽ६"हाइ ॥
दी. ७. उत्. ३. मा. १७. जै. ॥५५१॥

२०. मार्गीयवम् ॥ मृगयुः । गायत्री । पवमानस्सोमः ॥

अस्यौहोवा ॥ प्रत्नाऽ२म् । अनूद्यू२३४ताम् । शुक्रंदुदु । हेआ-
हाऽ१याऽ२ः ॥ पयः । हा । औऽ३होइ । साऽ२३४हा ॥ स्राऽ२साऽ२३४-
औहोवा ॥ एऽ३ । ऋषाऽ२३४५इम् ॥ श्रीः ॥ अयौहोवा ॥ सूर्याऽ२ः ।
इवोपाऽ२३४दृक् । अय७सरा । सिधावाऽ१ताऽ२इ ॥ सप्त । हा ।
औऽ३होइ । प्राऽ२३४वा ॥ ताऽ२आऽ२३४औहोवा ॥ एऽ३ । दिवा-
ऽ२३४५म् ॥ श्रीः ॥ अयौहोवा ॥ वाइश्वाऽ२ । निताइष्ठाऽ२३४ताइ ।

[1] एकोनचत्वारिंशत्तमसूक्ते षट् सामानि गीयन्ते ।

५३

पुनानोभु । वनोपाऽ१राऽ२इ ॥ सोमः । हा । औऽ३होइ । दाऽ२३४-
इवाः ॥ नाऽ२सूऽ२३४औहोवा ॥ एऽ३ । रियाऽ२३४५ः ॥

दी. १४. उ. ८. मा. २६. दू. ॥५५२॥

प्रथमो विंशः ॥

चतुर्दशस्यार्द्धः प्रपाठकः ॥

१. सौमित्रम् ॥ सुमित्रः । गायत्री । पवमानस्सोमः ॥

अस्यप्रत्नामनुद्युताऽ३मे ॥ शुक्रंदुदुहे । आऽ२१२३ । ह्रया-
ऽ३४३ः ॥ पाऽ२३याः ॥ सहाऽ२ओऽ२३ । स्रसोवा । आऽ५र्षोऽ६"हाइ ॥
श्रीः ॥ अयꣳसूर्यइवोपदृऽ३गे ॥ अयꣳसराꣳसि । धाऽ२१२३ । वता-
ऽ३४३इ ॥ साऽ२३स्ता ॥ प्रवाऽ२ओऽ२३ । तओवा । दाऽ५इवोऽ६"हाइ ॥
श्रीः ॥ अयंविश्वानितिष्ठताऽ३ए ॥ पुनानोभुव । नोऽ२१२३ । परा-
३४३इ ॥ सोऽ२३माः ॥ देवाऽ२ओऽ२३ । नसोवा । राऽ५योऽ६"हाइ ॥

दी. ९. उत्. ५. मा. १५. नु. ॥५५३॥

२. ऐटतम् ॥ इटन्वा । गायत्री । पवमानस्सोमः ॥

अस्य । एआस्या ॥ प्रत्नाम । नूऽ३ । आऽ२नूऽ२३४औहोवा ।
द्यूऽ२३४ताम् ॥ शुक्रांदूऽ२३४दू ॥ हेआऽ३ । हेऽ२आऽ२३४औहोवा ।
ह्राऽ२३४याः ॥ पयास्साऽ२३४हा ॥ स्रसाऽ३ । स्राऽ२साऽ२३४-
औहोवा ॥ आऽ२३४र्षीम् ॥श्रीः॥ अयम् । एआयाम् । सूर्यइ । वाऽ३ ।
आऽ२इवाऽ२३४औहोवा । पाऽ२३४दृक् ॥ अयाꣳसाऽ२३४रा ॥ सिधा-
ऽ३ । साऽ२इधाऽ२३४औहोवा । वाऽ२३४ती ॥ सप्ताप्राऽ२३४वा ॥
तआऽ३ । ताऽ२आऽ२३४औहोवा ॥ दीऽ२३४वाम् ॥ श्रीः ॥ अयम् ।
एआयाम् ॥ विश्वानि । ताऽ३इ । नाऽ२इताऽ२३४औहोवा । ष्ठाऽ२३४ती ॥
पुनानोऽ२३४भू ॥ वनोऽ३ । वाऽ२नोऽ२३४औहोवा । पाऽ२३४री ॥

सोमोदाऽ२३४इवाः ॥ नसूऽ३ । नाऽ२सूऽ२३४औहोवा ॥ रीऽ२३४याः ॥

दी. २३. उत्. न. मा. ३३. रि. ॥५५४॥

३. धुरासाकमश्वम् ॥ साकमश्वः । गायत्री । पवमानस्सोमः ॥

अस्यप्रत्नाऽ३म् । हौऽ३होऽ३१इ ॥ अनुद्युताऽ३म् । हौऽ३हो-
ऽ३१इ ॥ शुक्रंदुदूऽ३ । हौऽ३होऽ३१ ॥ हेअह्याऽ३ः । हौऽ३हो-
ऽ३१इ ॥ पयस्सहाऽ३ । हौऽ३होऽ३१ ॥ स्सामृषाऽ३इम् । हौऽ३हो-
ऽ३१२३४५इ ॥डा॥ श्रीः ॥ अयꣳसूर्याऽ३ः । हौऽ३होऽ३१इ ॥ इवोपद्-
ऽ३क् । हौऽ३होऽ३१इ ॥ अयꣳसराऽ३ । हौऽ३होऽ३१ । सिधाव-
ताऽ३इ । हौऽ३होऽ३१इ ॥ सप्तप्रवाऽ३ । हौऽ३होऽ३१ ॥ तआदिवा-
ऽ३म् । हौऽ३होऽ३१२३४५इ ॥ डा ॥ श्रीः ॥ अयंविश्वाऽ३ । हौऽ३हो-
ऽ३१ ॥ नितिष्ठताऽ३इ । हौऽ३होऽ३१इ ॥ पुनानोभूऽ३ । हौऽ३-
होऽ३१ ॥ वनोपराऽ३इ । हौऽ३होऽ३१इ ॥ सोमोदेवाऽ३ः । हौऽ३-
होऽ३१ ॥ नसूरियाऽ३ः । हौऽ३होऽ३१२३४५इ ॥डा॥

दी. १३. उत्. न. मा. २६. रू. ॥५५५॥

४. विलम्बसौपर्णम् ॥ सुपर्णः । गायत्री । पवमानस्सोमः ॥

अस्यप्रत्नामनुद्युतम् । ईयइयाहाइ ॥ शुक्रंदुदुहेआ । हाऽ३हाऽ३ ।
हाऽ२३४याः ॥ पायाऽ३उवाऽ३ ॥ साऽ२हाऽ२३४औहोवा ॥ स्सामृषा-
ऽ२३४५इम् ॥ श्रीः ॥ अयꣳसूर्यइवोपद्दक् । ईयइयाहाइ ॥ अयꣳसराꣳ-
सिधा । हाऽ३हाऽ३इ । वाऽ२३४ताइ ॥ साप्ताऽ३उवाऽ३ ॥ प्राऽ२वा-
ऽ२३४औहोवा ॥ तआदिवाऽ२३४५म् ॥ श्रीः ॥ अयंविश्वानितिष्ठति ।
ईयइयाहाइ ॥ पुनानोभुवनो । हाऽ३हाऽ३इ । पाऽ२३४राइ ॥ सोमा-
ऽ३उवाऽ३ ॥ दाऽ२इवाऽ२३४औहोवा ॥ नसूरियाऽ२३४५ः ॥

दी. २०. उत्. ३. मा. २७. बे. ॥५५६॥

५. [1]दैर्घश्रवसम् ॥ दीर्घश्रवाः । बृहती । पवमानस्सोमः ॥

अभिसोमासआयवओहाओहाऽ३ए ॥ पवन्तेमदियंमदम् । ओऽ३हा । ओऽ३हाऽ३एऽ३४ ॥ समूऽ३४द्रस्या ॥ धाइविष्ट । पेमानीषिणाः । ओऽ३हा । ओऽ३हाऽ३एऽ३४ ॥ मत्साऽ३४रासाऽ३ः ॥ मदोऽ२३४वा । च्यूऽ५तोऽ६"हाइ ॥श्रीः॥ मत्सरासोमदच्युतओहाओहाऽ३ए ॥ मत्सरासोम-दच्युतः । ओऽ३हा । ओऽ३हाऽ३एऽ३४ ॥ तराऽ३४त्समू ॥ द्रांपव । मानाऊर्मिणा । ओऽ३हा । ओऽ३हाऽ३एऽ३४ ॥ राजाऽ३४देवाऽ३ः ॥ ऋतोऽ२३४वा । बृऽ५होऽ६"हाइ ॥श्रीः॥ राजादेवऋतंबृहदोहाओहाऽ३ए ॥ राजादेवऋतंबृहत् । ओऽ३हा । ओऽ३हाऽ३एऽ३४ ॥ अर्षाऽ३४मित्रा ॥ स्यावरु । णस्याधर्मणा । ओऽ३हा । ओऽ३हाऽ३एऽ३४ ॥ प्रहाऽ३४-इन्वानाऽ३ः ॥ ऋतोऽ२३४वा । बृऽ५होऽ६"हाइ ॥

दी. ३१. उत्. ७. मा. ३०. खौ. ॥५५७॥

६. [2]द्विहिंकारं वामदेव्यम् ॥ वामदेवः । बृहती । पवमानस्सोमः ॥

प्रहिन्वाऽ२३नऋतंबृहात् ॥ प्राहिन्वानऋतंबृहन्नृभिर्यमाणोहर्य-तोविचौहोऽ३ । हुम्माऽ२ । क्षाऽ२३णाः ॥ राजादेवास्समौहोऽ३ । हुम्माऽ२ ॥ द्रिया । औऽ३होवा । होऽ५इ ॥डा॥

दी. ९. उ. २. मा. ५. शु. ॥५५८॥

७. [3]सन्तनि ॥ देवाः । बृहती । पवमानस्सोमः ॥

अभीहाउ ॥ सोमासआऽ३१उवाऽ२३ । याऽ२३४वाः । पवन्ते-मदियम्मद॰समुद्रस्याधिविष्टपेमनीषिणाऽ२३४५ः ॥ मत्साहाउ ॥ रासो-मदाऽ३१उवाऽ२३ ॥ च्यूऽ२३४ताः ॥ श्रीः ॥ मत्सरासोमदच्युतोमत्सरा-सोमदच्युतस्तरत्समुद्रंपवमानऊर्मिणाऽ२३४५ ॥ राजाहाउ ॥ दाइवऋता-

---

[1] त्रिसप्ततितमसूक्ते गीयते ।

[2] त्रिसप्ततितमसूक्तस्य द्वितीयस्या अन्तिमे पादे द्विपदाविराजि च गीयते ।

[3] त्रिसप्ततितमसूक्ते गीयते ।

३२९. वसिष्ठो मैत्रावरुणिः। बृहतीसतोबृहत्यौ। इन्द्रः॥

१०२५. मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन्।
आरात्ताद्वा सधमादन्न आ गहीह वा सन्नुप श्रुधि ॥१॥

१०२६. इमे हि ते ब्रह्मकृतस्सुते सचा मधौ न मक्ष आसते।
इन्द्रे काममञ्जरितारो वसूयवो रथे न पादमा दधुः ॥२॥

धा. १३. उ. ४. स्व. ४. ढी. ॥६॥

---

३२९. मा। उ। सु। त्वा। वाघतः। च। न। आरे। अस्मत्। नि। रीरमन्। आरात्तात्। वा। सधमादम्। सध। मादम्। नः। आ। गहि। इह। वा। सन्। उप। श्रुधि॥ इमे। हि। ते। ब्रह्मकृतः। ब्रह्म। कृतः। सुते। सचा। मधौ। न। मक्षः। आसते। इन्द्रे। कामम्। जरितारः। वसूयवः। रथे। न। पादम्। आ। दधुः॥

---

ऽ३१उवाऽ२३ ॥ बृऽ२३४हात् ॥श्रीः॥ राजादेवऋतंबृहद्राजादेवऋतंबृहदर्षा-मित्रस्यवरुणस्यधर्मणाऽ२३४५ ॥ प्रहाइहाउ ॥ न्वानऋताऽ३१उवा-ऽ२३ ॥ बृऽ२३४हात् ॥

दी. २१. उ. १. मा. २१. क. ॥५५९॥

८. [1]पौरुहन्मनम्॥ पुरुहन्मा। बृहती। पवमानस्सोमः॥

प्रहिन्वाऽ३नऋतंबृहात् ॥ प्राहिन्वानः । ऋतांबृऽ१हाऽ२त् । बृहाऽ२त् । नृभिर्येमा । णो । हर्यतोऽ३ । (द्विः) । वाइचक्षाऽ२३४णाः ॥ राजादेवाः । सामुद्राऽ२३४याः ॥ समूऽ५द्रियाः । होऽ५इ ॥डा॥

दीं. ५. उ. १. मा. ११. प. ॥५६०॥

९. गायत्रपार्श्वम्॥ देवाः। बृहती। पवमानस्सोमः॥

मोषू ॥ त्वावाघताऽ३१उवाऽ२३ । चाऽ२३४ना । आरेअस्मन्नि-रीरमन्नाराात्ताद्वासधमादन्नआगहीऽ२३४५ ॥ इहावाऽ१साऽ२न् ॥ उपाऽ३ । हुम्स्थिऽ२३बाऽ३ ॥ श्रूधाऽ२३४५इ ॥ श्रीः ॥ आइहा ॥ वासन्नुपाऽ३१-

---

[1] त्रिसप्ततितमसूक्तस्य द्वितीयस्या अन्तिमे पादे द्विपदाविराजि च गीयते।

३३०. आयुः काण्वः । बृहतीसतोबृहत्यौ । इन्द्रः ॥

१ २ ३ १ २ ३ १ २र
१०२७. अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत ।
३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥१॥
२उ ३ १ २ ३ १ २ ३ २ ३ २उ ३ १ २
१०२८. समिन्द्रो रायो बृहतीरधूनुत संक्षोणी समु सूर्यम् ।
२ ३ २ ३ १ २ ३ १ २र ३ २ ३ १ २
सꣳशुक्रासश्शुचयस्सं गवाशिरस्सोमा इन्द्रममन्दिषुः ॥२॥

धा. १३. उ. २. स्व. २. ठा. ॥७॥

---

३३०. अस्तावि । मन्म । पूर्व्यम् । ब्रह्म । इन्द्राय । वोचत । पूर्वीः । ऋतस्य । बृहतीः । अनूषत । स्तोतुः । मेधाः । असृक्षत ॥ सम् । इन्द्रः । रायः । बृहतीः । अधूनुत । सम् । क्षोणी इति । सम् । उ । सूर्यम् । सम् । शुक्रासः । शुचयः । सम । गवाशिरः । गो । आशिरः । सोमाः । इन्द्रम् । अमन्दिषुः ॥

---

उवाऽ२३ । श्रूऽ२३४घी । इहवासन्नुपश्रुधीमेहितेब्रह्मकृतस्सुतेसचाऽ२३४५ ॥ मघोनाऽ१माऽ२ ॥ क्षआऽ३ । हुम्स्थिऽ२३बाऽ३ ॥ साताऽ२३४५इ ॥ श्रीः॥ माघौ ॥ नामक्षआऽ३१उवाऽ२३ । साऽ२३४ते । मघोनमक्षआसत-इन्द्रेकामञ्जरितारोवसूयवाऽ२३४५ः ॥ रथाइनाऽ१पाऽ२ ॥ दमाऽ३ । हुम्स्थिऽ२३बाऽ३ ॥ दाधूऽ२३४५ः ॥ दी. २२. उ. ५. मा. १९. व्यो. ॥५६१॥

१० सन्तनि ॥ देवाः । ककुबुत्तराबृहती । इन्द्रः ॥

अस्ताहाउ ॥ वाइमन्मपूऽ३आउवाऽ२३ । वींऽ२३४याम् । ब्रह्मेन्द्रायवोचतपूर्वीर्ऋतस्यबृहतीरनूषताऽ२३४५ ॥ स्तोतूहाउ ॥ माइधा-असाऽ३१उवाऽ२३ ॥ क्षाऽ२३४ता ॥ श्रीः ॥ स्तोतुर्मेधाअसृक्षतसमिन्द्रो-रायोबृहतीरधूनुताऽ२३४५ ॥ सङ्क्षोहाउ ॥ णाइसमुसूऽ३आउवाऽ२३ ॥ रीऽ२३४याम् ॥ श्रीः ॥ सङ्क्षोणीसमुसूर्यꣳसꣳशुक्रासश्शुचयस्संगवाशिरा-ऽ२३४५ः ॥ सोमाहाउ ॥ आइन्द्रममाऽ३१उवाऽ२३ ॥ दीऽ२३४षूः ॥

दी. २३. उत्. १. मा. २०. टौ. ॥५६२॥

११. [1]सुरूपाद्यम् ॥ सुरूपः । गायत्री । पवमानस्सोमः ॥

यस्तेमदाऽ२ः । इयाऽ२इया ॥ वरेणायाऽ२ः । तेनापवाऽ२ । इयाऽ२इया । स्वअन्धासाऽ२ ॥ देवावीराऽ२ । इयाऽ२इया ॥ घश९सा-ऽ२३हाऽ३४३ ॥श्रीः॥ जघ्निर्वृत्राऽ२म् । इयाऽ२इया ॥ अमित्रायाऽ२म् । सस्निर्वाजाऽ२म् । इयाऽ२इया । दिवेदाइवाऽ२इ ॥ गोषातिराऽ२ । इयाऽ२इया ॥ श्वसाआऽ२३साऽ३४३इ ॥श्रीः॥ संमिश्लोआऽ२ । इयाऽ२-इया ॥ रुषोभूवाऽ२ः । सूपस्थाभाऽ२इ । इयाऽ२इया । नधेनूभाऽ२इः ॥ सीदञ्छ्येनाऽ२ः । इयाऽ२इया ॥ नयोनाऽ२३इमाऽ३४३ । ओ-ऽ२३४५इ ॥डा॥                दी. २०. उत्. १८. मा. २७. बे. ॥५६३॥

१२. भासम् ॥ अत्रिः । गायत्री । पवमानस्सोमः ॥

यस्ते । माऽ३दो । वा । ईया ॥ राइणाऽ१याऽ२ः । ताइनापव । स्व । औऽ३हो । वाहा । धसाऽ२ ॥ दाइवाऽ२३ ॥ वाऽ२इराऽ२३४-औहोवा ॥ घश९सहाऽ१ ॥ श्रीः ॥ जघ्निः । वाऽ३त्रोम् । आ । ईया ॥ माइत्राऽ१याऽ२म् । सास्निर्वाजम् । दि । वौऽ३हो । वाहाइ । दिवाऽ२इ ॥ गोषाऽ२३ ॥ ताऽ२इराऽ२३४औहोवा ॥ श्वसाअसाऽ१इ ॥ श्रीः ॥ संमि । श्लोऽ३आ । रू । ईया ॥ षोभूऽ१वाऽ२ः । सूपस्थाभिः । न । धौऽ३हो । वाहाइ । नुभाऽ२इः । सीदाऽ२३न् । श्याऽ२इनाऽ२३४औहोवा ॥ नयोनिमाऽ१ ॥

दी. २०. उत्. न. मा. २६. वू. ॥५६४॥

१३. वासिष्ठमासितम् ॥ असितः । गायत्री । पवमानस्सोमः ॥

यस्तेमदोवरे । इयाऽ३४३ईऽ३४या ॥ णियास्तेनापवस्वऔऽ२ । हौऽ२ । हुवाऽ२इ । धासाऽ२ ॥ देवाऽ३होइ । वीराऽ३हो ॥ घश९सा-ऽ२३हाऽ३४३ ॥ श्रीः ॥ जघ्निर्वृत्रममि । इयाऽ३४३ईऽ३४या ॥ त्रिया९-

[1] षष्टितमसूक्ते त्रीणि सामानि गीयन्ते ।

सस्निर्वाजन्दिवौऽ२ । हौऽ२ । हुवाऽ२इ । दाइवाऽ२इ ॥ गोषाऽ३होइ ।
तिराऽ३हो ॥ श्वसाआऽ२३साऽ३४३इ ॥ श्रीः ॥ संमिश्लोअरुषः । इया-
ऽ३४३ईऽ३४या ॥ भुवास्सूपस्थाभिर्नधौऽ२ । हौऽ२ । हुवाऽ२इ ।
नूभाऽ२इः ॥ सीदाऽ३न्होइ । श्येनाऽ३हो ॥ नयोनाऽ२३इमाऽ३४३ ।
ओऽ२३४५इ ॥डा॥ दी. १६. उत्. ३. मा. २०. गौ. ॥५६५॥

१४. [1]वाचस्साम ॥ वाक् । ककुप् । पवमानस्सोमः ॥

अभिद्युम्नाम् । होइ । बृहद्यशाऽ६ए ॥ आइषस्पते । दाइदीऽ१-
हाइदेऽ२ । वादेवयुम् ॥ वाइकोऽ१शाम्माऽ२३ ॥ ध्याऽ२३माऽ३म् ।
यूऽ३४५वोऽ६"हाइ ॥ श्रीः ॥ विकोशंमा । हो । ध्यमंयुवाऽ६ए ॥
आवच्यस्व । सूदक्षाचाऽ२ । मूवोस्सुतः ॥ वाइशाऽ१म्वाह्वाऽ२३इः ॥
नाऽ२३वाऽ३इ । श्पाऽ३४५तोऽ६"हाइ ॥ श्रीः ॥ विशांवह्नीः । होइ ।
नविश्पताऽ६ए ॥ वार्ष्टिन्दिवः । पावस्वारीऽ२ । ताइमपः ॥ जाइन्वाऽ१-
न्गावाऽ२३इ ॥ ष्टाऽ२३याऽ३ । धाऽ३४५योऽ६"हाइ ॥
दी. ५. उत्. न. मा. २६. वृ. ॥५६६॥

१५. [2]शौक्तम् ॥ शुक्तिः । उष्णिक् । पवमानस्सोमः ॥

सखा । यआओऽ२३४वा ॥ निषाइ । दाताओऽ२३४वा ।
पुनानायप्रगाऽ२यताऽ२३४५ ॥ शाइशाओऽ२३४वा ॥ नयज्ञै४परिभू-
ऽ२३४५ । षाताओऽ२३४वा ॥ श्रियेऽ१ ॥ श्रीः ॥ समी । वत्साओ-
ऽ२३४वा ॥ नमा । तुभाओऽ२३४वा । सूजतागयसाधनाऽ२३४५म् ॥
दाइवाओऽ२३४वा ॥ वियंमदमभाऽ१इ । द्वाइशाओऽ२३४वा ॥ वसाऽ१म् ॥
श्रीः ॥ पुना । तादाओऽ२३४वा ॥ क्षसा । धानाओऽ२३४वा ।
यथाशर्धायवीतयाऽ२३४५इ ॥ याथाओऽ२३४वा ॥ मित्रायवरुणाऽ२३४५ ।
याशाओऽ२३४वा ॥ तमाऽ१म् ॥ दी. १३. उत्. ९. मा. २२. द्वा. ॥५६७॥

[1] द्वाविंशत्युत्तरशततमसूक्ते गीयते । [2] एकषष्ट्युत्तरशततमसूक्ते गीयते ।

३३१. अम्बरीषो वार्षगिरः, ऋजिश्वा भारद्वाजश्च । अनुष्टुप् । पवमानःसोमः ॥

१०२९. इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
नरे च दक्षिणावते वीराय सदनासदे ॥१॥

१०३०. तꣳसखायᳵपुरूरुचं वयं यूयश्च सूरयः ।
अश्याम वाजगन्ध्यꣳसनेम वाजपस्त्यम् ॥२॥

१०३१. परित्यꣳहर्यतꣳहरिं (बभ्रुं पुनन्ति वारेण ।
यो देवाँ विश्वाँ इत्परि मदेन सह गच्छति) ॥३॥

धा. १६. उ. न. स्व. २ हा. ॥८॥

---

३३१. इन्द्राय । सोम । पातवे । वृत्रघ्ने । वृत्र । घ्ने । परि । सिच्यसे ।
नरे । च । दक्षिणावते । वीराय । सदनासदे । सदन । सदे ॥ तम् । सखायः । स ।
खायः । पुरुरुचम् । पुरु । रुचम् । वयम् । यूयम् । च । सूरयः । अश्याम ।
वाजगन्ध्यम् । वाज । गन्ध्यम् । सनेम । वाजपस्त्यम् । वाज । पस्त्यम् ॥ परि ।
त्यम् । हर्यतम् । हरिम् । बभ्रुम् । पुनन्ति । वारेण । यः । देवान् । विश्वान् ।
इत् । परि । मदेन । सह । गच्छति ॥

---

१६. आसितायम् ॥ असितः । अनुष्टुप् । पवमानस्सोमः ॥

इन्द्रायसोमपा ॥ तवाइ । वृत्रघ्नेपरिषिच्याऽ२३साइ । नारेऽ२-
चादाऽ२ । क्षिणावताइ ॥ वाइराऽ२यासाऽ२ ॥ दनोवाऽ३ओऽ२३४वा ।
साऽ५दोऽ६"हाइ ॥ श्रीः ॥ तꣳसखायᳵपुरू ॥ रुचाम् । वयंयूयश्चसूरा-
ऽ२३याः । आश्याऽ२मावाऽ२ । जगंधियाम् ॥ सानेऽ२मावाऽ२ ॥
जपोवाऽ३ओऽ२३४वा । स्ताऽ५योऽ६"हाइ ॥ श्रीः ॥ परित्यꣳहर्यताम् ॥
हराइम् । बभ्रुंपुनन्तिवारेऽ२३णा । योदेऽ२वान्वाऽ२इ । श्वाꣳइत्पराइ ॥
मादेऽ२नासाऽ२ ॥ हगोवाऽ३ओऽ२३४वा । छाऽ५तोऽ६"हाइ ॥

दी. ९. उत्. ६. मा. १९. तो. ॥५६८॥

१७. ऐडं कौत्सम् ॥ कुत्सः । अनुष्टुप् । पवमानस्सोमः ॥

इन्द्राहीयाऽ२३ । सोमपातवईया ॥ वृत्रघ्नेपरिषिच्यसे । नारेचद ।
क्षिणावाऽ२३ताइ ॥ वाइराऽ३हा । यासाऽ३हा ॥ दनासाऽ२३दाऽ३४३इ ॥
श्रीः ॥ तꣳसहीखाऽ२३ । यꣳपुरूरुचमीयम् । वयंयूयश्चसूरयः । आश्या-
मवा । जगन्धाऽ२३याम् ॥ सानाऽ३हाइ । मह्याऽ३हा ॥ जपस्ता२३-
याऽ३४३म् ॥ श्रीः ॥ परीहित्याऽ२३म् । हर्यतꣳहरमीया । बभ्रुंपुनन्ति-
वारेण । योदेवान्वि ॥ श्वाꣳइत्पाऽ२३राइ ॥ मादाऽ३हाइ । नासाऽ३हा ॥
हगच्छाऽ२३ताऽ३४३इ । ओऽ२३४५इ ॥डा॥

दी. २१. उत्. ९. मा. १४. घी. ॥५६९॥

१८. पदनिधनशुद्धाशुद्धीयम् ॥ इन्द्रः । अनुष्टुप् । पवमानस्सोमः ॥

इन्द्रायसोमपातवाइ ॥ वृत्रघ्नेपरिषिच्याऽ२३साइ । नरेचदक्षिणा-
वाऽ२३ताइ ॥ वीरायाऽ२३साऽ३ ॥ दाऽ२ । नासाऽ३४औहोवा ॥
दाऽ२३४५इ ॥ श्रीः ॥ तꣳसखायꣳपुरूरुचाम् ॥ वयंयूयश्चसूराऽ२३याः ।
अश्यामवाजगन्धाऽ२३याम् ॥ सनेमाऽ२३वाऽ३ ॥ जाऽ२ । पस्ताऽ३४-
औहोवा ॥ याऽ२३४५म् ॥ श्रीः ॥ परित्यꣳहर्यतꣳहराइम् ॥ बभ्रुंपुनन्ति-
वारेऽ२३णा । योदेवान्विश्वाꣳइत्पाऽ२३राइ ॥ मदेनाऽ२३साऽ३ ॥ हाऽ२ ।
गच्छाऽ३४औहोवा ॥ ताऽ२३४५इ ॥ दी. २८. उ. ३. मा. १६. डू. ॥५७०॥

१९. क्रौञ्चाद्यम् ॥ क्रुङ् । अनुष्टुप् । पवमानस्सोमः ॥

इन्द्रायसौहो । मापातवाइ ॥ वृत्रघ्नेपाऽ३ । राइषाऽ३इच्याऽ५-
साऽ६५६इ ॥ नरेचदौहो । क्षीणावताइ ॥ वीरायसाऽ३ । दानाऽ३साऽ५"-
दाऽ६५६इ ॥ श्रीः ॥ तꣳसखायौहो । पूरूरुचाम् ॥ वयंयूयाऽ३म् ।
चासूऽ३राऽ५याऽ६५६ः ॥ अश्यामवौहो । जागन्धियाम् ॥ सनेमवाऽ३ ।
जापाऽ३स्ताऽ५"याऽ६५६म् ॥ श्रीः ॥ परित्यꣳहौहो । र्यतꣳहराइम् ॥

बभ्रुंपुनाऽ३ । ताइवाऽ३रेऽ५णाऽ६५६ ॥ योदेवान्वौहो । श्वाꣳइत्पराइ ॥
मदेनसाऽ३ । हागाऽ३च्छाऽ५"ताऽ६५६इ ॥

दी. २८. उ. १२. मा. १७. ठे. ॥५७१॥

२०. रयिष्ठम् ॥ इन्द्रः । अनुष्टुप् । पवमानस्सोमः ॥

इन्द्रायसो ॥ मपाताऽ३वाइ । औऽ३होऽ३वा । वृत्रघ्नेपरिषिच्य-
साऽ२३४५इ ॥ वृत्रघ्नेपा ॥ रिषाइच्याऽ३साइ । औऽ३होऽ३वा । नरेच-
दक्षिणावताऽ२३४५इ ॥ नरेचदा ॥ क्षिणावाऽ३ताइ । औऽ३होऽ३वा । वीरा-
यसदनासदाऽ२३४५इ ॥ वीरायसा । दनासाऽ३दाइ । औऽ३होऽ३वा ॥
श्रीः ॥ तꣳसखायाः ॥ पुरूरूऽ३चाम् । औऽ३होऽ३वा । वयंयूयश्चसूर-
याऽ२३४५ः ॥ वयंयूयाम् । चसूराऽ३याः । औऽ३होऽ३वा । अश्याम-
वाजगन्धियाऽ२३४५म् ॥ अश्यामवा ॥ जगान्धाऽ३याम् । औऽ३होऽ३वा ।
सनेमवाजपस्तियाऽ२३४५म् ॥ सनेमवा ॥ जपास्ताऽ३याम् । औऽ३हो-
ऽ३वा ॥ श्रीः ॥ परित्यꣳहा ॥ र्यताꣳहाऽ३राइम् ॥ औऽ३होऽ३वा ।
बभ्रुंपुनन्तिवारेणाऽ२३४५ ॥ बभ्रुंपुना ॥ तिवारेऽ३णा । औऽ३होऽ३वा ।
योदेवान्विश्वाꣳइत्पराऽ२३४५इ ॥ योदेवान्वाइ ॥ श्वाꣳआइत्पाऽ३राइ ।
औऽ३होऽ३वा । मदेनसहगच्छताऽ२३४५इ ॥ मदेनसा । हगाच्छाऽ३ताइ ।
औऽ३होऽ३वा । ( द्विः ) । ईऽ३या । ईऽ३याऽ३४ । हा । हाउवाऽ३ ॥
ऊऽ३२३४पा ॥     दी. ३३. उत्. १६. मा. २८. टै. ॥५७२॥

द्वितीयो विꣳशः ॥

२१. यज्ञायज्ञीये ॥ अग्निर्वैश्वानरः । अनुष्टुप् । पवमानस्सोमः ॥

इन्द्राऽ५य । सोऽ३माऽ३पातावाइ ॥ वार्त्रघ्नेपा । रीऽ३षाइच्या-
ऽ३साइ । नरेऽ२च । दक्षाऽ२३इणा । हुम्माइ ॥ वाऽ३२ताइ ॥ वाइ-
रायसदनाऽ२सदाउ ॥ श्रीः ॥ दाइताम् ॥ सखाय४पुरुरुचंवयंयूयाम् ।

चाऽ३स्रूराऽ३याः । अश्याऽ२म । वाजाऽ२३गा । हुम्माइ ॥ घाऽ३२याम् ।
सानेंमवाजपाऽ२स्तियाउ ॥ श्रीः ॥ यांपा । रित्य॰हर्यत॰हरिंबभ्रुंपुना ।
तीऽ३वारेऽ३णा । योदेऽ२वान् । विश्व॰ऽ२३आ । हुम्माइ ॥ पाऽ३२राइ ॥
मादेनसहगाऽ२च्छताउ ॥ दी. १२. उत्. न. मा. २०. यौ. ॥५७३॥

चतुर्दशः प्रपाठकः ॥

१, [1]अग्निवैश्वानरः । जगती । पवमानस्सोमः ॥

पवाऽ५इत्रम् । ताऽ३इवाऽ३इततंब्रा ॥ ह्मणस्पतेप्रभुर्गात्राणि-
परियाइ । षीऽ३वाइश्वाऽ३ताः । अताऽ२प्ततनूर्नतदामोअश्नु । तेशाऽ२३र्ता ।
हुम्माइ ॥ साऽ३२ईत् ॥ वाहन्तस्सन्तदाऽ२शताउ ॥ श्रीः ॥ ताता ॥
पोष्पवित्रंविततंदिवस्पदेर्चन्तोअस्यतन्तवो । वाऽ३यास्थाऽ३इरान् । अवाऽ२-
न्त्यस्यपवितारमाश । वोदाऽ२३इवाः । हुम्माइ ॥ पाऽ३२ष्ठाम् ॥
आधिरोहन्तिताऽ२इजसाउ ॥ श्रीः ॥ साम्रा ॥ रूरुचदुषस×पृश्निरग्रियउक्षा-
मिमेतिभुवनाइ । षूऽ३वाजाऽ३यूः । मायाऽ२विनोममिरेअस्यमाय । याना-
ऽ२३र्चा । हुम्माइ ॥ क्षाऽ३२साः ॥ पाइतरोगर्भमाऽ२दधाउ ॥
वाऽ३४५ ॥ दी. २३. उत्. न. मा. ३०. रौ. ॥५७४॥

२. [2]विशोविशीयम् ॥ अग्निः । अनुष्टुप् । अग्निः ॥

विशोविशोहुम्स्थिवोऽ२अतिथाइम् ॥ वाजयन्ताः । पूऽ३रूप्रीऽ३-
याम् । अग्निंवोऽ२ । दूराऽ२३याम् । हुम्माइ । वाऽ३चाऽ३ः ।
स्तूऽ२३४षेहाइ ॥ ओ । हुवाइ । शूऽ२३४षा ॥ हुम्मा । स्याऽ३माऽ३ ।
न्माऽ२३४भाइ । एहियाऽ६हा ॥श्रीः॥ स्तुषेशूषहुम्स्थिस्याऽ३मन्मभाइः ॥
यज्ञनासो । हाऽ३वाइष्माऽ३न्ताः । मित्राऽ२न्न । सर्पाऽ२३इरा । हुम्माइ ।
सूऽ३ताऽ३इम् । प्राऽ२३४शहाइ ॥ ओ । हुवाइ । साऽ२३४न्ती ॥

[1] अशीतितमसूक्ते गीयते । [2] षडशीत्युत्तरद्विशततमसूक्ते गीयते ।

हुम्माइ । प्राऽ३शाऽ३ । स्ताऽ२३४इभाइ । एहियाऽ६हा ॥ श्रीः ॥
प्रश〱सन्तिहुम्स्थिप्राऽ३शस्तिभाइः ॥ पन्या〱सञ्ज्ञा । ताऽ३वाइदाऽ३साम् ।
योदेऽ२व । ताताऽ२३ऊ । हुम्माइ । याऽ३ताऽ३ । हाऽ२३४व्यहाइ ॥
श्रो । हुवाइ । नाऽ२३४आ ॥ हुम्माइ । राऽ३याऽ३त् । दाऽ२३४इवाइ ।
एहियाऽ६हा । होऽ५इ ॥डा॥  दी. १६. उत्. १. मा. ४१. क. ॥५७५॥

३. [1]सुरूपोत्तरम् ॥ सुरूपः । गायत्री । पवमानस्सोमः ॥

उच्चात्तेजौहोऽ२ । इया ॥ तमन्धासाऽ२ः । दिविसद्भौहोऽ२ ।
इया । मियादादाऽ२इ ॥ उग्र〱शर्मौहोऽ२ । इया ॥ महिश्राऽ२३वा-
ऽ३४३ः ॥श्रीः॥ सनइन्द्रौहोऽ२ । इया ॥ ययज्यावाऽ२इ । वरुणायौहोऽ२ ।
इया । मरुद्भायाऽ२ः॥ वरिवोवौहोऽ२ । इया ॥ परिस्राऽ२३वाऽ३४३॥श्रीः॥
एनाविश्वौहोऽ२ । इया ॥ निश्रर्याश्राऽ२ । द्युम्नानिमौहोऽ२ । इया ।
नुषाणाऽ२म् ॥ सिषासन्तौहोऽ२ । इया ॥ वनामाऽ२३हाऽ३४३इ ।
ओऽ२३४५इ ॥डा॥  दी. १०. उत्. १८. मा. ११. ब. ॥५७६॥

४. अदारसृत् ॥ भरद्वाजः । गायत्री । पवमानस्सोमः ॥

हाउच्चातेजा ॥ तमाऽ२न्धासाऽ२ः । दिविसद्भूमियाऽ२दादाऽ२इ ॥
उग्राऽ२〱शार्माऽ२ ॥ महि । श्राऽ२वाऽ२३४औहोवा ॥ श्रीः ॥
हाउसनइन्द्रा ॥ ययाऽ२ज्यावाऽ२इ । वरुणायमरूऽ२द्भायाऽ२ः ॥ वराऽ२-
इवोवीऽ२त् ॥ परि । स्राऽ२वाऽ२३४श्रोहोवा ॥ श्रीः ॥ हावेनाविश्वा ॥
निआऽ२र्याश्राऽ२ । द्युम्नानिमानूऽ२षाणाऽ२म् ॥ सिषाऽ२सान्ताऽ२ः ॥
वना । माऽ२हाऽ२३४औहोवा ॥ अस्मभ्यंगातुवित्तमाऽ२३४५म् ॥
दी. १९. उत्. १०. मा. १७. ने. ॥५७७॥

५. इडाना〱संक्षारः ॥ इडा । गायत्री । पवमानस्सोमः ॥

औहोइहुवाऽ३होइ । उच्चातेजाऽ३ताऽ३मन्घसः ॥ दिविसद्भूऽ३-

---

[1] अष्टमे सूक्ते त्रीणि सामानि गीयन्ते ।

मीऽ३याददाइ ॥ उग्राऽ३शाऽ२३४र्मा ॥ महिश्रवः । इडाऽ२३ ॥ श्रीः ॥
सनइन्द्राऽ३याऽ३यज्यवाइ ॥ वरुणायाऽ३माऽ३रुद्भ्यः ॥ वराइवोऽ२३४-
वीत् ॥ परिस्रव । इडाऽ२३ ॥ श्रीः ॥ एनाविश्वाऽ३नीऽ३अर्यआ ॥
द्युम्नानिमाऽ३नूऽ३षाणाम् ॥ औहोइहुवाऽ३होइ । सिषासाऽ२३४न्ताः ॥
वनामहे। इडाऽ२३भाऽ३। एहीडा। होऽ५इ ।।डा॥

दी. १६. उत् . ३. मा. १७. गे. ॥५७८॥

६–७. [1]पृश्निनी ॥ भरद्वाजः। बृहती। पवमानस्सोमः ॥

पराइतोऽ२३षिश्चतासुतहाउ ॥ सोमोयउत्तमहविः । दधान्व-
ऽ१याऽ२३ः । होवाऽ३हाइ । नारियोअ । प्सुवान्ताऽ१राऽ२३ ।
होवाऽ३हाइ ॥ सुषावाऽ१सोऽ२३ । होवाऽ३हा ॥ मामद्रिभिः ।
इडाऽ२३ ॥ श्रीः ॥ सुषावाऽ२३सोममद्रिभिर्हाउ ॥ सुषावसोममद्रिभिः ।
नूनांपूऽ१नाऽ२३ । होवाऽ३हाइ ॥ नोअविभिः । पराइस्राऽ१वाऽ२३ ।
होवाऽ३हाइ ॥ अदाब्धाऽ१स्सूऽ२३ । होवाऽ३हा ॥ राभिन्तरः ।
इडाऽ२३ ॥ श्रीः ॥ अदाब्धाऽ२३स्सुरभिन्तरोहाउ ॥ अदब्धस्सुरभिन्तरः ।
सुताइचाऽ१इत्वाऽ२३ । होवाऽ३हाइ । अप्सुमदा । मोआन्धाऽ१साऽ२३ ।
होवाऽ३हाइ ॥ श्रीणान्तोऽ१गोऽ२३ । होवाऽ३हाइ ॥ भाइरुत्तरम् ।
इडाऽ२३ ॥

दी. १३. उत् . ७. मा. २७. ठे. ॥५७९॥

[2]श्रीणान्तोऽ२३गोभिरुत्तरहाउ ॥ श्रीणन्तोगोभिरुत्तरम् । परा-
इस्वाऽ१नाऽ२३ः । होवाऽ३हाइ । चाक्षसेदे । वमादाऽ१नाऽ२३ः ।
होवाऽ३हाइ ॥ क्रतूराऽ१इन्दूऽ२३ः । होवाऽ३हाइ ॥ वाइचक्षणः ।
इडाऽ२३भाऽ३४३ । ओऽ२३४५इ॥डा॥ दी.७. उत्. ३. मा.१३. जि. ॥५८०॥

---

[1] अष्टनवत्युत्तरशततमसूक्ते गीयते ।

[2] अष्टनवत्युत्तरशततमसूक्तस्य द्वितीयस्याश्चतुर्थपादे द्विपदाविराजि च गीयते ।

८. [1]हाविष्मतम् ।। हविष्मान् । गायत्री । पवमानस्सोमः ।।

हाउपरिस्वानोगिरिष्ठाहाउ ।। पवित्रेसोऽ३ । मोऽक्षाऽ२३४रात् ।।
श्रीः ।। हाउतुवंविप्रस्तुवंकविर्हाउ ।। मधुप्रजाऽ३ । तामन्धाऽ२३४साः ।।
श्रीः ।। हाउतुवेविश्वेसजोषसोहाउ ।। देवास ५पोऽ३ । ताइमाशाऽ२३४ता ।
ऐऽ२होऽ१आऽ२३इही ।। मदाइषूऽ३सा ।। वंघाः । आऽ२साऽ२३४औहोवा ।।
हविष्मतेऽ२३४५ ।। दी. १६. उत्. ५. मा. १५. कु. ।।५८१।।

९. शाम्मदम् ।। शम्मत् ।। गायत्री । पवमानस्सोमः ।।

परिसुवानऐ । हीऐहीऽ२३४या ।। गिरिष्ठाऐऽ२हीऐऽ२हीऽ३या ।
पवित्रेसोमोऽक्षरदैऽ२हीऐऽ२हीऽ३या ।। श्रीः ।। तुवंविप्रस्तुऐ । हीऐही-
ऽ२३४या ।। वंकविरैऽ२हीऐऽ२हीऽ३या ।। मधुप्रजातमन्धसऐऽ२हीऐऽ२-
हीऽ३या ।। श्रीः ।। तुवेविश्वेसऐ । हीऐहीऽ२३४या ।। जोषसऐऽ२हीऐऽ२-
हीऽ३या ।। देवास ५पीतिमाशतऐऽ२हीऐऽ२हीऽ३या ।। मादाइषूसाऽ३१२३ ।।
वंघोऽ२३४वा । आऽ५सोऽ६"हाइ । दी. १५. उत्. १. मा. १९. पो. ।।५८२।।

१०. दावसुनिधनम् ।। दावसुः । गायत्री । पवमानस्सोमः ।।

परिसुवाऽ२३नोगिरिष्ठाहाउ ।। पावित्रेसो । मोऽऽक्षाऽ१राऽ२३त् ।
होवाऽ३हाइ ।।श्रीः।। तुवंवाऽ२३इप्रस्तुवंकविर्हाउ ।। माधुप्रजा । तमान्धा-
ऽ१साऽ२३ः । होवाऽ३हाइ ।। श्रीः ।। तुवेवाऽ३इश्वेसजोषसोहाउ । दाइवा-
स५पी । तिमाशाऽ१ताऽ२३ । होवाऽ३हाइ ।। मदाइषूऽ१साऽ२३ ।
होवाऽ३हा ।। वंघाः । आऽ२साऽ२३४औहोवा ।। एऽ३ । दावसूऽ२३४५ ।।
दी. १६. उत्. ८. मा. १५. गु. ।।५८३।।

११. प्रतीचीनेडं काशीतम् ।। काशीतः । गायत्री । पवमानस्सोमः ।।

परिसुवानः । गाऽ२इरिष्ठाः ।। पावित्रेसो । मोऽऽक्षराऽ२३४त् ।
हाहोइ ।। श्रीः ।। तुवंविप्रस्तु । वाऽ२ङ्कवाइः ।। माधुप्रजा । तमान्धसा-

[1] पञ्चचत्वारिंशदुत्तरशततमसूक्ते पञ्च सामानि गीयन्ते ।

२३४ः । हाहोइ ॥ श्रीः ॥ तुवेविश्वेस । जोऽ२षसाः ॥ दाइवास४पी । तिमाशताऽ२३४ । हाहोइ ॥ मदेषुसार्वाऽ३धाः ॥ असा । औऽ३-होवा ॥ ईडा ॥

दी. १३. उत्. ४. मा. १४. ढी. ॥५८४॥

१२. हाविष्कृतम् । हविष्कृत् । गायत्री । पवमानस्सोमः ॥

परिसुवानोगाहाउराइष्ठाः ॥ पवित्रेसो । मोआक्षाऽ२३रात् ॥श्रीः॥ तुवंविप्रस्तुव०हाउकावाइः ॥ मधुप्रजा । तमन्धाऽ२३साः ॥ श्रीः ॥ तुवे-विश्वेसजोहाउषासाः ॥ देवास४पाइ । तिमाशाऽ२३ता ॥ मदाऽ२होऽ१इ । षूऽ२३सा ॥ वंधाः । आऽ२साऽ२३४औहोवा ॥ हविष्कृतेऽ२३४५ ॥

दी. १७. उत्. ८. मा. १५. जु. ॥५८५॥

१३. [1]यज्ञायज्ञीयम् ॥ अग्निर्वैश्वानरः । अनुष्टुप् । पवमानस्सोमः ॥

अयाऽ५म्पू । षाऽ३राऽ३यिर्भागाः ॥ सोम४पुना । नोऽ३-आर्षाऽ३ताइ । पताऽ२इर्विं । श्वस्याऽ२३भू । हुम्माइ ॥ माऽ३२नाः ॥ वायरुव्यद्रोदसीऽ२उभाउ ॥ श्रीः ॥ भाइसाम् ॥ उस्रियाअनूषतगावोमदा । याऽ३घार्ष्वाऽ३याः । सोमाऽ२सः । कृण्वाऽ२३ता । हुम्माइ ॥ पाऽ३२-थाः ॥ पावमानासआऽ२इन्दवाउ ॥ श्रीः ॥ वायाः ॥ ओजिष्ठस्तमा-भरपवमाना । श्राऽ३वाआऽ३याम् । य४पाऽ२श्च । चर्षाऽ२३णा । हुम्माइ ॥ आऽ३२भाइ ॥ रायियेनवनाऽ२महाउ ॥ वाऽ३४५ ॥

दी. १३. उत्. न. मा. २४. री. ॥५८६॥

१४. यद्वाहिष्ठीयोत्तरम् ॥ अग्निः । अनुष्टुप् । पवमानस्सोमः ॥

अयंपूषारयिर्भगः । अयंपूषोवा ॥ रयिर्भगाः । सोम४पूऽ२३ना । नोअर्षताइ । पतिर्वाऽ२३इश्वा । स्यभूमनाः ॥ वियख्याऽ२३द्रो ॥ दसीऊऽ२३भाऽ३४३इ ॥श्रीः॥ सम्प्रियाअनूषत । सम्प्रियोवा । अनूषता । गावोमाऽ२३दा । यघृष्वयाः । सोमासाऽ२३४का । ण्वतेपथाः । पवमा-

[1] एकषष्टितमसूक्ते द्वे सामनी गीयेते ।

ऽ२३ना ॥ सइन्दाऽ२३वाऽ३४३ः ॥ श्रीः ॥ यश्रोजिष्ठस्तमाभर । यओ-
जिष्ठोवा ॥ तमाभरा। पवमाऽ२३ना। श्रवायियाम् । य ४पश्चाऽ२३चा। षणी-
रभाइ ॥ रयिंयाऽ२३इना ॥ वनामाऽ२३हाऽ३४३इ । ओऽ२३४५इ ॥डा॥
दी. २२. उत्. १६. मा. २०. चौ. ॥५८७॥

१५. [1]यज्ञायज्ञीयम् ॥ अग्निर्वैश्वानरः । जगती । पवमानस्सोमः ॥

धर्ताऽ५दि । वाऽ३ ४पाऽ३वतेका ॥ त्वीयोरसोदक्षोदेवानामनुमा ।
दीऽ३योनृऽ३भाइः । हराऽ२इस्सृजानोअत्योनसत्व । भिर्वाऽ२३र्था । हुम्माइ॥
पाऽ३२जा ॥ साइकृणुषेनदाऽ२इषुवाउ ॥ श्रीः ॥ आशू ॥ रोनधत्त-
आयुधागभस्त्योस्वस्सिषासन्रथिरो । गाऽ३वाइष्टाऽ३इषू । इन्द्राऽ२स्य-
शुष्ममीरयन्नपस्यु । भिराऽ२३इन्दूः । हुम्माइ ॥ हाऽ३२इन्वा ॥ नोअज्य-
तेमनाऽ२इषिभाउ ॥ श्रीः ॥ भाइराइ ॥ द्रस्यसोमपवमानऊर्मिणातविष्य-
माणोजठराइ । षूऽ३आवाऽ३इशा । प्रनाऽ२ ४पिन्वविद्युदभ्रेवरोद । सीधा-
ऽ२३या । हुम्माइ ॥ नोऽ३२वा ॥ ज ७उपमाहिशाऽ२श्वताउ ॥ वाऽ३४५ ॥
दी. २८. उत्. न. मा. २७. रे. ॥५८८॥

१६. [2]आकूपारम् ॥ अकूपारः । अनुष्टुप् । पवमानस्सोमः ॥

प्रसुन्वाऽ२३नाय । अन्धाऽ२३४साः ॥ मर्तोऽ२नवा । ष्टतद्वचाः ।
अपश्वानाऽ२म् । अराधसाम् ॥ हतामाखाऽ२३म् ॥ नाऽ२३भृऽ३ ।
गाऽ३४५वोऽ६"हाइ ॥ श्रीः ॥ आजामाऽ२३इरत्के । अव्याऽ२३४ता ॥
भुजाऽ२इनपूत् । त्रओणियोः । सरज्ञारोऽ२ । नयोषणाम् ॥ वरोनायो-
ऽ२३ ॥ नाऽ२३इमाऽ३ । साऽ३४५दोऽ६"हाइ ॥श्रीः॥ सवीरोऽ२३दक्ष ।
साधाऽ२३४नाः ॥ वियाऽ२स्तस्ता । भरोदसाइ । हरि ४पावाऽ२इ ।
त्रेअव्यता ॥ वेधानायोऽ२३ ॥ नाऽ२३इमाऽ३ । साऽ३४५दोऽ६"हाइ ॥
दी. १५. उत्. १५. मा. २०. मौ. ॥५८९॥

---

[1] अष्टसप्तत्युत्तरशततमसूक्ते गीयते । [2] त्रयोविंशत्युत्तरद्विशततमसूक्ते गीयते ।

५५

३३२. वसिष्ठो मैत्रावरुणिः। बृहतीसतोबृहत्यौ। इन्द्रः॥

१ २र ३ १ २र
१०३२. कस्तमिन्द्र त्वावस ( वा मर्त्यो दधर्षति।
३ १ २र ३ १ २ ३ २ ३ १ २र
श्रद्धा हि ते मघवन्पार्ये दिवि वाजी वाज॰सिषासति) ॥१॥
३ १ २ ३ १ २ ३ १ २र ३ १ २र
१०३३. मघोनस्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु।
२ ३ १ २ ३ २ ३ १ २ ३ २
तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥२॥

धा॰ १७. उ. न. स्व. ३. यि. ॥९॥

द्वितीयः खण्डः॥

---

२ ३ २ १२र ३
३३२. कः। तम्। इन्द्र। त्वावसो। त्वा। वसो। आ। मर्त्यः। दधर्षति।
२ ३ २ ३ १२र ३ २ ३ २ १२र ३
श्रद्धा। श्रत्। धा। हि। ते। मघवन्। पार्ये। दिवि। वाजी। वाजम्। सिषासति॥
३ १ २ ३ १ २ ३ १२र ३ २ १२र ३ २ १२र १२र
मघोनः। स्म। वृत्रहत्येषु। वृत्र। हत्येषु। चोदय। ये। ददति। प्रिया। वसु। तव।
१२र ३ १ २ १ २र ३
प्रणीती। प्र। नीती। हर्यश्व। हरि। अश्व। सूरिभिः। विश्वा। तरेम।
२ ३ २
दुरिता। दुः। इता॥

---

१७. [1]क्रौञ्चाद्यम्॥ क्रुङ्। अनुष्टुप्। पवमानस्सोमः॥

२ १२र २र १ २र १ २ ४
अयंपूषौहो। रायिर्भगाः॥ सोम४पुना३। नोआ३र्षा५ता-
२ १ र २र १र २ १ २
६५६इ॥ पतिर्विश्वौहो। स्याभूमनाः। वियख्यद्रो३। दासी३-
४ २ १ र २र१र २र र
ऊ५"भा६५६इ॥ श्रीः॥ सम्प्रियौहो। आनूषता॥ गावोमदा३।
१ २ ४ २र र १ र २र१र २ र
याघा३र्घ्वा५या६५६ः॥ सोमास४कौहो। ण्वातेपथाः॥ पवमाना३।
१ २ ४ २ र १ र २र१र २ र
साआ३इन्दा५"वा६५६ः॥श्रीः॥यओजिष्ठौहो। तामाभरा॥ पवमाना३।
१ २ ४ २ १ र २र१र २ र
आवा३आ५या६५६म्॥ य४पञ्चचौहो। षाणोरभाइ॥ रयिंयेना३।
१ २ ४
वाना३मा५"हा६५६इ॥ दी॰ २७. उत्॰ १२. मा॰ १६. फू॰ ५९०॥॥

१८. महावामदेव्यम्॥ वामदेवः। बृहती। इन्द्रः॥

३ ४ २ ४र ५ १ र र
का५स्तम्। इन्द्रा३तू३वावसाउ॥ आ। मर्त्योदधर्षतिश्रद्धा-
र र २र १ २ र २ १र २ ३ र २
हितेमघवन्पार्येदि। वा। औ३होहाइ। वाजा२३इर्वाजाम्॥ सिषौहो३।

---

[1] एकषष्टितमसूक्ते गीयते।

हुम्माऽ२ । साऽ२तोऽ३५"हाइ ॥श्रीः॥ वाऽ५जी । वाजाऽ३ऽसाऽ३इषा-
सताइ ॥ वा । जीवाजऽसिषासतिमघोनस्मवृत्रहत्येषुचोद । या । औऽ३-
होहाइ । येदाऽ२३दताइ ॥ प्रियौहोऽ३ । हुम्माऽ२ ॥ वाऽ२सोऽ३५"-
हाइ ॥श्रीः॥ येऽ५द । दताऽ३इप्रीऽ३यावसाउ ॥ ये । ददतिप्रियावसुत-
वप्रणीतीहर्यश्वसूरि । भाइः । औऽ२३होहाइ । विश्वाऽ२३तराइ ॥ मदौ-
होऽ३ । हुम्माऽ२ ॥ आऽ२इतोऽ३५"हाइ ॥

दी. २९. उत् . न. मा. १९. लो. ॥५९१॥

१९. [1]सैन्धुक्षितम् ॥ सिन्धुक्षित् । गायत्री । पवमानस्सोमः ॥

तिस्रोवाचो । हाइ ॥ उदीराऽ२३ताइ । गावोमिमन्तिधाऽ१-
इनाऽ३वाः ॥ हरिरेतोऽ२३४हाइ ॥ कानाऽ३इहाइ । क्रदात् । औ-
ऽ२३होवा ॥ श्रीः ॥ अभिब्रह्मो । हाइ ॥ अनूषाऽ२३ता । यह्वीर्ऋतस्यमा-
ऽ१ताऽ३राः ॥ मर्जयन्तोऽ२३४हाइ ॥ दाइवाऽ३हाइ । शिशूम् । औ-
ऽ२३होवा ॥श्रीः॥ रायस्समो । हाइ ॥ द्राऽश्वतूऽ२३राः । अस्मभ्यऽसोम-
वाऽ१इश्वाऽ३ताः ॥ आपवस्वोऽ२३४हाइ । साहाऽ३हा । स्रिणा ।
औऽ३होवा । होऽ५इ ॥डा॥

दी. १२. उ. ७. मा. २०. छौ. ॥५९२॥

तृतीयो विंशः ॥

पञ्चदशस्यार्द्धःप्रपाठकः ॥

१. [2]स्वारं त्वाष्ट्रीसाम ॥ त्वाष्ट्र्यः । अनुष्टुप् । पवमानस्सोमः ॥

सुतासोमाऽ३हा । धुमत्तामाऽ२ः ॥ सोमाइन्द्राऽ३हा । यमन्दा-
इनाऽ२ः ॥ पवित्रवाऽ३हा । तोअक्षाराऽ२न् ॥ देवान्गच्छाऽ३हा । तुवो-
ऽ३होऽ२३४ । वा । माऽ५दोऽ६"हाइ ॥श्रीः॥ इन्दुरिन्द्राऽ३हा । यपवा-
ताऽ२इ ॥ इतिदेवाऽ३हा । सोअब्रूवाऽ२न् ॥ वाचस्पताऽ३इहाइ ।

---

[1] अष्टसप्ततितमसूक्ते गीयते ।        [2] एकोनाशीतितमसूक्ते द्वे सामनी गीयेते ।

मखस्याताऽ२इ ॥ विश्वस्येशाऽ३हा । नञोऽ३होऽ२३४ । वा । जाऽ५-
सोऽ६"हाइ ॥ श्रीः ॥ सहस्रधाऽ३हा । र४पवाताऽ२इ ॥ समुद्रोवाऽ३हा ।
चमीङ्खायाऽ२ः ॥ सोमस्पताऽ३इहाइ । रयाइणाऽ२म् ॥ सखेन्द्रस्याऽ३हाइ ।
दिवाऽ३होऽ२३४ । वा । दाऽ५इवोऽ६"हाइ ॥

दी. १५. उ. १. मा. २४. पी. ॥५९३॥

२. द्विरभ्यासं त्वाष्ट्रीसाम ॥ त्वाष्ट्र्यः । अनुष्टुप् । पवमानस्सोमः ॥

सुता । सोमाऽ३ । हाऽ३हा । धुमत्तामाऽ२३४ः ॥ सोमाः ।
इन्द्राऽ३ । हाऽ३हा । यमन्दाइनाऽ२३४ः ॥ पवि । त्रवाऽ३ । हाऽ३हा ।
तोअक्षाराऽ२३४न् ॥ देवान् । गच्छाऽ३ । हाऽ३हा । तुवोऽ३होऽ२३४ ।
वा । माऽ५दोऽ६"हाइ ॥श्रीः॥ इन्दुः । इन्द्राऽ३ । हाऽ३हा । यपवाता-
ऽ२३४इ ॥ इति । देवाऽ३ । हाऽ३हा । सोअब्रूवाऽ२३४न् ॥ वाचः ।
पताऽ३इः । हाऽ३हाइ । मखस्याताऽ२३४इ ॥ विश्व । स्येशाऽ३ । हा-
ऽ३हा । नञोऽ३होऽ२३४ । वा । जाऽ५सोऽ६"हाइ ॥ श्रीः ॥ सह ।
स्रधाऽ३ । हाऽ३हा । र४पवाताऽ२३४इ ॥ समु । द्रोवाऽ३ । हाऽ३हा ।
चमीङ्खायाऽ२३४ः ॥ सोमः । पताऽ३इ । हाऽ३हाइ । रयाइणाऽ२३४म् ।
सखे । द्रस्याऽ३ । हाऽ३हाइ । दिवाऽ३होऽ२३४ । वा । दाऽ५इवो-
ऽ६"हाइ ॥

दी. १५. उ. १. मा. २९. पो. ॥५९४॥

३. [1]पृश्नि ॥ भरद्वाजः । बृहती । पवमानस्सोमः ॥

पुनानाऽ२३स्सोमधारयाहाउ ॥ अपोवसानोअर्षसि । आराताऽ१-
घाऽ२३ः । होवाऽ३हाइ । योनिमृत । स्यसाइदाऽ१साऽ२३इ । होवा-
ऽ३हाइ ॥ उत्सोदाऽ१इवाऽ२३ः । होवाऽ३हाइ ॥ हाइरण्ययः । इडाऽ२३ ॥
श्रीः ॥ उत्सोदाऽ२३इवोहिरण्ययोहाउ ॥ उत्सोदेवोहिरण्ययः । दुहाना-

[1] नवमे सूक्ते द्वे सामनी गीयेते ।

ऽ१ऊऽ२३ । होवाऽ३हाइ । घार्दिवियम् । मधूप्राऽ१याऽ२३म् । होवा-
ऽ३हाइ ॥ प्रत्नाꣳसाऽ१घाऽ२३ । होवाऽ३हा ॥ स्थामासदत् । इडाऽ२३ ॥
श्रीः ॥ प्रत्नाꣳसाऽ२३घस्थमासदद्धाउ ॥ प्रत्नꣳसधस्थमासदत् । आपार्छी-
ऽ१याऽ२३म् । होवाऽ३हाइ ॥ धारुणंवा । जियार्षाऽ१साऽ२३इ । होवा-
ऽ३हाइ ॥ नृभाइर्धौऽ१ताऽ२३ः । होवाऽ३हाइ ॥ वाइचक्षणः । इडाऽ२३-
भाऽ३४३ । ओऽ२३४५इ ॥डा॥                दी. १८. उ. ८. मा. ३३. डि. ॥५९५

४. आभीशवोत्तरम् ॥ अभीशुः । बृहती । पवमानस्सोमः ॥

पुनानस्सोमधारयाए । ए ॥ अपोवसाऽ३नोअर्षसाइ ॥ आ-
ऽ२३४रा । हाऽ३हा ॥ त्वधायोनिमृतस्यासीऽ१दसाइ ॥ ऊऽ२३४त्साः ।
हाऽ३हाइ ॥ दाइवोहिरोऽ२३४वा ॥ ण्याऽ५योऽ६"हाइ ॥ श्रीः ॥ उत्सो-
देवोहिरण्ययए । ए॥ उत्सोदेवोऽ३हाइरण्ययाः ॥ दूऽ२३४हा । हाऽ३हा ॥
नऊघर्दिवियंमाधुप्रायम् ॥ प्राऽ२३४त्नाम् । हाऽ३हाइ ॥ साधस्थमो-
ऽ२३४वा । साऽ५दोऽ६"हाइ ॥ श्रीः ॥ प्रत्नꣳसधस्थमासददे । ए ॥
प्रत्नꣳसधऽ३स्थामाऽ१सदात् ॥ आऽ२३४पा । हाऽ३हा ॥ छूयंधरुणं-
वाजायर्षासाइ ॥ नृऽ२३४भीः । हाऽ३हाइ ॥ धौतोविचोऽ२३४वा ।
क्षाऽ५णोऽ६"हाइ ॥                दी. १९. उ. न. मा. २१. ल. ॥५९६॥

५. [1]वासिष्ठम् ॥ वसिष्ठः । त्रिष्टुप् । इन्द्रः ॥

औहोवाहाऽ३होइ । इहा । अयꣳसोमाः । इन्द्रतु । भ्यꣳसुन्वाइ ॥
तुभ्यंपवा । ताऽ३इतुवम् । अस्यपाही ॥ तुवꣳहयाम् । चकृषे । त्वंव-
वृषाइ ॥ इन्दुम्मदा । याऽ३युजि । याऽ३४३ । याऽ३सोऽ५"मा-
ऽ६५६म् ॥ श्रीः ॥ सईꣳरथो । नभुरि । षाडयोजी ॥ महꣲपुरू ।
णीऽ३सात । याइवस्वनी ॥ आदींविश्वा । नहुषि । याणिजाता ॥ सुवर्षाता ।

[1] त्रिपञ्चाशदुत्तरद्विशततमसूक्ते गीयते ।

३३३. विश्वमना वैयश्वः। उष्णिक्। इन्द्रः॥

१०३४. एदु मधोर्मदिन्तरꣳसिञ्चाध्वर्यो अन्धसः।
एवा हि वीर स्तवते सदावृधः ॥१॥

१०३५. इन्द्र स्थातर्हरीणां न किष्टे पूर्व्यस्तुतिम्।
उदानꣳश शवसा न भन्दना ॥२॥

१०३६. तं वो वाजानां पतिमहूमहि श्रवस्यवः।
अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥३॥

धा. १६. उ. १. स्व. १. क. ॥१०॥

---

३३३. आ। इत्। उ। मधोः। मदिन्तरम्। सिञ्च। अध्वर्यो। अन्धसः। एव। हि। वीरः। स्तवते। सदावृधः। सदा। वृधः॥ इन्द्र। स्थातः। हरीणाम्। न। किः। ते। पूर्व्यस्तुतिम्। पूर्व्य। स्तुतिम्। उत्। आनꣳश। शवसा। न। भन्दना। तम्। वः। वाजानाम्। पतिम्। अहूमहि। श्रवस्यवः। अप्रायुभिः। अ। प्रायुभिः। यज्ञेभिः। वावृधेन्यम्॥

---

वनऊ। ध्वाऽ३४३। नाऽ३वाऽ५"न्ताऽ६५६॥ श्रीः॥ शुष्मीशर्द्धो। नमारु। तंपवस्वा॥ अनभिशा। स्ताऽ३दिवि। यायथावीट्॥ आपोनमा। चूऽ३सुम। तिर्भवानाः॥ औहोवाहाऽ३होइ। इहा। सहस्राप्साः। पृतना। षाऽ३४३ट्। नाऽ३याऽ५"ज्ञाऽ६५६ः॥ दी. २०. उ. १९. मा. १७. मे. ॥५९७॥

६. महावामदेव्यम्॥ वामदेवः। उष्णिक्। इन्द्रः॥

एऽ५दु। मघोऽ३र्माऽ३दिन्तराम्॥ साइ। चाध्वर्योअन्धस-एवाहि। वा। औऽ३होहाइ। रस्ताऽ२३वताइ॥ सदौहोऽ३। हुम्माऽ२॥ वाऽ२घोंऽ३५"हाइ॥ श्रीः॥ आऽ५इन्द्र। स्थाताऽ३र्हाऽ३रीणाम्॥ ना। किष्टेपूर्व्यस्तुतिमुदा। ना। औऽ३होहाइ। शशाऽ२३वसा॥ नभौहोऽ३। हुम्माऽ२॥ दाऽ२नोऽ३५"हाइ॥श्रीः॥ ताऽ५म्वः। वाजाऽ३नाऽ३म्पता-

इम् ॥ आ । हूमहिश्रवस्यवोप्रायु । भाइः । औऽ२३होहाइ । यज्ञाऽ२३-
इर्भिर्वा ॥ वृधौहोऽ३ । हुम्माऽ२ ॥ न्याऽ२मोऽ३५"हाइ ॥

दी· १९· उ· न· मा· १९· लो· ॥४९८॥

७· [1]गौषूक्तम् ॥ गौषूक्तिः । गायत्री । पवमानस्सोमः ॥

परिसुवानोगौ । हौहोवाहाइ । रिष्ठाः ॥ पवित्रेसोमऔऽ२ ।
हुवाइ । हुवाऽ२इ । क्षाराऽ२त् ॥ श्रीः ॥ तुवंविप्रस्तुवौ । हौहोवाहाइ ।
कवाइः ॥ मधुप्रजातमौऽ२ । हुवाइ । हुवाऽ२इ । घासाऽ२ः ॥ तुवेविश्वे-
सजौ । हौहोवाहाइ । षसाः ॥ देवास॒पीतिमौऽ२ । हुवाइ । हुवाऽ२इ ।
शाताऽ२ ॥ मंदेषुसर्वधौऽ२ । हुवाइ । हुवाऽ२इ ॥ आसाऽ२३इ ।
होऽ२वाऽ२३४औहोवा ॥ अग्निराहुताऽ२३४५ः ॥

दी· २०· उ· ४· मा· २१· भ· ॥५९९॥

८· [2]वारवन्तीयम् ॥ इन्द्रः । उष्णिक् । पवमानस्सोमः ॥

प्राणाशिशाऔहोहाइ ॥ माहाऽ२३४इनाम् । हिन्वानाऽ२३४हा ।
तस्यदीधितिंविश्वापाऽ३४ । औहोवा । इहाऽ२३४हाइ । उहुवाऽ२३४राइ ॥
प्रियाशु । वादधद्वाऽ३४ । औहोवा ॥ इहाऽ२३४हाइ । औहोऽ३१२३४ ।
ता । एहियाऽ६हा ॥ ॥श्रीः॥ उपत्रिताऔहोहाइ ॥ स्यापाषाऽ२३४योः ।
अभाक्ताऽ२३४हा । यद्गुहापदंयज्ञस्याऽ३४ । औहोवा । इहाऽ२३४हाइ ।
उहुवाऽ२३४सा ॥ सधाम । भाइरधप्राऽ३४ । औहोवा ॥ इहाऽ२३४हाइ ।
औहोऽ३१२३४ । याम् । एहियाऽ६हा ॥ श्रीः ॥ त्रीणित्रिताऔहोहाइ ॥
स्याधाराऽ२३४या । पृष्ठाइषूऽ२३४हाइ । ऐरयद्रयिंमिमीताऽ३४ । औहोवा ।
इहाऽ२३४हाइ । उहुवाऽ२३४आ ॥ स्ययोज । नाविसुक्राऽ३४ । औहोवा ॥
इहाऽ२३४हाइ । औहोऽ३१२३४ । तूः । एहियाऽ६हा । होऽ५इ ॥डा॥

दी· ३५· उ· ९· मा· २३· भि· ॥६००॥

---

[1] पञ्चचत्वारिंशदुत्तरशततमसूक्ते गीयते ।     [2] त्रयोविंशत्युत्तरशततमसूक्ते गीयते ।

९. [1]सत्रासाहीयम् ॥ इन्द्रः। गायत्री। पवमानस्सोमः ॥

पवाऽ३४। स्वदक्षसाधनः। ओऽ६वा ॥ देवेभ्य॰पीतयेहाऽ२-
राइ। माऽ२रू। दूम्योऽ२३वा ॥ यवौऽ३हो। वाहाऽ३४३इ ॥ माऽ२३४-
दोऽ६"हाइ ॥श्रीः॥ सन्देऽ३४। वैश्शोभतेवृषा। ओऽ६वा ॥ कविर्योनाव-
धिप्राऽ२याः। पाऽ२वा। माऽ२३नाः ॥ अदौऽ३हो। वाहाऽ३४३इ ॥
भाऽ२३४योऽ६"हाइ ॥ श्रीः ॥ पवाऽ३४। मानधियाहितः। ओऽ६वा ॥
अभियोनिंकनिक्राऽ२दात्। धाऽ२र्मा। णाऽ२३वा ॥ युमौऽ३हो। वाहा-
ऽ३४३इ ॥ रूऽ२३४होऽ६"हाइ ॥ दी. २०. उ. न. मा. १२. वा. ॥६०१॥

१०. [2]बृहद्भारद्वाजम् ॥ भरद्वाजः। गायत्री। पवमानस्सोमः ॥

परिप्रिया ॥ दिव॰कवाइः। वया॰साऽ२३इना। प्तियोर्हिताः ॥
स्वानैर्याऽ२३ताइ। आ। औऽ३होवा। काविक्रतुः। इडाऽ२३ ॥ श्रीः ॥
सद्मनुर्मा ॥ तराशुचाइः। जातोजाऽ२३ते। अरोचयात् ॥ महान्माऽ२३ही।
आ। औऽ३होवा ॥ आर्तावृध। इडाऽ२३ ॥श्रीः॥ प्रप्रक्षया ॥ यपन्यसाइ।
जनायाऽ२३जू। ष्टोअद्रुहाः ॥ वीतियाऽ२३र्षा। आ। औऽ३होवा ॥
पानिष्टये। इडाऽ२३भाऽ३४३। ओऽ२३४५इ ॥डा॥

दी. १८. उ. ६. मा. १३. टि. ॥६०२॥

११. [3]क्रोशम् ॥ इन्द्रः। उष्णिक्। पवमानस्सोमः ॥

सोमाः ॥ पुनानऊर्मि। णा। होईऽ२। हो। वाहोइ। अव्यं-
वारंविधावताइ। अग्राइवाऽ१चाऽ२३ः ॥ पाऽ३वामाऽ३नाः ॥ कनाऽ२३इ-
क्रदाऽ३४३त् ॥ श्रीः ॥ धीभीः ॥ मृजन्तिवाजि। नम्। होईऽ२। हो।
वाहोइ। वनेक्रीडन्तमत्यवाइम्। अभाइत्राऽ१इपाऽ२३ ॥ ष्टाऽ३म्माता-
ऽ३याः ॥ समाऽ२३स्वराऽ३४३न् ॥श्रीः॥ असा ॥ जिकलशा॰अ। भि।

---

[1] त्रिनवतितमसूक्ते गीयते।

[2] एकोनशततमसूक्ते गीयते।

[3] एकोत्तरशततमसूक्ते गीयते।

होईऽ२ । हो । वाहोइ । मीढ्वान्त्सम्निर्नवाजयूः । पुनानोऽ१वाऽ२३ ॥ चाऽ३ज्ञानाऽ३यान् ॥ असाऽ२३इष्यदाऽ३४३त् । ओऽ२३४५इ ॥डा॥

दी. १७. उ. ९. मा. २८. ञ्चै. ॥६०३॥

१२. [1]वाम्रम् ॥ वम्रः । बृहती । पवमानस्सोमः ॥

परीतोषिञ्चता । हाऽ३हाऽ३इ । सूऽ२३४ । तꣳसुतोवा ॥ सोमोहोऽ२इ । यऊहोऽ२ । तामꣳहावाऽ२इः । दाधन्वाꣳयः । नराइ-योआ । प्सुवाउवाऽ३ । ऊऽ३४पा । तराऽ२ ॥ सुषाऽ२वासोऽ२ ॥ मम । द्राऽ२इभाऽ२३४औहोवा ॥ श्रीः ॥ सुषावसोममा । हाऽ३हाऽ३इ । द्राऽ२३४इ । भिद्रिभोवा ॥ सुषाहोऽ२इ । वसाहोऽ२ । मामद्राइभाऽ२इः । नूनंपुना । नोआवाइभाइः । पराउवाऽ३ । ऊऽ३४पा । स्रवाऽ२ ॥ आदाऽ२-ब्धास्यूऽ२ । रभि ॥ ताऽ२राऽ२३४औहोवा ॥ श्रीः ॥ अदब्धस्सुरभि । हाऽ३हाऽ३इ । ताऽ२३४ । रस्तरोवा ॥ अदाहोऽ२इ । ब्धस्सुहोऽ२ । राभिन्ताराऽ२ः । सुतेचित्वा । प्सुमादा । मआउवाऽ३ । ऊऽ३४पा । धसाऽ२ ॥ श्राइणाऽ२न्तोगोऽ२ ॥ भिरु । ताऽ२राऽ२३४औहोवा ॥ ऊऽ३२३४पा ॥

दी. १८. उ. ६. मा. ३०. टौ. ॥६०४॥

१३. मानवोत्तरम् ॥ मनुः । बृहती । पवमानस्सोमः ॥

होवाइ । परीतोषिञ्चतासुतम् । होवाइ ॥ सोमोयउत्तमꣳहविः । दाधन्वाꣳयः । नारियोआऽ३१ । प्सुवाऽ२न्ताऽ२३४रा ॥ सुषावाऽ२३-सोऽ३ ॥ माऽ२माऽ२३४औहोवा ॥ द्राऽ२३४इभीः ॥ श्रीः ॥ होवाइ । सुषावसोममद्रिभिः । होवाइ ॥ सुषावसोममद्रिभिः । नूनंपुना । नोअ-विभाऽ३१इः । पराऽ२इस्राऽ२३४वा ॥ अदाब्धाऽ२३स्यूऽ३ ॥ राऽ२-भाऽ२३४औहोवा ॥ ताऽ२३४राः ॥श्रीः॥ होवाइ । अदब्धस्सुरभिन्तरः ।

[1] अष्टनवत्युत्तरशततमसूक्ते त्रीणि सामानि गीयन्ते ।

५६

होवाइ ॥ आदब्धस्सुरभिन्तरः । सूतेचित्वा । आप्सुमदाऽ३१ । मोआ-
ऽ२न्धाऽ२३४सा ॥ श्रीणान्तोऽ२३गोऽ३ ॥ भाऽ२इरूऽ२३४औहोवा ॥
ताऽ२३४राम् ॥ दी. २१. उ. ४. मा. २८. धै. ॥६०५॥

१४. आनूपं वाध्र्यश्वम् ॥ आनूपः । बृहती । पवमानस्सोमः ॥

पराइपराइ ॥ तोषिश्वऽ३तास्वऽ१ताऽ२म् । सोमोयउ । तमाऽ६हा-
ऽ१वाऽ२इः । दाधाऽ२न्वऽ६याऽ२ः । नर्योअप्सुवन्ताऽ२३रा ॥ सुषावाऽ३-
सोऽ३ ॥ माऽ२३माऽ३ । द्राऽ३४५इभोऽ६"हाइ ॥ श्रीः ॥ सुषासुषा ॥
वसोमऽ३माद्राऽ१इभाऽ२इः । सूषावसो । ममाद्राऽ१इभाऽ२इः । नूनाऽ२-
म्पूनाऽ२ । नोअविभि४परिस्राऽ२३वा ॥ अदाब्धाऽ३स्सूऽ३ ॥ राऽ२३-
भाऽ३इ । ताऽ२४५रोऽ६"हाइ ॥ श्रीः ॥ अदाअदा ॥ ब्धस्सुरऽ३भाइन्ता-
१राऽ२ः । आदब्धस्सु । रभाइन्ताऽ१राऽ२ः । सूतेऽ२चाइत्वाऽ२ । अप्सु-
मदामोअन्धाऽ२३सा ॥ श्रीणान्तोऽ३गोऽ३ ॥ भाऽ२३इरूऽ३ । ताऽ३४५-
रोऽ६"हाइ ॥ दी. १०. उ. ३. मा. २८. बै. ॥६०६॥

१५. [1]अग्नेस्त्रिणिधनम् ॥ अग्निः । बृहती । पवमानस्सोमः ॥

श्रीणन्तोगो ॥ भाइरुत्ताऽ२३४राम् । श्रीणन्तोगोभिरूऽ३आउवा-
ऽ२३ । ताऽ२३४राम् ॥ पारिस्वाऽ२३४नाः ॥ चक्षसेदेवमाऽ३१उवाऽ२३ ।
दाऽ२३४नाः ॥ क्रतूराऽ२३४इन्दूः ॥ विचाऽ३१उवाऽ२३ । क्षाऽ२३४णाः ॥
दी. ७. उ. २. मा. १२. छा. ॥६०७॥

१६. [2]श्यावाश्वम् ॥ श्यावाश्वः । अनुष्टुप् । पवमानस्सोमः ॥

सोमाऽ३१ः । पाऽ३व । तइ । दाऽ३वः । एहिया ॥ आ ।
समभ्यञ्जातू । वि । तमाऽ२ः । एहियाऽ२ । मित्रास्वानाआऽ३रेऽ३ ॥
पाऽ२३४साः ॥ ऐहाऽ२इ । एहियाऽ२ । सुत्राधियास्सूऽ३वाऽ३ः ।

---

[1] अष्टनवत्युत्तरशततमसूक्तस्य द्वितीयस्याश्चतुर्थपादे द्विपदाविराजि च गीयते ।

[2] अष्टाचत्वारिंशदुत्तरशततमसूक्ते त्रीणि सामानि गीयन्ते ।

वाऽ३४५इदोऽ६"हाइ ॥श्रीः॥ तेपूऽ३१ । ताऽ३सो । विपः । चाऽ३इतः । एहिया ॥ सो । मासीदधाइ । आ । शिराऽ२ः । एहियाऽ२ । स्वरासोना-दाऽ३शाऽ३ ॥ ताऽ२३४साः ॥ ऐहाऽ२इ । एहियाऽ२ । जिगत्नवोध्रूऽ३-वाऽ३ः । घाऽ३४५र्तोऽ६"हाइ ॥ श्रीः ॥ सुष्वाऽ३१ । णाऽ३सो । विय । द्राऽ३इभिः । एहिया ॥ चाइ । तानागोरा । घि । त्वचाऽ२इ । एहियाऽ२ । इषमस्माभ्याऽ३माऽ३ ॥ भाऽ२३४इताः ॥ ऐहाऽ२इ । एहियाऽ२ । समस्वरान्वाऽ३सूऽ३ । वाऽ३४५इदोऽ६"हाइ ॥

दी. २४. उ. ९. मा. २८. धै. ॥६०८॥

१७. आन्धीगवम् ॥ अन्धीगुः । अनुष्टुप् । पवमानस्सोमः ॥

सोमा×पवन्तआऽ१इन्दावाः ॥ अस्मभ्यम् । गातूऽ२३वा । हुम्माऽ२१२ । तमामित्रास्वानाअरेपसाऽ२३४५ः ॥ स्वाऽ३उवा ॥ घोऽ२याः । सूऽ२३वाः । विदा । औऽ३होवा ॥ श्रीः ॥ तेपूतासोविपा-ऽ१श्चाइताः ॥ सोमासः । दधाऽ२३आ । हुम्माऽ२१२ । शिरस्स्वरासोन-दर्शतासाऽ२३४५ः ॥ जाइगाऽ३उवा ॥ त्नाऽ२वो । घ्रूऽ२३वाः । घृता । औऽ३होवा ॥ श्रीः ॥ सुष्वाणासोवियाऽ१द्राइभाइः ॥ चितानाः । गोरा-ऽ२३धा । हुम्माऽ२१२ । त्वचीषमस्मभ्यमभिताऽ२३४५ः ॥ सामाऽ३-उवा ॥ स्वाऽ२रान् । वाऽ२३सू । विदा । औऽ३होवा । होऽ५इ ॥डा॥

दी. २५. उ. ६. मा. २५. पु. ॥६०९॥

१८. निषेधः ॥ अङ्गिरसः । अनुष्टुप् । पवमानस्सोमः ॥

सोमा×पवन्ताऽ३इन्दवाः ॥ अस्माभ्यङ्गा । तुवित्तमाऽ२ः । इहाऽ३ ॥ माइत्राऽ३स्वानाः । हाहोऽ२३४हा ॥ अरेपाऽ२३साः । इहाऽ३ ॥ स्वाऽ३धीयाः । हाहोऽ२३४हा ॥ सुवाऽ३वीऽ५इदाऽ६५६ः ॥ श्रीः ॥ तेपूतासोवाऽ३इपश्चिताः ॥ सोमासोदा । धियाशिराऽ२ः । इहाऽ३ ॥

स्वराऽ३सोना । हाहोऽ२३४हा ॥ दर्शताऽ२३साः । इहाऽ३ । जाइगा-
ऽ३त्नावाः । हाहोऽ२३४हा ॥ ध्रुवाऽ३घाऽ५र्ताऽ६५६इ ॥श्रीः॥ सुष्वाणा-
सोवाऽ३यद्रिभाइः ॥ चितानागोः । अधित्वचाऽ२इ । इहाऽ३ ॥ आइषा-
ऽ३मास्मा । हाहोऽ२३४हा ॥ भ्यमभाऽ२३इताः । इहाऽ३ ॥ सामाऽ३-
स्वारान् । हाहोऽ२३४हा ॥ वसूऽ३वाऽ५इदाऽ६५६ः ॥ हेऽ२३४५ ॥

दी. १४. उ. ९. मा. २६. धू. ॥६१०॥

१९. [1]श्यावाश्वम् ॥ श्यावाश्वः । अनुष्टुप् । पवमानस्सोमः ॥

पवाऽ३१ । स्वाऽ३वा । जसा । ताऽ३ये । एहिया ॥ पा ।
वित्रेधारा । या । सुताऽ२ः । एहियाऽ२ । इन्द्रायसोमाऽ३वाऽ३इ ॥
ष्णाऽ२३४वाइ ॥ ऐहाऽ२इ । एहियाऽ२ । देवेभ्योमाधूऽ३माऽ३ । ता-
ऽ३४५रोऽ६"हाइ ॥ श्रीः ॥ तुवाऽ३१म् । राऽ३इह । तिधी । ताऽ३यः ।
एहिया ॥ हा । रिंपवित्रे । अ । द्रुहाऽ२ः । एहियाऽ२ । वत्सञ्जातान्ना-
ऽ३माऽ३ ॥ ताऽ२३४राः ॥ ऐहाऽ२इ । एहियाऽ२ । पवमानावाऽ३-
इधाऽ३ । माऽ३४५णोऽ६"हाइ ॥ श्रीः ॥ तुवाऽ३१म् । द्याऽ३श्च । महि ।
व्राऽ३त । एहिया ॥ पा । थिवीश्चाताइ । ज । भ्रिषाऽ२इ । एहियाऽ२ ।
प्रतिद्रापाइमाऽ३मूऽ३ ॥ चाऽ२३४थाः ॥ ऐहाऽ२इ । एहियाऽ२ ।
पवमानामाऽ३हाऽ३इ । त्वाऽ३४५नोऽ६"हाइ ॥

दी. २६. उ. ९ मा. २१. घ. ॥६११॥

२०. आन्धीगवम् ॥ अन्धीगुः । अनुष्टुप् । पवमानस्सोमः ॥

पवस्ववाजसाऽ१तायाइ ॥ पवित्रे । धाराऽ२३या । हुम्माऽ२१२ ।
सुतइन्द्रायसोमविष्णवाऽ२३४५इ ॥ दाइवाऽ३उवा ॥ भ्योऽ२मा । धूऽ२३-
मा । तरा । औऽ३होवा ॥ श्रीः ॥ त्वांरिहन्तिधाऽ१इतायाः ॥ हरिंप ।
वित्रेऽ२३आ । हुम्माऽ२१२ । द्रुहोवत्सञ्जातन्नमातराऽ२३४५ः ॥ पावा-

[1] चतुर्विंशत्युत्तरशततमसूक्ते त्रीणि सामानि गीयन्ते ।

ऽ३उवा ॥ माऽ२ना । वाऽ२३इधा । मणा । औऽ३होवा ॥ श्रीः ॥
त्वन्द्याश्चमहाऽ१इत्राता ॥ पृथिवीम् । चाताऽ२३इजा । हुम्माऽ२१२ ।
भ्रिषेप्रतिद्रापिमुश्चथाऽ२३४५ः ॥ पावाऽ३उवा ॥ माऽ२ना । माऽ२३-
हाइ । त्वना । औऽ३होवा । होऽ५इ ॥डा॥ दी.१४. उ. ६. मा. १८. तै. ॥६१२॥

चतुर्थो विंशः ॥

२१. आकूपारम् ॥ अकूपारः । अनुष्टुप् । पवमानस्सोमः ॥

पवस्वाऽ२३वाज । साताऽ२३४याइ ॥ पवाऽ२इत्रेधा । रयासुताः ।
इन्द्रायासोऽ२ । मविष्णवाइ ॥ देवेभ्योमाऽ२३ ॥ धूऽ२३माऽ३ । ता-
३४५रोऽ६''हाइ ॥ श्रीः ॥ तुवा ऽराऽ२३इहन्ति । धीताऽ२३४याः ॥
हराऽ२इम्पवाइ । त्रेअद्रुहाः । वत्सञ्जाताऽ२म् । नमातराः ॥ पवमानाऽ२३ ।
वाऽ२३इधाऽ३ । माऽ३४५णोऽ६''हाइ ॥ श्रीः ॥ तुवंद्याऽ२३श्चम । हित्रा-
ऽ२३४ता ॥ पृथाऽ२इवीश्चा । तिजभ्रिषाइ । प्रतिद्रापाऽ२इम् । अमुश्चथाः ॥
पवमानाऽ२३ ॥ माऽ२३हाऽ३इ । त्वाऽ३४५नोऽ६''हाइ ॥

दी. १२. उ. १५. मा. २२. ञा. ॥६१३॥

पञ्चदशःप्रपाठकः ॥

१. [1]क्रौञ्चाद्यम् ॥ क्रुङ् । अनुष्टुप् । पवमानस्सोमः ॥

सोमा ऽपवौहो । ताइन्दवाः ॥ अस्मभ्यङ्गाऽ३ । तूत्राऽ३इत्ताऽ५-
माऽ६५६ः ॥ मित्रास्वानौहो । आरेपसाः । सुवाधियाऽ३ः । स्ववाऽ३र्वा-
ऽ५इ''दाऽ६५६ः ॥ श्रीः ॥ तेपूतासौहो । वीपश्चिताः ॥ सोमासोदाऽ३ ।
घाआऽ३शाऽ५इराऽ६५६ः ॥ सूरासोनौहो । दर्शतासाः ॥ जिगत्नवोऽ३ ।
ध्रूवाऽ३घाऽ५''र्ताऽ६५६इ ॥ श्रीः ॥ सुष्वाणासौहो । वीयद्रिभाइः ॥ चिता-
नागोऽ३ः । आधाऽ३इत्वाऽ५चाऽ६५६इ ॥ इषमस्मौहो । भ्यामभिताः ॥
समस्वराऽ३न् । वासूऽ३वाऽ५इ''दाऽ६५६ः ॥दी.३१. उ.१२. मा.२३.खि. ॥६१४॥

---

[1] अष्टाचत्वारिंशदुत्तरशततमसूक्ते गीयते ।

२. [1]ऊर्ध्वेडं त्वाष्ट्रीसाम ॥ त्वाष्ट्र्यः । अनुष्टुप् । पवमानस्सोमः ॥

सुतासोमधुमत्तमाः ॥ सोमाऽ२इन्द्राऽ२ । यमाऽ३४५ । दीऽ२३४-
नाः । पवित्रवन्तोअक्षराऽ२३४५न् ॥ देवान्गच्छा ॥ तुवोमाऽ२३दा-
ऽ३४३ः ॥श्रीः॥इन्दुरिन्द्रायपवताइ ॥ आइताऽ२इदेवाऽ२ । सोआऽ३४५ ।
भ्रूऽ२३४वान् । वाचस्पतिर्मखस्यताऽ२३४५इ ॥ विश्वस्येशा ॥ नओजा-
ऽ२३सौऽ३४३ः ॥ श्रीः ॥ सहस्रधार४पवताइ ॥ सामूऽ२द्रोवाऽ२ ।
चमाऽ३४५इ ॥ खाऽ२३४याः । सोमस्पतीरयीणाऽ१म् ॥ सखेन्द्रस्या ॥
दिवेदाऽ२३इवाऽ३४३इ । ओऽ२३४५इ ॥डा॥

दी. १९. उ. ७. मा. २१. थ. ॥६१५॥

३. [2]पदनिधनशुद्धाशुद्धीयम् ॥ इन्द्रः । अनुष्टुप् । पवमानस्सोमः ॥

पुरोजितीवोअन्धसाः ॥ सुतायमादयित्नाऽ२३वाइ । अपश्वान-
ᳲश्नथिष्टाऽ२३ना ॥ सखायोऽ२३दीऽ३ ॥ घाऽ२ । जिह्वाऽ३४औहोवा ॥
याऽ२३४५म् ॥ श्रीः ॥ सखायोदीर्घजिह्वियाम् ॥ योधारयापावकाऽ२३या ।
परिप्रस्यन्दतेसूऽ२३ताः ॥इन्दुराऽ२३श्वाऽ३ः॥ नाऽ२ । कृत्वाऽ३४औहोवा ॥
याऽ२३४५ः॥श्रीः॥ इन्दुरश्वोनकृत्वियाः ॥ तन्दुरोषमभीनाऽ२३राः । सोमं-
विश्वाचियाधाऽ२३या ॥ यज्ञायाऽ२३साऽ३ ॥ तूऽ२ । अद्राऽ३४औहोवा ॥
याऽ२३४५ः ॥ दी. २८. उ. ४. मा. १४. ढी. ॥६१६॥

४. [3]सैन्धुक्षितम् ॥ सिन्धुक्षित् । गायत्री । पवमानस्सोमः ॥

असाव्यᳲशो । हाइ ॥ मदाऽ२३या । अप्सुदक्षोगाऽ१इराऽ३-
इष्ठाः ॥ श्येनोनयोऽ२३४हाइ ॥ नाइमाऽ३हाइ । सदात् । औऽ२३होवा ॥
श्रीः ॥ शुभ्रᳲन्धो । हाइ ॥ देववाऽ२३ताम् । अप्सुधौतनृभाऽ१इस्सु-
ऽ३ताम् ॥ स्वदन्तिगोऽ२३४हाइ ॥ वा४पाऽ३हाइ । योभाइः । औ-

---

[1] एकोनाशीतितमसूक्ते गीयते ।

[2] अष्टादशे सूक्ते गीयते । [3] एकविंशत्युत्तरशततमसूक्ते गीयते ।

ऽ२३होवा ॥श्रीः॥ आदीमश्वो । हाइ ॥ नहेताऽ२३राम् ॥ अशूशुभन्नमा-
ऽ१र्ताऽ३या ॥ मघोरसोऽ२३४हाइ ॥ साधाऽ३हाइ । मादा । औऽ३-
होवा । होऽ५इ ॥डा॥ दी. १३. उ. ६. मा. २१. ट. ॥६१७॥

५. [1]यौधाजयम् ॥ युधाजित् । बृहती । पवमानस्सोमः ॥

पराऽ३१इ । तोऽ३षि । च । ताम्रऽ२३४ताम् ॥ सोमोऽ३ ।
यऊऽ२ । तमाऽ३४५म् । हाऽ२३४वीः । दधान्वाऽयाः । न । योंआऽ२ ।
प्सुवाऽ३४५ । ताऽ२३४रा ॥ सुषाऽ२ ॥ वासोऽ२ । ममाऽ३४५ ॥
द्राऽ२३४इभीः ॥श्रीः॥ सुषाऽ३१ । वाऽ३सो । मम् । आद्राऽ२३४इभाइः ॥
सूषाऽ३ । वसोऽ२ । ममाऽ३४५ । द्राऽ२३४इभीः । नूनाम्पुना । नः ।
अविभाऽ२इः । पराऽ३४५इ । स्राऽ२३४वा ॥ अदाऽ२ ॥ ब्धास्स्रूऽ२ ।
रभाऽ३४५इ ॥ ताऽ२३४राः ॥ श्रीः ॥ अदाऽ३१ । ब्धाऽ३स्सु । र ।
भिन्ताऽ२३४राः ॥ आदाऽ३ । ब्धस्स्रूऽ२ । रभाऽ३४५इ । ताऽ२३४राः ।
सुताइचित्वा । अ । प्सुमदाऽ२ । मोआऽ३४५ । घाऽ२३४सा ॥
श्रीणाऽ२ ॥ तोगोऽ२ । भिरूऽ३४५ । ताऽ२३४राम् ॥
दी. ५. उ. ६. मा. २७. पे. ॥६१८॥

६. द्वैगतम् ॥ द्विगत् । बृहती । पवमानस्सोमः ॥

परीतोऽ३षिञ्चतासुताम् ॥ सोमोयउ । तमाऽहाऽ१वाऽ२इः ।
दधाऽ३ । हौऽ३होऽ३वा । न्वाऽयोनर्योअप्स्वअन्ताराऽ२ ॥ सुषाऽ२३ ॥
वाऽ२सोऽ२३४औहोवा ॥ एऽ३ । ममाऽ२द्रिभाऽ२३४५इः ॥ श्रीः ॥
सुषावाऽ३सोममद्रिभाइः ॥ सूषावसो ॥ ममाद्राऽ१इभाऽ२इः । नूनाऽ३म् ।
हौऽ३होऽ३वा । पुनानोअविभि×पारिस्रावाऽ२ ॥ अदाऽ२३ ॥ ब्धाऽ२-
स्स्रूऽ२३४औहोवा ॥ एऽ३ । रभाऽ२इन्तराऽ२३४५ः ॥ श्रीः ॥ अदब्धा-

[1] अष्टनवत्युत्तरशततमसूक्ते द्वे सामनी गीयेते ।

ऽ३स्सुरभिन्तराः ॥ आदद्ध्यस्सु । रभाइन्ताऽ१राऽ२ः । सुताऽ३इ । हौऽ३-
होऽ३वा । चित्वाप्सुमदामोअन्धासाऽ२ ॥ श्रीणाऽ२३ ॥ तोऽ२गोऽ२३४-
औहोवा ॥ ए॒ऽ३ । भिरूऽ२त्तराऽ२३४५म् ॥

दी. २२. उ. ३. मा. २६. जू. ॥६१९॥

७. [1]पौरुहन्मनम् ॥ पुरुहन्मा । बृहती । पवमानस्सोमः ॥

श्रीणन्तोऽ३गोभिरुत्तराम् ॥ श्राइणन्तोगो । भिरूत्ताऽ१राऽ२म् ।
ताराऽ२म् । पारिस्वानः । चा । क्षसेदाऽ३इ ( द्विः ) वामादाऽ२३४नाः ॥
क्रातुरिन्दुः । वाइचक्षाऽ२३४णाः ॥ विचाऽ५क्षणाः । होऽ५इ ॥डा॥

दी. ७ उ. १. मा. १३. चि. ॥६२०॥

८. [2]आकूपारम् ॥ अकूपारः । अनुष्टुप् । पवमानस्सोमः ॥

पुरोजाऽ२३इतीवः । अन्धाऽ२३४साः ॥ सुताऽ२यमा । दयित्न-
वाइ । अपश्वानाऽ२म् । श्नथिष्टना ॥ सखायोदीऽ२३ ॥ घाऽ२३जाऽ३इ ।
ह्वाऽ३४५योऽ६"हाइ ॥ श्रीः ॥ सखायोऽ२३दीर्घ । जिह्वाऽ२३४याम् ॥
योधाऽ२रया । पावकया । परिप्रास्याऽ२ । दतेसुताः ॥ इन्दुराश्वाऽ२३ः ॥
नाऽ२३काऽ३ । त्वाऽ३४५योऽ६"हाइ ॥ श्रीः ॥ इन्दुराऽ२३श्वोन ।
कृत्वाऽ२३४याः ॥ तन्दूऽ२रोषाम् । अभीनराः । सोमंवाइश्वाऽ२ । चिया-
धिया ॥ यज्ञायासाऽ२३ ॥ तूऽ२३वाऽ३ । द्राऽ३४५योऽ६"हाइ ॥

दी, १४. उ. १५. मा. १६. नू. ॥६२१॥

९. साध्रम् ॥ सध्रः । अनुष्टुप् । पवमानस्सोमः ॥

पुरोजाऽ३इतीवोअन्धसाः ॥ सुतायमाऽ२ । दयाऽ३४५इ । त्ना-
ऽ२३४वे । अपश्वानश्नथिष्टनाऽ२३४५ ॥ साखाओऽ२३४वा । योदा-
ओऽ२३४वा । घजाऽ५इह्वियाम् ॥ श्रीः ॥ सखायोऽ३दीर्घजिह्वियाम् ॥
योधारयाऽ२ । पावाऽ३४५ । काऽ२३४या । परिप्रस्यन्दतेसुताऽ१ः ॥

---

[1] अष्टनवत्युत्तरशततमसूक्तस्य द्वितीयस्याश्चतुर्थपादे द्विपदाविराजि च गीयते ।

[2] अष्टादशे सूक्ते द्वे सामनी गीयेते ।

आइन्दाओऽ२३४वा । आश्वाओऽ२३४वा ॥ नकाऽ५त्विंयाः ॥ श्रीः ॥
इन्दुराऽ३श्वोनकृत्वियाः ॥ तन्दूरोषाऽ२म् । अभाऽ३४५इ । नाऽ२३४राः ।
सोमंविश्वाचियाधियाऽ१ ॥ याज्ञाओऽ२३४वा । यासाओऽ२३४वा ॥
तुवाऽ५द्रयाः । होऽ५इ ॥डा॥  दी. १५. उ. ४. मा. २२. धा. ॥६२२

१०. [1]आत्रेयम् ॥ अत्रिः । अनुष्टुप् । पवमानस्सोमः ॥

पवस्ववा ॥ जसाताऽ२३याइ । पावित्रेधा । रयासूऽ२३ताः ।
इन्द्रायसो । माविष्णावाऽ२इ ॥ देवेभ्योऽ३माऽ३ ॥ धुमोवा । ताऽ५रो-
ऽ६"हाइ ॥ श्रीः ॥ तुवाऽरिहा ॥ तिधीताऽ२३याः ॥ हारिंपवि । त्रेअद्रू-
ऽ२३हाः । वत्सज्ञातम् । नामाताराऽ२ः ॥ पवामाऽ३नाऽ३ ॥ विघोवा ।
माऽ५णोऽ६"हाइ ॥ श्रीः ॥ तुवंद्याश्वा ॥ महित्राऽ२३ता । पार्थिवीश्वा ।
तिजश्रीऽ२३षाइ । प्रतिद्रापिम् । आमुश्वाथाऽ२ः ॥ पवामाऽ३नाऽ३ ॥
महोवा । त्वाऽ५नोऽ६"हाइ ॥  दी. १६. उ. ६. मा. १४. की. ॥६२३॥

११. [2]गौषूक्तम् ॥ गौषूक्तिः ॥ गायत्री । पवमानस्सोमः ॥

परिप्रियादिवौ । हौहोवाहाइ । कवाइः ॥ वयाऽसिनप्त्रियौऽ२ ।
हुवाइ । हुवाऽ२इ । हाइताऽ२ः ॥ स्वानैर्यातिकवौऽ२ । हुवाइ । हुवा-
ऽ२इ ॥ क्रातूऽ२३ः । होऽ२वाऽ२३४औहोवा ॥ अग्निराहुताऽ२३४५ः ॥
दी. १०. उ. २. मा. १२. फा. ॥६२४॥

१२. [3]गौरीवितम् ॥ गौरीवितिः । अनुष्टुप् । इन्द्रः ॥

प्रति । अस्माऽ३इ । पिपीषताइ ॥ विश्वानिविदुषेभराऽ२३ ।
आरङ्गमाऽ३१२३ । यजाऽ५ग्मयाइ ॥ आपश्चादाऽ३१२३ ॥ ध्वनोवा ॥
नाऽ५रोऽ६"हाइ ॥ श्रीः ॥ एमे । नंप्राऽ३ । तियेतना ॥ सोमेभिस्सोम-

---

[1] चतुर्विंशत्युत्तरशततमसूक्ते गीयते ।

[2] एकोनशततमसूक्तस्य प्रथमायां स्तोत्रीयायां गीयते ।

[3] द्विचत्वारिंशदुत्तरद्विशततमसूक्तस्यानुष्टुप्सु गीयते ।

पातमाऽ२३म् । आमत्रेभाऽ३१२३इः । ऋजाऽ५इषिणाम् ॥ आइन्द्र॰सुता-
ऽ३१२३इ ॥ भिरोवा । दूऽ५भोऽ६"हाइ ॥ श्रीः ॥ यदी । सुताऽ३इ ।
भिरिन्दुमाइः ॥ सोमेभि॰प्रतिभूषथाऽ२३ । वाइदाविश्वाऽ३१२३ । स्यमा-
ऽ५इधिराः ॥ धार्षत्तन्ताऽ३१२३म् ॥ इदोवा । षाऽ५तोऽ६"हाइ ॥

दी. १७. उ. न. मा. २०. यौ. ॥६२५॥

१३. [1]दाढच्युतम् ॥ दृढच्युतिः । गायत्री । पवमानस्सोमः ॥

इन्द्रा । इहा ॥ येन्दोमरूऽ२त्वताइ । इहा । पवा । इहा ।
स्वमधुमाऽ२त्तमाः । इहा ॥ अर्का । इहा ॥ स्ययोनिमाऽ२सदाम् ।
इहाऽ१ ॥ श्रीः ॥ तन्त्वा । इहा ॥ विप्रावचोऽ२विदाः । इहा । पराइ ।
इहा । कृण्वन्तिधाऽ२र्णसाइम् । इहा ॥ सन्त्वा । इहा ॥ मृजन्तिआऽ२-
यवाः ॥ इहाऽ१ ॥ श्रीः ॥ रसाम् । इहा ॥ तेमित्रोआऽ२र्यमा । इहा ।
पिबा । इहा । तुवरुणाऽ२॰कवाइ । इहा ॥ पवा । इहा ॥ मानस्य-
माऽ२रुताः । इहाऽ१ ।

दी. ७. उ. ९. मा. १३. भ्रि. ॥६२६॥

१४. [2]दैवोदासोत्तरम् । दैवोदासः । अनुष्टुप् । पवमानस्सोमः ॥

प्राऽ४सुन्वाना । हो । यअन्धसाऽ६ए ॥ मर्तोनिवष्टतद्वचो-
अपश्वानमराधाऽ३साम् । हता । मखाऽ३४ । औहोवा । नाऽ२३४भृ ॥
ग"वोऽ२३४५इ ॥डा॥

दी. ८. उ. १. मा. ५. दु. ॥६२७॥

१५. [3]यज्ञायज्ञीयम् ॥ अग्निर्वैश्वानरः । जगती । पवमानस्सोमः ॥

अभाऽ५इप्रि । याऽ२णाऽ३इपवताइ ॥ चानोहितोनामानियह्वो-
अधियाइ । षूऽ२वार्द्धाऽ३ताइ । आस्रऽ२र्यस्यबृहतोबृहन्न । धिरा२३थाम् ।
हुम्माइ ॥ वाऽ३२इष्वा ॥ चामरुहद्विचाऽ२क्षणाउ ॥ श्रीः ॥ णाआ ॥

---

[1] एकोनचत्वारिंशदुत्तरशततमसूक्ते गीयते ।

[2] पञ्चचत्वारिंशत्तमसूक्तस्य तृतीयस्तोत्रीयायां गीयते ।

[3] एकोनविंशतितमसूक्ते गीयते ।

१ र र र र २ १२ २ १ —
तस्यजिह्वापवतेमधुप्रियंवक्तापतिर्धियोअस्याः । आऽ३दाभाऽ३याः । दधाऽ२-
१ र र २ १ २ २ १ र
तिपुत्र४पित्रोरपीचि । यन्नाऽ२३मा । हुम्माइ ॥ ताऽ३र्ता ॥ यामधिरो-
^३ २ १२ १ र र र र
चनाऽ२न्दिवाउ ॥श्रीः॥ वाआ ॥ वद्युतान४कलशा७अचिक्रदन्नृभिर्येमाण४-
र २ १ २ २ १ — १ र र र
कोशआ । हाऽ३इराण्याऽ३याइ । अभीऽ२ऋतस्यदोहनाअनूष । तआऽ२३-
२ १ २ १ र ^ ३ २ १ १ १
धा । हुम्माइ ॥ त्राऽ३२इपा ॥ ष्ठाउषसोविराऽ२जसाउ ॥ वाऽ३४५ ॥
दी. २३. उ. न. मा. २८. रै. ॥६२८॥

१६. [1]जराबोधीयम् ॥ अग्निः । गायत्री । अग्निः ॥

२ १२ १ र २ १ २ १ २ १
नमस्तअोवा ॥ ग्नाओजसाइ । गृणान्ताऽ२३इदे । वकृष्टायाः ॥
२ ४ ५ ३ २
अमाइराऽ१माऽ२३इ"त्राम् । अ । दयोऽ३४५इ ॥ डा ॥ श्रीः ॥ कुवित्सु-
१ २ १ २ १ २ १ २ र १ २
नोवा ॥ गाविष्टयाइ । अग्नाइसाऽ२३म्वे । षिषोरायाइम् ॥ उरूकृऽ१दू-
४ ५ ३ २ २ र र १ ६ २
ऽ२३"रू । णः । कृधोऽ३४५इ ॥ डा ॥ श्रीः ॥ मानोअग्नोवा ॥
१ र २ १ २ १ २ १ २ ४
माहाधनाइ । परावाऽ२३र्भा । रभृद्याथा ॥ संवार्गाऽ१७साऽ२३७"रा ।
५ ३ २
यिम् । जयोऽ३४५इ ॥डा॥ दी. ५. उ. ९. मा. १९. भो. ॥६२९॥

१७. [2]यज्ञायज्ञीयम् ॥ अग्निर्वैश्वानरः । जगती । पवमानस्सोमः ॥

४ ३ ४ २ ४ ५ १ र र र र
वृषाऽ५म । ताऽ३इनाऽ३म्पवताइ ॥ वाइचक्षणस्सोमोअह्वांप्रतरीतो ।
२ १ २ २ १ र — १ र र र २
षाऽ३सान्दाऽ३इवाः । प्राणाऽ२सिन्धूनांकलशा७अचिक्र । ददाऽ२३इन्द्रा ।
१ २ १ र ^ ३ २ १ २
हुम्माइ ॥ स्याऽ३२हा ॥ दीयाविशन्मनाऽ२इषिभाउ ॥श्रीः॥ भाइर्मा ॥
१ र र र र २ १ २ २
नीषिभि४पवतेपूर्व्य४कविर्नृभिर्यत४परिकोश७ । आऽ३साइष्याऽ३दात् ।
१ — १ र २ १ २
त्रिताऽ२स्यनामजनयन्मधुक्ष । रन्नाऽ२३इन्द्रा । हुम्माइ ॥ स्याऽ३२वा ॥
१ र ^ ३ २ १ २ १ र र र
यू७सखियायवाऽ२र्घयाउ ॥ श्रीः ॥ याना ॥ यंपुनानउषसोअरोचयदय७-
र २ १ २ २ १ — १ र र
सिन्धुभ्योअभवात् । ऊऽ३लोकाऽ३कृत् । अयाऽ२न्त्रिरसम्रदुदुहानआशि ।
२ १ २ १ र र ^ ३ २
र७सोऽ२३माः । हुम्माइ ॥ हाऽ३२दाइ ॥ पावतेचारुमाऽ२त्सराउ ॥
१ १ १
वाऽ३४५ ॥ दी. २३. उ. न. मा. २७. रे. ॥६३०॥

---

[1] एकविंशत्युत्तरत्रिशततमसूक्ते गीयते ।　[2] द्विषष्टितमसूक्ते गीयते ।

३३४. सोभरिः काण्वः। ककुप्सतोबृहत्यौ। अग्निः॥

१०३७. तं गूर्धया स्वर्णरन्देवासो देवमरतिन्दधन्विरे।
देवत्रा हव्यमूहिषे॥१॥

१०३८. विभूतरातिं विप्र चित्रशोचिषमग्निमीडिष्व यन्तुरम्।
अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम्॥२॥

धा. १७. उ. न. स्व. २. या. ॥११॥

---

ताऽ२३४म् । वोदस्ममृती । षाहाम् ॥ वसोर्मन्दा । नाऽ३मा- न्धाऽ३साः । अभिवत्सन्नं । स्वासाऽ२३राइ । धुधाऽ२इ । नाऽ२३४वाः ॥ इन्द्रंगीर्भाइर्नाऽ३वा ॥ हुम्माइ । माऽ२हाऽ२३४औहोवा ॥ श्रीः ॥ आऽ२३४इ । द्रंगोर्भिर्नवा । माहाइ ॥ इन्द्रंगीर्भाइः । नाऽ३वामाऽ३- हाइ । द्युक्षꣳसुदानुम् । तावाऽ२३इषाइ । भिराऽ२ । वाऽ२३४र्ताम् ॥ गिरिन्नपूरूऽ३मो ॥ हुम्माइ । जाऽ२साऽ२३४औहोवा ॥श्रीः॥ गाऽ२३४इ । रिन्नपुरुभो । जासाम् । गिरिन्नपू । रूऽ३भोजाऽ३साम् । क्षुमन्तंवाजम् । शाताऽ२३इनाम् । सहाऽ२ । स्राऽ२३४इणाम् ॥ मक्षूगोमान्ताऽ३मा ॥ हुम्माइ । माऽ२हाऽ२३४औहोवा ॥ वाऽ२३४ऌ ॥
                    दी. १८. उ. ६. मा. ३०. टौ. ॥८५९॥

११. [4]श्यैतनौधसम् । प्रजापतिः नोधाश्च । बृहती । इन्द्रः ॥

अभिप्रवस्सुरा । घसाऽ३४औहोवा ॥ आइन्द्रमर्च । यथा- विदाऽ२३४इ । ओऽ६हा । योऽ२३जा । रीतृभ्यः । मघ । वा । पूरूवा-

---

[1] नवमसूक्तस्य मध्यमस्तोत्रीयायां गीयते । [2] अष्टादशसूक्तस्य प्रथमस्तोत्रीयायां गीयते ।
[3] त्रयोदशसूक्ते गीयते । [4] अष्टपञ्चाशत्तमसूक्ते गीयते।

वस्रूऽ३ः ॥ सहास्रेणाऽ३१२३इ । वशाऽ५इक्षताउ ॥ श्रीः ॥ सहास्रेणा-
ऽ३१२३४इ । वशि । क्षताऽ३इ ॥ सहस्रेणाऽ३१२३४इ । वशि ।
क्षताऽ३इ ॥ शतानीकाऽ३१२३४इ । वग्रजिगातिधृ । ष्णुयाऽ३ ॥ हन्ता-
इवार्त्राऽ३१२३ । णिदाऽ५शुषाउ ॥ श्रीः ॥ हन्ताइवार्त्राऽ३१२३४ ।
णिदा । शुषाऽ३इ ॥ हन्तिवृत्राऽ३१२३४ । णिदा । शुषाऽ३इ ॥ गिरे-
राइवाऽ३१२३४ । प्ररसाअस्यपि । न्विराऽ३इ ॥ दत्राणाइपूऽ३१२३ ।
रुमोऽ६जसाउ ॥वा॥ दी. ११. उ. १२. मा. २३. खि. ॥८६४॥

१६. [1]कण्वरथन्तरम् ॥ कण्वः । ककुबुत्तरा बृहती । इन्द्रः ॥

आभित्वापूर्वपीतयाइ ॥ इन्द्रस्तोमाइ । भीऽ३रायाऽ३वाः । समी-
चीनासऋभवस्समस्वराऽ२३४नैही ॥ रुद्रागाऽ२३४र्णा । तपूऽ३आउवा-
ऽ२३॥ एऽ३ । विंयमा॥श्रीः॥रुद्रागृणन्तपूर्वियाम् ॥ आऽ३स्येदाऽ३इन्द्राः ।
वावृधेवृष्णियऽ॰शवाऽ२३४ऐही ॥ मदेसूऽ२३४ता ॥ स्यवाऽ३१उवाऽ२३ ॥
एऽ३ । ष्णविया ॥ श्रीः ॥ मादेसुतस्यविष्णवाइ ॥ आऽ३द्याताऽ३मा ।
स्यमहिमानमायवाऽ२३४ऐही ॥ अनुष्टूऽ२३४वा ॥ तिपूऽ३आउवाऽ२३ ॥
एऽ३ । वंथआ ॥ दी. २२. उ. ७. मा. १६. छू. ॥८६५॥

१७. [2]कण्वबृहती ॥ कण्वः । ककुबुत्तरा बृहती । इन्द्रः ॥

औहोतुवामिद्धाऽ३ए ॥ हवामाऽ१हाऽ२३४इ । हाहोइ । सातौ-
वाजस्यकारवः । तुवांवाऽ१त्राऽ२३४ । हाहोइ । षूइन्द्रसत् । पताइन्ना-
ऽ१राऽ२३४ः । हाहोइ ॥ तुवांकाऽ१ष्ठाऽ२३४ । हाहो ॥ सुआऽ३ ।
वांऽ२३४ताः । उहुवाऽ६हाउ ॥ वा ॥ श्रीः ॥ औहोतुवांकाष्ठाऽ३ए ॥
सुआर्वाऽ१ताऽ२३४ः । हाहोइ । सात्वन्नश्चि । त्रवाज्राऽ१हाऽ२३४ ।
हाहो । स्तघार्ष्णूऽ१याऽ२३४ । हाहोइ ॥ महास्ताऽ१वाऽ२३४ । हाहो ॥

[1] एकोननवत्युत्तरद्विशततमसूक्ते गीयते । [2] सप्तपञ्चाशसूंक्ते गीयते ।

नोआऽ३ । द्राऽ२३४इवाः । उहुवाऽ६हाउ ॥ वा ॥ श्रीः ॥ औहोमहस्तवा-
ऽ३ए ॥ नोआद्राऽ१इवाऽ२३४: । हाहोइ । गामशुवम् । रथाइयाऽ१मा-
ऽ२३४ । हाहोइ । द्रसांकाऽ१इराऽ२३४ । हाहोइ ॥ सत्रावाऽ१जा-
ऽ२३४म् । हाहो ॥ नजाऽ३इ । ग्यूऽ२३४षाइ । उहुवाऽ६हाउ ॥वा॥

दी. २६. उ. ८. मा. ३६. गू. ॥८६६॥

१८. [1]औहोतुव॰हियाऽ३ए ॥ हिचाइराऽ१वाऽ२३४इ । हाहोइ ।
वाइदाभगंवसुत्तये । उद्वावाऽ१र्षाऽ२३४ । हाहो । स्वामघवन् । गवा-
इष्टाऽ१याऽ२३४इ । हाहोइ ॥ उदाइन्द्राऽ१आऽ२३४ । हाहो । उदाआ-
ऽ१इन्द्राऽ२३४ । हाहो ॥ श्रमाऽ३इ । ष्टाऽ२३४याइ । उहुवाऽ६हाउ ॥वा॥
श्रीः॥ औहोउदिन्द्रआऽ३ए ॥ श्रमाइष्टाऽ१याऽ२३४इ । हाहोइ । तुवंपुरू ।
सहास्राऽ१णाऽ२३४इ । हाहोइ । शतानाऽ१इचाऽ२३४ । हाहोइ ॥
यूथादाऽ१नाऽ२३४ । हाहो ॥ यमाऽ३ । हाऽ२३४साइ । उहुवाऽ६हाउ ॥
वा ॥ श्रीः ॥ औहोयूथादानाऽ३ए ॥ यमा॰हाऽ१साऽ२३४इ । हाहोइ ।
आपुरन्दरम् । चकृमाऽ१वाऽ२३४ । हाहोइ । प्रवाचाऽ१साऽ२३४: ।
हाहोइ ॥ इन्द्रांगाऽ१याऽ२३४ । हाहो ॥ तोआऽ३ । वाऽ२३४साइ ।
उहुवाऽ६हाउ ॥वा॥

दी. २७. उ. ८. मा. ३८. जै. ॥८६७॥

१९. [2]महावैष्टम्भे ॥ विष्टम्भः । बृहती । इन्द्रः ॥

यद्यावओहाइ । द्रतेशतोवा ॥ शातंभूमीः । उतासीऽ१यूऽ२३: ।
होवाऽ३हाइ । नत्वावज्रिन्त्सहस्र॰स्व । रियाआऽ१नूऽ२३ । होवाऽ३हाइ ॥
नजाताऽ१माऽ२३ । होवाऽ३हा ॥ ष्टरो । दाऽ२साऽ२३४औहोवा ॥श्रीः॥
नजातमोहा । ष्टरोदसोवा ॥ नाजातम । ष्टरोदाऽ१साऽ२३इ । होवाऽ३हाइ ।
आपप्राथमहिनाव्व । ष्णियावाऽ१र्षाऽ२३न् । होवाऽ३हाइ ॥ विश्वाशा-

---

[1] द्विनवत्युत्तरद्विशततमसूक्ते गीयते ।　　　[2] पञ्चसप्ततितमसूक्ते गीयते ।

३७०. सुकक्ष आङ्गिरसः। गायत्री। इन्द्रः॥

११४०. उप नो हरिभिस्सुतं याहि मदानां पते। उप नो हरिभिस्सुतम् ॥१॥

११४१. द्विता यो वृत्रहन्तमो विद इन्द्रश्शतक्रतुः। उप नो हरिभिस्सुतम् ॥२॥

११४२. त्व७हि वृत्रहन्नेषां पाता सोमानामसि। उप नो हरिभिस्सुतम् ॥३॥

धा. १३. उ. न. स्व. ४. री. ॥१०॥

३७१. वसिष्ठो मैत्रावरुणिः। विराट्। इन्द्रः॥

११४३. प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम्।
विश४पूर्वी४प्र चर चर्षणिप्राः ॥१॥

११४४. उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः।
तस्य व्रतानि न मिनन्ति धीराः ॥२॥

---

३७०. उप। नः। हरिभिः। सुतम्। याहि। मदानाम्। पते। उप। नः। हरिभिः। सुतम्॥ द्विता। यः। वृत्रहन्तमः। वृत्र। हन्तमः। विदे॥ इन्द्रः। शतक्रतुः। शत। क्रतुः। उप। नः। हरिभिः। सुतम्॥ त्वम्। हि। वृत्रहन्। वृत्र। हन्। एषाम्। पाता। सोमानाम्। असि। उप। नः। हरिभिः। सुतम्॥

३७१. प्र। वः। महे। महेवृधे। महे। वृधे। भरध्वम्। प्रचेतसे। प्र। चेतसे। प्र। सुमतिम्। सु। मतिम्। कृणुध्वम्। विशः। पूर्वीः। प्र। चर। चर्षणिप्राः। चर्षणि। प्राः॥ उरुव्यचसे। उरु। व्यचसे। महिने। सुवृक्तिम्। सु। वृक्तिम्। इन्द्राय। ब्रह्म। जनयन्त। विप्राः। वि। प्राः॥ तस्य। व्रतानि।

---

ऽ१वाऽ२३। होवाऽ३हा। छ्रश। वाऽ२साऽ२३४औहोवा॥ श्रीः॥
विश्वाशवोहाइ। छ्रशवसोवा॥ वाइश्वाशवि। छ्रशावाऽ१साऽ२३। होवा-ऽ३हाइ। अस्मा७ऽवमघवन्गो। मताइत्राऽ१जाऽ२३इ। होवाऽ३हाइ॥ वज्राइन्चाऽ१इत्राऽ२३। होवाऽ३हाइ॥ भिरू। ताऽ२इभाऽ२३४औहोवा॥

दी. २४. उ. १३. मा. २५. दु. ॥८६८॥

११४५. इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै ।
हर्यश्वाय बर्हया समापीन् ॥३॥

धा. २६. उ. न. स्व. ३. हि. ॥११॥

३७२. वसिष्ठो मैत्रावरुणिः । बृहतीसतोबृहत्यौ । इन्द्रः ॥

११४६. यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
स्तोतारमिद्दधिषे रदावसो न पापत्वाय रꣳसिषम् ॥१॥

११४७. शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
न हि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता च न ॥२॥

धा. १४. उ. १. स्व. २, ता. ॥१२॥

---

न । मिनन्ति । धीराः ॥ इन्द्रम् । वाणीः । अनुत्तमन्युम् । अनुत्त । मन्युम् । एव । सत्रा । राजानम् । दधिरे । सहध्यै । हर्यश्वाय । हरि । अश्वाय । बर्हय । सम् । आपीन् ॥

३७२. यत् । इन्द्र । यावतः । त्वम् । एतावत् । अहम् । ईशीय । स्तोतारम् । इत् । दधिषे । रदावसो । रद । वसो । न । पापत्वाय । रꣳसिषम् ॥ शिक्षेयम् । इत् । महयते । दिवेदिवे । दिवे । दिवे । रायः । आ । कुहचिद्विदे । कुह-चित् । विदे ॥ न । हि । त्वत् । अन्यत् । अन् । यत् । मघवन् । नः । आप्यम् । वस्यः । अस्ति । पिता । च । न ॥

---

२०. यदिन्द्रयोहा । वतस्तुवोवा ॥ आइतावद । हमाइशाऽ१याऽ२३ । होवाऽ३हाइ । स्तोतारमिद्दधिषे । रदावाऽ१साऽ२३उ । होवाऽ३हाइ ॥ नपापाऽ१त्वाऽ२३ । होवाऽ३हा ॥ यर । साऽ२इषाऽ२३४औहोवा ॥श्रीः॥ नपापत्वोहा । यरꣳसिषोवा ॥ नापापत्वा । यराꣳसाऽ१इषाऽ२३म् । होवाऽ३हाइ । शिक्षेयमिन्महयते । दिवाइदाऽ१इवाऽ२३इ । होवाऽ३हाइ ॥ रायाआऽ१कूऽ२३ । होवाऽ३हाइ ॥ हचित् । वाऽ२इदाऽ२३४औहोवा ॥ श्रीः ॥ रायआकोहाइ । हचिद्विदोवा ॥ रायआकु । हचाइद्वाऽ१इदाऽ२३इ ।

३७३. वसिष्ठो मैत्रावरुणिः । विराट् । इन्द्रः ॥

११४८. श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम् ।
कृष्वा दुवा॰स्यन्तमा सचेमा ॥१॥

---

३७३. श्रुधि । हवम् । विपिपानस्य । वि । पिपानस्य । अद्रेः । अ । द्रेः । बोध । विप्रस्य । वि । प्रस्य । अर्चतः । मनीषाम् । कृष्व । दुवा॰सि । अन्तमा । सचा । इमा ॥ न । ते । गिरः । अपि । मृष्ये । तुरस्य । न । सुष्टुतिम् । सु ।

---

होवाऽ३हाइ । नहित्वदन्यन्मघवन् । नआपाऽ१याऽ२३म् । होवाऽ३हाइ ॥ वस्योअ्राऽ१स्ताऽ२३इ । होवाऽ३हाइ ॥ पिता । चाऽ२नाऽ२३४औहोवा ॥ दीऽ२३४शाः ॥

दी. २०. उ. १५. मा. ३५. मु. ॥८६९॥

प्रथमो वि॰शः ॥

द्वावि॰शस्यार्द्धःप्रपाठकः ॥

१. [1]सहोदैर्घतमसे ॥ इन्द्रः । विराट् । इन्द्रः ॥

हाउपिबा ॥ सोममिन्द्र । मा । दतुत्वाऽ३ । दतुत्वा । यन्ते-सुषावहरिया । श्वाऽ१द्रीऽ२ः ॥ श्वाद्रीऽ२ः ॥ सोतुर्बाहुभ्याम् । सुयताऽ३ः ॥ (द्विः) नाऽ२र्वाऽ२३४औहोवा ॥श्रीः॥ हाउयास्ताइ ॥ मादोयुजियः । चा । रुरस्ताऽ३इ । रुरस्ताइ । येनवृत्राणिहर्यश्वा । हाऽ१॰साऽ२इ । हा॰सा-ऽ२इ ॥ ग़त्वामिन्द्रा । प्रभूवसाऽ३उ । भूवसाऽ३उ ॥ ममाऽ२त्तूऽ२३४-औहोवा ॥श्रीः॥ हाउबोधा ॥ सुमेमघवन् । वा । चमेमाऽ३म् । चमेमाम् । यान्तेवसिष्ठोअर्चतिप्रा । शाऽ१स्ताऽ२इम् । शास्ताऽ२इम् ॥ इमात्रह्मा । सधमादाऽ३इ । धमादाऽ३इ ॥ जुषाऽ२स्वाऽ२३४औहोवा ॥

दी. २५. उ. ९. मा. २९. भो. ॥६७०॥

२. हाउश्रुधाइ ॥ हावंविपिपा । ना । स्याद्राऽ३इः । स्याद्राइः ॥ बोधाविप्रस्यार्चतोमा । नीऽ१षाऽ२ । नीषाऽ२ ॥ कृष्वादुवा॰साइ ।

---

[1] पण्णवनितमसूक्ते गीयते ।

११४९. न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् ।
सदा ते नाम स्वयशो विवक्मि ॥२॥

११५०. भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित् ।
मारे अस्मन्मघवञ्ज्योकः ॥३॥

धाः १५. उ. ३. स्व. २. बा. ॥१३॥

तृतीयः खण्डः ॥

---

स्तुतिम् । असुर्यस्य । अ । सुर्यस्य । विद्वान् । सदा । ते । नाम । स्वयशः । स्व । यशः । विवक्मि । भूरि । हि । ते । सवना । मानुषेषु । भूरि । मनीषी । हवते । त्वाम् । इत् । मा । आरे । अस्मत् । मघवन् । ज्योक् । करिति ॥

---

अन्तमाऽ३ ॥ ( द्विः ) सचेऽ२माऽ२३४औहोवा ॥ श्रीः ॥ हाउनताइ ॥ गाइरोअपिमृ । ष्याइ । तुरस्याऽ३ । तुरस्या । नसुष्टुतिमसुर्यस्यवाइ । दूऽ१वाऽ२न् । दूवाऽ२न् ॥ सदातेनामा । स्वयशाऽ३ः ॥ ( द्विः ) विवाऽ२क्मीऽ२३४औहोवा ॥श्रीः॥ हाउभूराइ ॥ हाइतेसवना । मा । नुषेभूऽ३ । नुषेभू । भूरिमनीषीहवतेतू । वाऽ१माऽ२इत् । त्वामाऽ२इत् ॥ मारेअस्मात् । मघवाऽ३न् ॥ (द्विः) ज्योऽ२काऽ२३४औहोवा । ईऽ२३४५ ॥

दी. २९. उ. ३. मा. ३१. द. ॥८७१॥

३. [1]मराये ॥ राशिमरायः । विराट् । इन्द्रः ॥

हाउहाउहाउ । पाइबा । सोमाम् । इन्द्रमन्दतुत्वा । त्वा । त्वा ॥ यान्ताइ । सुषा । वहर्यश्वाद्रिः । द्रिः । द्रिः ॥ सोतूः । बाहू । भ्या७सुयतोनार्वा । र्वा । र्वा ॥श्रीः॥ यास्ताइ । मदो । युजियश्चारुरस्ति । स्ति । स्ति ॥ याइना । वृत्रा । णिहर्यश्वह७सि । सि । सि ॥ सात्वाम् । इन्द्रा । प्रभूवसोममत्तु । त्तु । त्तु ॥ श्रीः ॥ बोधा । सुमाइ । मघवन् । वाचमेमाम् । माम् । माम् ॥ यान्ताइ । वसाइ । ष्ठोअर्चतिप्रशस्तिम् । स्तिम् ।

---

[1] षण्णवतितमसूक्ते गीयते ।

३७४. सुदाः पैजवनः । शकरी । इन्द्रः ॥

११५१. प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत । अभीके चिदु लोककृत्सङ्गे
समत्सु वृत्रहा । अस्माकं बोधि चोदिता नभन्तामन्यकेषां ज्याका
अधि धन्वसु ॥१॥

११५२. त्वꣳसिन्धूँरवासृजोऽधराचो अहन्नहिम् । अशत्रुरिन्द्र जज्ञिषे
विश्वं पुष्यसि वार्यम् । तं त्वा परि ष्वजामहे नभन्तामन्यकेषां
ज्याका अधि धन्वसु ॥२॥

११५३. वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः । अस्तासि शत्रवे
वधं यो न इन्द्र जिघाꣳसति । या ते रातिर्ददिर्वसु नभन्तामन्य-
केषां ज्याका अधि धन्वसु ॥३॥

धा. ४३. उ. ६. स्व. ३. टि. ॥१४॥

---

३७४. प्र । उ । सु । अस्मै । पुरोरथम् । पुरः । रथम् । इन्द्राय । शूषम् । अर्चत । अभीके । चित् । उ । लोककृत् । लोक । कृत् । सङ्गे । सम् । गे । समत्सु । स । मत्सु । वृत्रहा । वृत्र । हा । अस्माकम् । बोधि । चोदिता । नभन्ताम् । अन्यकेषाम् । अन् । यकेषाम् । ज्याकाः । अधि । धन्वसु ॥ त्वम् ॥ सिन्धून् । अव । असृजः । अधराचः । अहन् । अहिम् । अशत्रुः । अ । शत्रुः । इन्द्र । जज्ञिषे । विश्वम् । पुष्यसि । वार्यम् । तम् । त्वा । परि । स्वजामहे । नभन्ताम् । अन्यकेषाम् । अन् । यकेषाम् । ज्याकाः । अधि । धन्वसु ॥ वि । सु । विश्वाः । अरातयः । अ । रातयः । अर्यः । नशन्त । नः । धियः । अस्ता । असि । शत्रवे । वधम् । यः । नः । इन्द्र । जिघाꣳसति । या । ते । रातिः । ददिः । वसु । नभन्ताम् । अन्यकेषाम् । अन् । यकेषाम् । ज्याकाः । अधि । धन्वसु ॥

---

स्तिम् ॥ आइमा । ब्रह्मा । सधमा । देजुषस्व । स्व । स्व ॥

दी. २६. उ. ११. मा. २५. कु. ॥८७२॥

३७५. मेधातिथिः काण्वः। गायत्री। इन्द्रः॥

११५४. रेवाँ इद्रेवत स्तोता स्यात्त्वावतो मघोनः। प्रेदु हरिवस्सुतस्य॥१॥

११५५. उक्थं च न शस्यमानं नागो रयिरा चिकेत।
न गायत्रं गीयमानम्॥२॥

११५६. मा न इन्द्र पीयत्नवे मा शर्धते परा दाः। शिक्षा शचीवश्शचीभिः॥३॥

धा. १४. उ. १. स्व. ३. ति॥१५॥

---

३७५. रेवान्। इत्। रेवतः। स्तोता। स्यात्। त्वावतः। मघोनः। प्र। इत्। उ। हरिवः। सुतस्य। उक्थम्। च। न। शस्यमानम्। न। अगोः। अ। गोः। रयिः। आ। चिकेत। न। गायत्रम्। गीयमानम्॥ मा। नः। इन्द्र। पीयत्नवे। मा। शर्धते। परा। दाः। शिक्ष। शचीवः। शचीभिः॥

---

४. [1]श्रुधाइ। हवाम्। विपिपानस्याद्रेः। द्रेः। द्रेः॥ बोधा। विप्रा। स्यार्चतोमनीषा। षा। षा॥ कार्ष्वा। दुवा। स्यन्तमासचेमा। मा। मा॥ श्रीः॥ नाताइ। गिरो। अपिमृष्येतुरस्य। स्य। स्य॥ नाख्र। ष्टुताइम्। असु। र्यस्यविद्वान्। द्वान्। द्वान्॥ सादा। तेना। मस्वयशोविवक्मि। क्मि। क्मि॥ श्रीः॥ भूराइ। हिताइ। सवना। मानुषेषु। षु। षु॥ भूराइ। मनी। षीहवतेत्वामित्। मित्। मित्॥ मारे। अस्मात्। मघवन्ज्योकः। कः। को॥ हाउहाउहाउ। वा॰३॥ ई॰२३४५॥

दी. ३०. उ. ११. मा. २३. पि.॥८७३॥

५. वारवन्तीयम्॥ इन्द्रः। गायत्री। इन्द्रः॥

रेवा॰इद्राऔहोहाइ॥ वातस्तो॰२३४ता। स्यात्वावा॰२३४हाइ। तोमघा॰३४। औहोवा। इहा॰२३४हाइ। उहुवा॰२३४नाः॥ प्रेदुह। राइवस्सुता॰३४। औहोवा॥ इहा॰२३४हाइ। औहो॰३१२३४। स्या। एहिया॰६हा॥ श्रीः॥ उक्थश्चनाऔहोहाइ॥ शास्यामा॰२३४नाम्।

---

[1] त्रिसप्तत्युत्तरत्रिशततमसूक्ते गीयते।

नागोराऽ२३४हा । यिराचिकाऽ३४ । औहोवा । इहाऽ२३४हाइ । उहुवा-
ऽ२३४ता ॥ नगाय । त्रांगीयमाऽ३४ । औहोवा ॥ इहाऽ२३४हाइ ।
औहोऽ३१२३४ । नाम् । एहियाऽ६हा ॥ श्रीः ॥ मानइन्द्राऔहोहाइ ॥
पाइयल्लाऽ२३४वाइ । माशाद्धीऽ२३४हा । तेपराऽ३४ । औहोवा । इहा-
ऽ२३४हाइ । उहुवाऽ२३४दाः ॥ शिक्षाश । चाइवश्शचाऽ३४ । औहोवा ॥
इहाऽ२३४हाइ । औहोऽ३१२३४ । भीः । एहियाऽ६हा । होऽ५इ ॥डा॥
दी. ३७. उ. ९. मा. २९. मु. ॥८७४॥

६. [1]कण्वरथन्तरे ॥ कण्वः । बृहती । पवमानस्सोमः ॥

प्रासोमदेववीतयाइ ॥ सिन्धुर्नपाइ । प्येऽ३आर्णाऽ३सा । अ७-
शोऽपयसामदिरोनजागृवाऽ२३४ऐही ॥ अच्छाकोऽ२३४शाम् ॥ मधा-
ऽ३१उवाऽ२३ ॥ एऽ३ । श्चुतमा ॥ श्रीः ॥ आच्छाकोशम्मधुश्चुताम् ॥
अच्छाकोशाम् । माऽ३धूश्चूऽ३ताम् । आहर्यतोअर्जुनोअत्केअव्यताऽ२३४ऐही ।
आऽ३हार्याऽ३तो । अर्जुनोअत्केअव्यताऽ२३४ऐही ॥ प्रियस्सूऽ२३४नूः ॥
नमाऽ३१उवाऽ२३ ॥ एऽ३ । जियआ ॥ श्रीः ॥ प्रायस्सूनुर्नमर्जियाः ॥
प्रियस्सूनूः । नाऽ३मार्जाऽ३याः । तमी७हिन्वन्त्यपसोयथारथाऽ२३४मैही ।
ताऽ३माइ७हाऽ३इन्वा । तियप सोयथारथाऽ२३४मैही ॥ नदीषूऽ२३४वा ॥
गभाऽ३१उवाऽ२३॥ एऽ३ ॥ स्तियोरा ॥ दी. ३५. उ. ९. मा. २५. मु. ॥८७५॥

७. [2]कण्वः । अनुष्टुप् । पवमानस्सोमः ॥

प्रासुन्वानायअन्धसाः ॥ मर्तोनवा । ष्टाऽ३ताद्वाऽ३चाः । अपश्वा-
नमराधसाऽ२३४मैही ॥ हतामाऽ२३४खाम् ॥ नभूऽ३आउवाऽ२३ ॥
एऽ३ । गवआ ॥ श्रीः ॥ आजामिरत्केअव्यता ॥ भुजेनपूत् । त्राऽ३ओ-
णाऽ३योः । सरज्जारोनयोषणाऽ२३४मैही ॥ वरोनाऽ२३४यो ॥ निमा-
ऽ३१उवाऽ२३ ॥ एऽ३ । सदमा ॥ श्रीः ॥ सावीरोदक्षसाधनाः ॥ विय-

---

[1] त्रिचत्वारिंशत्तमसूक्ते गीयते ।  [2] त्रयोविंशत्युत्तरद्विशततमसूक्ते गीयते ।

स्तस्ता । भा ऽ३ रोदा ऽ३ साइ । हरि ४ पवित्रेअव्यता ऽ२३४ ऐही ॥ वेधाना-
ऽ२३४ यो ॥ निमा ऽ३१ उवा ऽ२३ ॥ ए ऽ३ । सदमा ॥
दी. २५. उ. ९. मा. १७. भे. ॥८७६॥

८. [1]कण्वबृहती ॥ कण्वः । बृहती । पवमानस्सोमः ॥

औहोपुनानस्सो ऽ३ ए ॥ मधारा ऽ१ या ऽ२३४ । हाहोइ । आपोव-
सानोअर्षसि । आराता ऽ१ धा ऽ२३४ः । हाहोइ । योनिमृत । स्यसाइदा-
ऽ१ सा ऽ२३४ इ । हाहोइ ॥ उत्सोदा ऽ१ इवा ऽ२३४ः । हाहो । हिरा ऽ३ ।
ण्या ऽ२३४ याः । उहुवा ऽ६ हाउ ॥ वा ॥ श्रीः ॥ औहोउत्सोदेवा ऽ३ ए ॥
हिराण्या ऽ१ या ऽ२३४ः । हाहोइ । ऊत्सोदेवोहिरण्ययः । दुहाना ऽ१ ऊ-
२३४ । हाहो । धार्दिवियम् । मधूप्रा ऽ१ या ऽ२३४ म् । हाहोइ । दूहानऊ ।
धर्दाइवा ऽ१ या ऽ२३४ म् । हाहोइ । मधूप्रा ऽ१ या ऽ२३४ म् । हाहोइ ॥
प्रत्ना ऽ सा ऽ१ धा ऽ२३४ । हाहो ॥ स्थमा ऽ३ । सा ऽ२३४ दात् । उहुवा ऽ६-
हाउ ॥ वा ॥ श्रीः ॥ औहोप्रत्न ऽ सधा ऽ३ ए ॥ स्थमासा ऽ१ दा ऽ२३४ त् ।
हाहोइ । प्रात्न ऽ सधस्थमासदत् । आपार्च्छा ऽ१ या ऽ२३४ म् । हाहोइ ।
धारुणंवा । जियार्षा ऽ१ सा ऽ२३४ इ । हाहोइ । आपृच्छ्यम् । धरूणा ऽ१-
म्वा ऽ२३४ । हाहोइ । जियार्षा ऽ१ सा ऽ२३४ इ । हाहोइ ॥ नृभाइर्धौ ऽ१ ता-
ऽ२३४ः । हाहो । विचा ऽ३ । क्षा ऽ२३४ णाः । उहुवा ऽ६ हाउ ॥ वा ॥
दी ३७. उ. १०. मा. ४५. अु. ॥८७७॥

९. [2]कण्वः । अनुष्टुप् । पवमानस्सोमः ॥

औहोअयंपूषा ऽ३ ए ॥ रयाइर्भा ऽ१ गा ऽ२३४ः । हाहोइ । सोम ४ पुना-
नोअर्षति । पताइर्वा ऽ१ इश्वा ऽ२३४ । हाहो । स्यभूमा ऽ१ ना ऽ२३४ः ।
हाहोइ ॥ वियाख्या ऽ१ द्रो ऽ२३४ । हाहो ॥ दसी ऽ३ । ऊ ऽ२३४ भाइ ।
उहुवा ऽ६ हाउ ॥ वा ॥ श्रीः ॥ औहोसमुप्रिया ऽ३ ए ॥ अनूषा ऽ१ ता ऽ२३४ । हाहोइ ।

---

[1] नवमसूक्ते गीयते ।　　　　[2] एकषष्टितमसूक्ते गीयते ।

गावोमदायघृष्वयः । सोमासाऽ१ ४काऽ२३४ । हाहो । ण्वताइपाऽ१था-
ऽ२३४ः । हाहोइ ॥ पवामाऽ१नाऽ२३४। हाहो ॥ सआऽ३इ। दाऽ२३४वाः ।
उहुवाऽ६हाउ ॥वा॥श्रीः॥ औहोयओजिष्ठाऽ३ए ॥ तमाभाऽ१राऽ२३४ ।
हाहोइ । पावमानश्श्रवायियम् । यऽपाञ्चाऽ१चाऽ२३४ । हाहो । षणा-
इराऽ१भाऽ२३४इ ॥ हाहोइ ॥ रयाइंयाऽ१इनाऽ२३४ । हाहो ॥ वनाऽ३ ।
माऽ२३४हाइ । उहुवाऽ६हाउ ॥वा॥ दी. २७. उ. ६. मा. ३३. चि. ॥८७८॥

१०. [1]महावैष्टम्भे ॥ विष्टम्भः । बृहती । पवमानस्सोमः ॥

अभिसोमोहाइ । सआयवोवा ॥ पावन्तेम । दियाम्माऽ१दाऽ२३म् ।
होवाऽ३हाइ । समुद्रस्याधिविष्टपे । मनाइषाऽ१इणाऽ२३ः । होवाऽ३हाइ ॥
मत्साराऽ१साऽ२३ः । होवाऽ३हाइ ॥ मद । च्यूऽ२ताऽ२३४औहोवा ॥श्रीः॥
मत्सरासोहाइ । मदच्युतोवा ॥ मात्सरासः । मदाच्यूऽ१ताऽ२३ः । हो-
वाऽ३हाइ । तरत्समुद्रंपवमा । नऊर्मीऽ१इणाऽ२३ । होवाऽ३हाइ ॥
राजादाऽ१इवाऽ२३ः । होवाऽ३हाइ ॥ ऋतम् । बृऽ२हाऽ२३४औहोवा ॥
श्रीः ॥ राजादेवोहाइ । ऋतंबृहोवा ॥ राजादेवः । ऋतांबृऽ१हाऽ२३त् ।
होवाऽ३हाइ । अर्षामित्रस्यवरुण । स्यधार्माऽ१णाऽ२३ । होवाऽ३हाइ ॥
प्रहाइन्वाऽ१नाऽ२३ः । होवाऽ३हाइ ॥ ऋतम् । बृऽ२हाऽ२३४औहोवा ॥
दी. २१. उ. १३. मा. ३३. गि. ॥८७९॥

११. [2]विष्टम्भः । अनुष्टुप् । पवमानस्सोमः ॥

सुतासोमोहाइ । धुमत्तमोवा ॥ सोमाइन्द्रा । यमान्दाऽ१इनाऽ२३ः ।
होवाऽ३हाइ । पवित्रव । तोआक्षाऽ१राऽ२३न् । होवाऽ३हाइ ॥ देवान्गा-
ऽ१च्छाऽ२३ । होवाऽ३हा ॥ तुवः । माऽ२दाऽ२३४औहोवा ॥ श्रीः ॥
इन्दुरिन्द्रोहा । यपवतोवा ॥ आइतिदेवा । सोआब्रूऽ१वाऽ२३न् । होवा-

---

[1] त्रिसप्ततितमसूक्ते गीयते ।     [2] एकोनाशीतितमसूक्ते गीयते ।

ऽ३हाइ ॥ वाचस्पतिः । मखास्याऽ१ताऽ२३इ । होवाऽ३हाइ ॥ विश्वा-
स्येऽ१शाऽ२३ । होवाऽ३हा ॥ नश्रो । जाऽ२साऽ२३४औहोवा ॥ श्रीः ॥
सहस्रधोहा । र४पवतोवा ॥ सामुद्रोवा । चमाइंखाऽ१याऽ२३ः । होवाऽ३-
हाइ । सोमस्पतिः । रायाऽ१इणाऽ२३म् । होवाऽ३हाइ । सखेन्द्राऽ१-
स्याऽ२३ । होवाऽ३६.६ ॥ दिवे । दाऽ२इवाऽ२३४औहोवा ॥ दी-
ऽ२३४शाः ॥

दी. २१. उ. १४. मा. ३०. धौ. ॥८८०॥

१२. [1]सहोदैर्घतमसे ॥ इन्द्रः । बृहती । पवमानस्सोमः ॥

हाउतवा ॥ अहा॰सो । मा । रारणऽ३ । रारणा । सख्यइन्दो-
दिवेदिवेपुरूणिबभ्रोनिचरन्तिमाम् । आऽ१वाऽ२ । आवाऽ२ ॥ परिधाइः ।
अतित॰ऽ३ ( द्विः ) ॥ आऽ२इहाऽ२३४औहोवा ॥ श्रीः ॥ हाउपराइ ॥
घाइ॰र । ताइ । ता॰इहाऽ३इ । ता॰इहाइ । परिधी॰रतिता॰इहितवा-
हन्नक्तमुतसोमताइ । दाऽ१इवाऽ२ । दाइवाऽ२ ॥ दुहानो । बभ्रऊऽ३-
(द्विः) ॥ धाऽ२नाऽ२३४औहोवा ॥ श्रीः ॥ हाउदुहा ॥ नोब । आउ ।
ऊधनाऽ३इ । ऊधनाइ । दुहानोबभ्रऊधनिघृणातपन्तमतिसूरियाम् । पा-
ऽ१राऽ२ः । पाराऽ२ः ॥ शकुनाः । इवपाऽ३ (द्विः) ॥ प्ताऽ२इमाऽ२३४-
औहोवा ॥

दी. २८. उ. ४. मा. ३३. द्वि. ॥८८१॥

१३. [2]इन्द्रः । अनुष्टुप् । पवमानस्सोमः ॥

हाउपुराः ॥ जाइती । वो । अन्धसाऽ३ः । अन्धसाः । सुताय-
मादयित्नवेअपश्वान॰श्नथाइ । ष्टाऽ१नाऽ२ । ष्टानाऽ२ ॥ सखायो । दीर्घ-
जाऽ३इ (द्विः) ॥ ह्वाऽ२याऽ२३४औहोवा ॥ श्रीः ॥ हाउसखा ॥ योदी ।
घा । जिह्वियाऽ३म् । जिह्वियाम् । योधारयापावकयापरिप्रस्यन्दताइ ।
सूऽ१ताऽ२ः । सूताऽ२ः ॥ इन्दुरा । श्वोनकाऽ३ (द्विः) ॥ त्वाऽ२याऽ२३४-

---

[1] चतुर्नवतितमसूक्ते गीयते ।　　　[2] अष्टादशे सूक्ते गीगते ।

औहोवा ॥श्रीः॥ हाविन्दूः ॥ आश्वः । ना । कृत्वियाऽ३ः । कृत्वियाः । तन्दुरोषमभीनरस्सोमंविश्वाचिया । घाऽ१याऽ२ । घायाऽ२ ॥ यज्ञाया । सन्तुवाऽ३ (द्विः) ॥ द्राऽ२याऽ२३४औहोवा ॥ ईऽ२३४५ ॥

दी. २७. उ. ३. मा. २२. जा. ॥८८२॥

१४. [1]मराये ॥ राशिमरायः । बृहती । पवमानस्सोमः ॥

हाउहाउहाउ । तावा । अहाम् । सोमरारण । ण । ण ॥ साख्याइ । इन्दो । दिवेदिवेपुरूणिबभ्रोनिचरन्तिमामव । व । व ॥ पारी । धाइ॰रतिता॰इहि । हि । हि ॥श्रीः॥ पारी । धाइ॰रतिता॰इहि । हि । हि ॥ पारी । धाइ॰रतिता॰इहितवाहव्नक्मुतसोमतेदिवा । वा । वा ॥ दूहा । नोबभ्रऊघनि । नि । नि ॥ श्रीः ॥ दूहा । नोबभ्रऊघनि । नि । नि ॥ दूहा । नोबभ्रऊघनिघृणातपन्तमतिसूर्यंपरः । रः । रः ॥ शाकू । नाइवपप्तिम । म । म ॥

दी. २४. उ. २. मा. १८. थै. ॥८८३॥

१५. [2]राशिमरायः ॥ अनुष्टुप् । पवमानस्सोमः ॥

पूराः । जाइतीवोअन्धसः । सः । सः ॥ सुता । यमा । दधिष्वेअपश्वान॰श्नथिष्टन । न । न ॥ साखा । योदीर्घजिह्वियम् । यम् । यम् ॥ श्रीः ॥ साखा । योदीर्घजिह्वियम् । यम् । यम् ॥ योधा । रया । पावकयापरिप्रस्यन्दतेसुतः । तः । तः ॥ आइन्दूः । अश्वो । नकृत्वियः । यः । यः ॥श्रीः॥ आइन्दूः । अश्वो । नकृत्वियः । यः । यः ॥ तान्दू । रोषमभीनरस्सोमंविश्वाच्याधिया । या । या ॥ याज्ञा । यसा । तुवद्रयः । यः । यः ॥ हाउहाउहाउ । वाऽ३ ॥ ईऽ२३४५ ॥

दी. १६. उ. ५. मा. ३२. ङा. ॥८८४॥

१६. [3]वारवन्तीयम् ॥ इन्द्रः । गायत्री । पवमानस्सोमः ॥

इन्द्रायेन्दाओहोहाइ ॥ मारुत्वाऽ२३४ताइ । पवास्वाऽ२३४हाइ ।

---

[1] चतुर्नवतितमसूक्ते गीयते । [2] अष्टादशे सूक्ते गीयते ।
[3] एकोनचत्वारिंशदधिकशततमसूक्ते गीयते ।

मधुमत्ताऽ३४ । औहोवा । इहाऽ२३४हाइ । उहुवाऽ२३४माः ॥ अर्कस्य ।
योनिमासाऽ३४ । औहोवा । इहाऽ२३४हाइ । औहोऽ३१२३४ । दाम् ।
एहियाऽ६हा ॥ श्रीः ॥ तन्त्वाविप्राऔहोहाइ ॥ वाचोवीऽ२३४दाः । परा-
इष्काऽ२३४हा । ण्वन्तिघर्णाऽ३४ । औहोवा । इहाऽ२३४हाइ । उहुवा-
ऽ२३४सीम् ॥ सन्त्वामृ । जान्तिआयाऽ३४ । औहोवा ॥ इहाऽ२३४हाइ ।
औहोऽ३१२३४ । वाः । एहियाऽ६हा ॥ श्रीः ॥ रसन्तेमाऔहोहाइ ॥
त्रोअर्याऽ२३४मा । पिबान्तूऽ२३४हाइ । वरुण×काऽ३४ । औहोवा ।
इहाऽ२३४हाइ । उहुवाऽ२३४वाइ ॥ पवमा । नास्यमरूऽ३४ । औहोवा ॥
इहाऽ२३४हाइ । औहोऽ३१२३४ । ताः । एहियाऽ६हा । होऽ५इ ॥डा॥

दी. ३२. उ. ९. मा. २६. भू. ॥८८५॥

१७. [1]आसिताद्यम् ॥ असितः । अनुष्टुप् । इन्द्रः ॥

इममिन्द्रसुताम् ॥ पिबा । ज्येष्ठममर्तियम्माऽ२३दाम् । शुक्राऽ२-
स्यात्वाऽ२ । भियक्षरान् ॥ धाराऽ२आर्ताऽ२ ॥ स्यसोवाऽ३ओऽ२३४वा ।
दाऽ५नोऽ६"हाइ ॥ श्रीः ॥ नकिष्ट्वद्रथाइ ॥ तरो । हरीयदिन्द्रयच्छाऽ२३-
साइ । नाकाऽ२इष्टूवाऽ२ । नुमज्मना ॥ नाकाऽ२इस्स्वाऽ२ ॥ श्वओवा-
ऽ३ओऽ२३४वा । नाऽ५शोऽ६"हाइ ॥ श्रीः ॥ इन्द्रायनूनमा ॥ चता ।
उक्थानिचब्रवीताऽ२३ना । सुताऽ२आमाऽ२ ॥ त्सुरिन्दवाः ॥ ज्याइष्ठाऽ२-
आमाऽ२ ॥ स्यतोवाऽ३ओऽ२३४वा । साऽ५होऽ६"हाइ ॥

दी. ६. उ. ६. मा. १८. कै ॥८८६॥

१८. [2]स्वारं त्वाष्ट्रीसाम ॥ त्वाष्ट्र्यः । अनुष्टुप् । इन्द्रः ॥

असाविसोऽ३हा । मइन्द्राताऽ२इ ॥ शविष्ठधाऽ३हा । ष्णवागा-
हीऽ२ ॥ आत्वापृणाऽ३हा । क्तुइन्द्रायाऽ२म् ॥ रजस्सूर्योऽ३हा । नराऽ३-
होऽ२३४ । वा । श्माऽ५इभोऽ६"हाइ ॥ श्रीः ॥ आतिष्ठवाऽ३हा । त्रहन्ना-

---

[1] चतुरधिकशततमसूक्ते गीयते ।　　[2] अष्टाविंशत्युत्तरशततमसूक्ते गीयते ।

थाऽ२म् । युक्तातेन्नाऽ३हा । ह्मणाहारीऽ२ ॥ अर्वाचीनाऽ३ऽहाइ । सुते-
मानाऽ२ः ॥ ग्रावाक्कणोऽ३हा । तुवाऽ३होऽ२३४ । वा । ग्नूऽ५नोऽ६"हाइ ॥
श्रीः॥ इन्द्रमिद्धाऽ३हा । रीवहाताऽ२ः ॥ अप्रतिधाऽ३हा । ष्टशवासाऽ२म् ॥
ऋषीणाऽसूऽ३हा । ष्टुतीरूपाऽ२ ॥ यज्ञश्चाऽ३हाइ । मानूऽ३होऽ२३४ ।
वा । षाऽ५णोऽ६"हाइ ॥ दी. १९. उ. न. मा. १४. ली. ॥८८७॥

१९. [1]वसिष्ठप्रियम् ॥ वसिष्ठः । अनुष्टुप् । इन्द्रः ॥

यदिन्द्राऽ२३ । चित्रमइह । नास्ती ॥ त्वादाऽ३तामद्राइवोऽ२ ।
राधास्तन्नोऽ३ । विदाऽ२द्वाऽ२३४साउ ॥ ऊभाओऽ२३४वा । याहाओ-
ऽ२३४वा ॥ स्तियाऽ५भरा ॥ श्रीः ॥ यन्मन्याऽ२३ । सेवरेणियम् ।
आइन्द्रा ॥ द्युक्षऽ३न्तादाऽ१भाराऽ२ । विद्यामताऽ३ । स्यताऽ२इवाऽ२३४-
याम् ॥ आकाओऽ२३४वा । पाराओऽ२३४वा ॥ स्यदाऽ५वनाः ॥श्रीः॥
यत्तेदीऽ२३ । क्षुप्रराधियम् । मानाः ॥ अस्तिऽ२श्रूतंबृहाऽ२त् । तेना-
दृढाऽ३ । चिदाऽ२द्राऽ२३४इवाः ॥ आवाओऽ२३४वा । जान्दाओऽ२३४-
वा ॥ षिसाऽ५तयाइ । होऽ५इ ॥डा॥ दी. ८. उ. ६. मा. २१. ट. ॥८८८॥

२०. [2]महावैश्वामित्रम् । विश्वामित्रः । अनुष्टुप् । इन्द्रः ॥

हयाइ । हयाऽ३ । ओहाओहा । ( त्रीणि त्रिः ) । पुरांभिन्दुः ।
युवाकावीऽ२ः ॥ अमितौजाः । अजायाताऽ२ ॥ इन्द्रोविश्वा । स्यकर्मा-
णाऽ२ः ॥ धर्तावज्री । पुरुष्टूताऽ२ः ॥श्रीः॥ तुवंबला । स्यगोमाताऽ२ः ॥
अपावरा । द्रिवोबाइलाऽ२म् ॥ तुवांदेवाः । अबिभ्यूषाऽ२ः ॥ तुज्यमाना ।
सश्रावाइषूऽ२ः ॥श्रीः॥ इन्द्रमीशा । नमोजासाऽ२ ॥ अभिस्तोमैः । अनूषा-
ताऽ२ । सहस्रंया । स्यरातायाऽ२ः ॥ उतवासा । तिभूयासीऽ२ः । हयाइ ।

[1] षट्षष्ट्युत्तरशततमसूक्ते गीयते ।
[2] षडशीत्युत्तरशततमसूक्ते गीयते ।

३७६. नीपातिथिः काण्वः । अनुष्टुप् । इन्द्रः ॥

११५७. एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१॥

११५८. अत्रा वि नेमिरेषामुरां न धूनुते वृकः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥२॥

---

३७६. आ । इन्द्र । याहि । हरिभिः । उप । कण्वस्य । सुष्टुतिम् । सु । स्तुतिम् । दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो । दिवा । वसो ॥

---

हयाऽ३ । ओहाओहा ॥ (त्रीणि त्रिः) होऽ४इडा(द्विः) । होऽ२३४५इ ॥डा॥
दी. २०. उ. न. मा. ३१. व. ॥८८९॥

द्वितीयो विंशः ॥

द्वाविंशःप्रपाठकः ॥

१. [1]द्विरभ्यासं त्वाष्ट्रीसाम ॥ त्वाष्ट्र्यः । अनुष्टुप् । इन्द्रः ॥

गाय । तित्वाऽ३ । हाऽ३हा । गायत्राइणाऽ२३४ः ॥ अर्च । तियाऽ३ । हाऽ३हा । कमर्काइणाऽ२३४ः । ब्रह्मा । णस्त्वाऽ३ । हाऽ३- हाइ । शतक्राताऽ२३४उ ॥ उद्व । शमाऽ३इ । हाऽ३हाइ । वयाऽ३- होऽ२३४ । वा । माऽ५इरोऽ६"हाइ ॥ श्रीः ॥ यत्सा । नोस्साऽ३ । हाऽ३हा । नुवारूहाऽ२३४ः ॥ भूरि । अस्पाऽ३ । हाऽ३हा । ष्टकर्तूवा- ऽ२३४म् । तदि । द्रोआऽ३ । हाऽ३हा । थश्वेताताऽ२३४इ ॥ यूथे । नवाऽ३ । हाऽ३हा । ष्णिराऽ३होऽ२३४ । वा । जाऽ५तोऽ६"हाइ ॥श्रीः॥ युंक्ष्वा । हिकाऽ३ । हाऽ३हाइ । शिनाहाराऽ२३४इ ॥ वृष । णाकाऽ३ । हाऽ३हा । क्षियाप्राऽ२३४ ॥ अथा । नआऽ३ । हाऽ३हाइ । द्रसोमापा- ऽ२३४ः ॥ गिराम् । उपाऽ३ । हाऽ३हाइ । श्रुताऽ३इ७होऽ२३४ । वा । चाऽ५रोऽ६"हाइ ॥
दी. १७. उ. १. मा. २४. ची. ॥८९०॥

---

[1] नवोत्तरद्विशततमसूक्ते गीयते ।

११५९. आ त्वा ग्रावा वदन्निह सोमी घोषेण वक्षतु ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥३॥

धा. ५. उ. न. स्व. १. व. ॥१६॥

---

अत्र । वि । नेमिः । एषाम् । उराम् । न । धूनुते । वृकः । दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो । दिवा । वसो ॥ आ । त्वा । ग्रावा । वदन् । इह । सोमी । घोषेण । वक्षतु । दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो । दिवा । वसो ॥

---

२. क्रौञ्चम् ॥ क्रुङ् । अनुष्टुप् । इन्द्रः ॥

एन्द्रयाहौहो । होहरिभाइः ॥ उपकण्वा३ । स्याम्रू३ष्टू५ता५६५६इम् ॥श्रीः॥ अत्राविनौहो । मिरेषाम् ॥ उराम्नधू३ । नूता३इवा५र्का६५६ः ॥ श्रीः ॥ आत्वाग्रावौहो । वादन्निहा ॥ सोमीघोषे३ । णात्रा३क्षा५तू६५६ ॥ दिवोअमौहो । ष्याशासताः ॥ दिवंयया३ । दाइवा३वा५''सा६५६उ ॥ दी. २०. उ. ८. मा. ११. ब. ॥८९१॥

३. [1]गौरीवितानि ॥ गौरीवितिः । अनुष्टुप् । इन्द्रः ॥

इमम् । इन्द्रा३ । सुतंपिबा ॥ ज्येष्ठममर्तियंमदा२३म् । शूक्रस्यत्वा३१२३ । भिया५क्षरान् ॥ धाराऋता३१२३ ॥ स्यसोवा । दा५.नो६"हाइ ॥ श्रीः ॥ नकिः । तुवा३त् । रथोतराः ॥ हरीयदिन्द्र-यच्छसा२३इ । नाकिष्टुवा३१२३ । नुमा५ज्मना ॥ नाकिसुवा-३१२३ ॥ श्वओवा । ना५शो६"हाइ ॥ श्रीः ॥ इन्द्रा । यनू३ । नमचेता ॥ उक्थानिचब्रवीतना२३ । सुताअमा३१२३ । त्सुरी५-न्दवाः ॥ ज्याइष्ठम्नमा३१२३ ॥ स्यतोवा । सा५हो६"हाइ ॥ दी. ८. उ. न. मा. १५. रु. ॥८९२॥

४. [2]असा । विसो३ । मइन्द्रताइ ॥ शविष्ठधृष्णवागहा२३इ ।

---

[1] चतुरधिकशततमसूक्ते गीयते ।  [2] अष्टाविंशत्युत्तरशततमसूक्ते गीयते ।

आत्वापृणाऽ३१२३ । क्तुईऽ५न्द्रियाम् ॥ राजस्सूर्योऽ३१२३ ॥ नरोवा । श्माऽ५इभोऽ६"हाइ ॥ श्रीः ॥ आति । ष्ठत्राऽ३ । त्रहन्रथाम् ॥ युक्राते-ब्रह्मणाहराऽ२३इ । आर्वाचीनाऽ३१२३म् । सुतेऽ५मनाः ॥ ग्रावाकृणो-ऽ३१२३ ॥ तुत्रोवा । ग्नूऽ५नोऽ६"हाइ ॥ श्रीः ॥ इन्द्रम् । इद्धाऽ३ । रीवहताः ॥ अप्रतिधृष्टशवसाऽ२३म् । आर्षीणाऽ५सूऽ३१२३ । ष्टुतीऽ५-रुपा । याज्ञश्वाऽ३१२३ ॥ मानोत्रा । षाऽ५णोऽ६"हाइ ॥

दी. १५. उ. न. मा. १६. बृ. ॥८९३॥

५. गाय । तित्वाऽ३ । गायत्रिणाः ॥ अर्चन्त्यर्कमर्किणाऽ२३ः । ब्राह्मणस्त्वाऽ३१२३ । शताऽ५क्रताउ ॥ ऊद्वऽ५शमाऽ३१२३इ ॥ वयोवा । माऽ५इरोऽ६"हाइ ॥ श्रीः ॥ यत्सा । नोस्साऽ३ । नुवारुहाः ॥ भूर्यस्पष्टकर्तुवाऽ२३म् । तादिन्द्रोआऽ३१२३ । थश्वेऽ५तताइ ॥ यूथेनवा-ऽ३१२३ ॥ ष्णिरोवा । जाऽ५तोऽ६"हाइ ॥ श्रीः ॥ युंक्ष्वा । हिकाऽ३इ । शिनाहराइ ॥ वृषणाकक्षियप्राऽ२३ । आथानआऽ३१२३इ । द्रसोऽ५मपाः ॥ गाइरामुपाऽ३१२३ ॥ श्रुतोवा । चाऽ५रोऽ६"हाइ ॥

दी. १४. उ. न. मा. १८. लै. ॥८९४॥

६. [1]एन्द्र । याहाऽ३इ । हरिभाइः ॥ उपकण्वस्यसुष्टुनाऽ२३इम् ॥ श्रीः ॥ अत्रा । विनाऽ३इ । मिरेषाम् ॥ उराऽऽधूनुतेवृकाऽ२३ः ॥ श्रीः ॥ आत्वा । ग्रावाऽ३ । वदन्निहा ॥ सोमीघोषेणवक्षतूऽ२३ । दाइवोअमू-ऽ३१२३ । ष्यशाऽ५सताः ॥ दाइवंययाऽ३१२३ । दिवोवा । वाऽ५सो-ऽ६"हाइ ॥

दी. १५ उ. न. मा. १३. वि. ॥८९५॥

७. [3]कण्वरथन्तरम् ॥ कण्वः । ककुबुत्तरा बृहती । अग्निः ॥

देवोवोद्रविणोदाः ॥ पूर्णांविवा । ष्टूऽ३आसीऽ३चाम । उद्वा-

---

[1] नवोत्तरद्विशततमसूक्ते गीयते ।    [2] षट्सप्तत्युत्तरत्रिशततमसूक्ते गीयते ।

[3] अष्टषष्ट्युत्तरद्विशततमसूक्ते गीयते ।

सिश्वध्वमुपवापृणध्वाऽ२३४मैही ॥ आदिद्वोऽ२३४दे ॥ वओऽ३आउवा-
ऽ२३ ॥ एऽ३ । हतआ ॥ श्रीः ॥ आदिद्वोदेवओहताइ ॥ ताऽ३ होता-
ऽ३राम् । अध्वरस्यप्रचेतसाऽ२३४मैही ॥ वह्निंदाऽ२३४इवाः ॥ अका-
ऽ३१उवाऽ२३ ॥ एऽ३ । ण्वतआ ॥ श्रीः ॥ वाह्निंदेवाअकृण्वता ॥ दाऽ३-
घाताऽ३इरा । त्वंविघतेसुवीरियाऽ२३४मैही ॥ अग्निर्जाऽ२३४ना ॥
यदाऽ३१उवाऽ२३ ॥ एऽ३ । शुषआ ॥ दी. २२. उ. ७. मा. १८. छै. ॥८९६॥

८. [1]कण्वबृहत् ॥ कण्वः । ककुबुत्तरा बृहती । अग्निः ॥

औहोयज्ञायज्ञाऽ३ए ॥ वोअग्नाऽ१याऽ२३४इ । हाहोइ । आइरा-
इराचदक्षसे । पर्प्रींवाऽ१याऽ२३४म् । हाहोइ । आमृतंजा । तवाइदाऽ१सा-
ऽ२३४म् । हाहोइ ॥ प्रियाम्माऽ१इत्राऽ२३४म् । हाहो । सुशाऽ३ ।
साऽ२३४इषाम् । उहुवाऽ६हाउ ॥ वा ॥ श्रीः ॥ औहोप्रियंमित्राऽ३मे ॥
सुशा‿साऽ१इषाऽ२३४म् । हाहोइ । ऊर्जोनपा । त‿साहाऽ१इनाऽ२३४ ।
हाहोइ । यमास्माऽ१यूऽ२३४ः । हाहोइ ॥ दाशाइमाऽ१हाऽ२३४ । हाहो ॥
व्यदाऽ३ । ताऽ२३४याइ । उहुवाऽ६हाउ ॥ वा ॥ श्रीः ॥ औहोदाशेमहा-
ऽ३ए ॥ व्यदाताऽ१याऽ२३४इ । हाहोइ । भूवद्वाजे । षुवावाऽ१इता-
ऽ२३४ । हाहोइ । श्रुवाद्धाऽ१र्घाऽ२३४इ । हाहोइ ॥ उतात्राऽ१ताऽ२३४ ।
हाहो ॥ तनूऽ३१२३४नाम् । उहुवाऽ६हाउ ॥ वा ॥

दी. ३१. उ. ८. मा. ३५. गु. ॥८९७॥

९. [2]वात्सप्रम् ॥ वत्सप्रिः । अनुष्टुप् । पवमानस्सोमः ॥

हाउहाउहाउ । ओ । होहोवा ( द्वे त्रिः ) । पुरोजिताइ । वो ।
अन्धसो । धसो । धसः ॥ सुतायमा । दा । यित्नवे ( त्रिः ) ॥ अपश्वा-
नम् । श्वा । श्थिष्टन (त्रिः) ॥ सखायोदी । घा । जिह्वियम् (त्रिः) ॥श्रीः॥

---

[1] विंशे सूक्ते गीयते । [2] अष्टादशे सूक्ते गीयते ।

सखायोदी । घा । जिह्वियम् । (त्रिः) ॥ योधारया । पा । वकया (त्रिः) ॥
परिप्रस्य । दा । तेसुतः ( त्रिः ) ॥ इन्दुरश्वः । ना । कृत्वियः ( त्रिः ) ॥
श्रीः॥ इन्दुरश्वः । ना । कृत्वियः (त्रिः) ॥ तन्दुरोषम् । श्रा । भीनरः (त्रिः)॥
सोमंविश्वा । चा । याधिया (त्रिः) ॥ यज्ञायस । तू । अद्रयो । द्रयो ।
द्रयः । हाउहाउहाउ । ओ । होहोवा । ( द्वे द्विः ) ओ । हो । होऽ२ ।
वाऽ२३४ । औहोवा ॥ ईऽ२३४५ ॥　दी. ४७. उ. १. मा. ३१. च. ॥८९८॥

१०. [1]यज्ञायज्ञीयम् ॥ अग्निर्वैश्वानरः । त्रिष्टुप् । पवमानस्सोमः ॥

सोमाऽ५ ×प । वाऽ३ताऽ३इजनिता ॥ मतीनांजनितादिवोजनाइ ।
ताऽ३पार्थाऽ३इव्याः । जनाऽ२इताग्नेर्जनि । तासूऽ२३री । हुम्माइ ॥
याऽ३२स्या । जानितेन्द्रस्यजनितोताऽ२विष्णाउ ॥ श्रीः ॥ ष्णोर्ब्रा ॥
ह्मादेवानांपदवी ×कवीनामृषिर्विप्राणाम्महाइ । षोऽ३मार्गाऽ३णाम् । श्येनो-
ऽ२गृध्राणाऽस्वधितिर्व । नानाऽ२३ऽसो । हुम्माइ ॥ माऽ३२×पा ॥
वाइत्रमत्येताऽ२इरेभाउ ॥श्रीः॥ भान्प्रा ॥ वीविपद्वाचऊर्मिंन्नसिन्धुर्गिरस्तो-
मान्पवमा । नोऽ३मानाऽ३इषाः । अन्ताऽ२ ×पश्यन्वृजनेमाव । राणा-
ऽ२३आ । हुम्माइ ॥ ताऽ३२इष्ठा ॥ ताइवृषभोगोषूऽ२जानाउ ॥
वाऽ३४५ ॥　दी. ३६. उ. न. मा. २१. ह. ॥८९९॥

११. [2]मरायम् ॥ राशिमरायः । विराट् । अग्निः ॥

हाउहाउहाउ । आग्नीम् । नराः । दीऽ३धिति । भिररण्यो ।
ण्यो । ण्योः ॥ हास्ता । च्युताम् । जनय । तप्रशस्तम् । स्तम् ।
स्तम् ॥ दूराइ । दृशाम् । गृहप । तिमथव्युम् । व्युम् । व्युम् ॥ श्रीः ॥
तामा । ग्निमा । स्तेवसवोन्यृण्वन् । ण्वन् । ण्वन् ॥ सूश्रा । तिचा ।
क्षमव । सेकुतश्चित् । चित् । चित् ॥ दाक्षा । य्योयोदमआसनित्यः ।

---

[1] द्व्युत्तरशततमसूक्ते गीयते ।　[2] एकोनविंशत्युत्तरद्विशततमसूक्ते गीयते ।

त्यः । त्यः ॥श्रीः॥ प्रेद्धो । आग्नेदीदिहि । हि । हि ॥ पूरो । नोअजस्र-
यास्ळ्म्र्यायविष्ठ । ष्ठ । ष्ठ ॥ तूवाम् । शाश्वन्तउपयन्तिवाजाः । जाः ।
जाः ॥ हाउहाउहाउ । वाऽ३ ॥ ईऽ२३४५ ॥

दी. २०. उ. ८. मा. ३४. बी. ॥९००॥

१२. [1]पदनिधनशुद्धाशुद्धीयम् ॥ इन्द्रः । अनुष्टुप् । पवमानस्सोमः ॥

त्वंह्याश्वमहिव्रता ॥ पृथिवीश्वातिजभ्रीऽ२३षाइ । प्रतिद्रापिममुश्वा-
ऽ२३थाः ॥ पवमाऽ२३नाऽ३ ॥ माऽ२ । हित्वाऽ३४औहोवा ॥ ना-
ऽ२३४५ ॥

दी. ६. उ. १. मा. ३. कि. ॥९०१॥

१३. [2]आकूपारम् ॥ अकूपारः । अनुष्टुप् । पवमानस्सोमः ॥

सुष्वाणाऽ२३सोवि । अद्राऽ२३४इभाइः ॥ चिताऽ२नागोः ।
अधित्वचाइ । इषमास्माऽ२ । भ्यमभिताः ॥ समस्वाराऽ२३न् ॥ वाऽ२३-
स्वूऽ३ । वाऽ३४५इदोऽ६"हाइ ॥

दी. ३. उ. ५. मा. ९. णो. ॥९०२॥

१४. [3]यज्ञायज्ञीयम् ॥ अग्निर्वैश्वानरः । अनुष्टुप् । पवमानस्सोमः ॥

सोमाऽ५४प । वाऽ३न्ताऽ३इन्दावाः ॥ आस्मभ्यंगा । तूऽ३वा-
इत्ताऽ३माः । मित्राऽ२स्वा । नाश्राऽ२३रे । हुम्माइ ॥ पाऽ३२साः ॥
स्वूवाधियस्सुवाऽ२विदाउ ॥श्रीः॥ दास्ताइ ॥ पूतासोविपश्चितस्सोमासोदा ।
धाऽ३आशाऽ३इराः । स्वूराऽ२सः । नदाऽ२३र्शा । हुम्माइ ॥ ताऽ३२-
साः ॥ जाइगत्नवोध्रुवाऽ२घृताउ ॥श्रीः॥ ताइस्वू ॥ ष्वाणासोव्यद्रिभिश्विता-
नागोः । आऽ३धाइत्वाऽ३चाइ । इषाऽ२म । स्मभ्याऽ२३मा । हुम्माइ ॥
भाऽ३२इताः ॥ सामस्वरन्वस्वूऽ२विदाउ ॥ वाऽ३४५ ॥

दी. १७. उ. न. मा. २५. यु. ॥९०३॥

१५. [4]पूर्ववारवन्तीयम् ॥ भृगुः । गायत्री । अग्निः ॥

आश्वा । औहोऽ२३४वा । नात्वा । औहोऽ२३४वा ॥ वारवन्तं-

---

[1] चतुर्विंशत्युत्तरशततमसूक्तस्य तृतीयस्तोत्रीयायां गीयते ।

[2] अष्टचत्वारिंशदुत्तरशततमसूक्तस्य तृतीयस्तोत्रीयायां गीयते ।

[3] अष्टाचत्वारिंशदुत्तरशततमसूक्ते गीयते ।     [4] षोडशोत्तरत्रिशततमसूक्ते गीयते ।

वन्द्ध्या । आग्ना । औहोऽ२३४वा ॥ नमोभिस्सम्राजन्ताम् ॥ आध्व-
राणाम् । औऽ२३होवा ॥श्रीः॥ साघा । औहोऽ२३४वा । नास्सा । औहो-
ऽ२३४वा ॥ नुश्शवसापृथुप्रा । गामा । औहोऽ२३४वा ॥ सुशेवोमीढ्वा॰-
अस्मा ॥ कांबभूयात् । औऽ२३होवा ॥श्रीः॥ साना । औहोऽ२३४वा ।
दूरा । औहोऽ२३४वा ॥ चासाच्चनिमा । तीया । औहोऽ२३४वा । घायो५-
पाहिसदाम् ॥ आइद्धिश्वायूः । औऽ२३होवा । होऽ५इ ॥डा॥

दी. २५. उ. २. मा. ८. फै. ॥९०४॥

१६. [1]त्रिष्टुप्श्यावाश्वम् ॥ श्यावाश्वः । त्रिष्टुप् । पवमानस्सोमः ॥

सोम५पवा ॥ तेजनितामताऽ२इनाउवाऽ२ । जनितादिवोजनिता-
पृथाऽ२इव्याउवाऽ२३४ ॥ जनाऽ३४इताग्नेः ॥ जनितासूरियास्याऽ२ ।
जानितेन्द्रा । स्याजनिताऽ२३ । तोवा । वाऽ५इष्णोऽ६"हाइ ॥ श्रीः ॥
ब्रह्मादेवा ॥ नाम्पदवी५कवाऽ२इनाउवाऽ२ । ऋषिर्विप्राणांमहिषोमृगा-
ऽ२णाउवाऽ२३४ ॥ श्येनोऽ३४गृध्रा ॥ णा॰स्वधितिर्वनानाऽ२म् ।
सोम५पवाइ । त्रामतियाऽ२३इ । तोवा । राऽ५इभोऽ६"हाइ ॥ श्रीः ॥
प्रावीविपात् ॥ वाचऊर्मिन्नसाऽ२इन्धाउवाऽ२ । गिरस्तोमान्पवमानोमनाऽ२-
इषाउवाऽ२३४ ॥ अन्ताऽ३४५पश्यान् ॥ वृजनेमावराणाऽ२इ । आतिष्ठ-
ताइ । वार्षभोगोऽ२३ । षोवा । जाऽ५नोऽ६"हाइ ॥

दी. ३०. उ. ३. मा. २६. बू. ॥९०५॥

१७. [2]शैखण्डिनम् ॥ शिखण्डी । जगती । पवमानस्सोमः ॥

प्रताऽ३होइ । आश्वीऽ३होऽ२३४ । नी५पवमानधे । नवानवाः ॥
दिव्याऽ३होइ । असाऽ३होऽ२३४ । ग्रन्पयसाधरी । मणाइमणाइ ॥
प्रान्ताऽ३हो । रिक्षाऽ३द्धोऽ२३४ । स्थाविरीस्तेअसृ । क्षताक्षता ॥
येत्वाऽ३होइ । मृजाऽ३होऽ२३४ । तिऋषिषाणवे । घसाघसाः ॥ घसआ ।

---

[1] द्व्युत्तरशततमसूक्ते गीयते ।		[2] चतुरशीतितमसूक्ते गीयते ।

औहोवाऽ६ । हाउवा ॥ श्रीः ॥ उभाऽ३हो । यताऽ२होऽ२३४ । पवमा-
नस्यर । श्मयाश्मयाः । ध्रुवाऽ३हो । स्यसाऽ३होऽ२३४ । तꣳपरियन्तिके ।
तवास्तवाः ॥ यदीऽ३होइ । पवाऽ३इहोऽ२३४इ । त्रेअधिमृज्यते । हराइ-
हराइः ॥ सत्ताऽ३हो । नियोऽ३होऽ२३४ । नौकलशेषुसी । दताइदताइ ।
दतआ । औहोवाऽ६ । हाउवा ॥श्रीः॥ विश्वाऽ३हो । धामाऽ३होऽ२३४ ।
निविश्वचक्षत्र । भ्वसाभ्वसाः ॥ प्रभोऽ३हो । तेसाऽ३होऽ२३४ । तꣳपरि-
यन्तिके । तवास्तवाः ॥ वियाऽ३हो । नशाऽ३इहोऽ२३४इ । पवसेसोमध ।
मणामणा ॥ पताऽ३इहोइ । विश्वाऽ३होऽ२३४ । स्यभुवनस्यरा ।
जसाइजसाइ । जसआ । औहोवाऽ६ । हाउवा ॥ ईऽ२३४५ ॥

दी. ३२. उ. न. मा. ३५. यु. ॥९०६॥

१८. [1]श्येनः ॥ इन्द्रः । जगती । पवमानस्सोमः ॥

गोवित्पवस्ववसुवाइत् ॥ हाऽ२३इरा । ण्याविद्रेतोऽ३आउवाऽ२३ ।
धाइया । दोभुवनेषुवार्पाइताः ॥ त्वꣳसोऽ२हो ॥ वाइरोअसाऽ३१उवाऽ२३ ।
सोमआ । विश्वविर्त्तन्त्वानाऽ१राऽ२ः ॥ उपौऽ२हो ॥ गाइरेमआऽ३१उवा-
ऽ२३ ॥ एऽ३ । सतआऽ३२ ॥श्रीः॥ त्वनृचक्षाअसिसो ॥ माऽ२३वाइ ।
श्वातꣳपवाऽ३१उवाऽ२३ । मानआ । वृषभर्ताविधावासाइ ॥ सनौऽ३हो ॥
पावस्ववाऽ३१उवाऽ२३ । सुमदा । हिरण्यवद्वयाꣳस्याऽ१माऽ२ ॥ भुवौ-
ऽ३हो ॥ नाइषुजाऽ३१उवाऽ२३ ॥ एऽ३ । वसआऽ३२ ॥ श्रीः ॥ ईशान-
इमाभुवना ॥ नाऽ२३ई । यासेयुजाऽ३१उवाऽ२३ । नाइया । दोहरितस्सु-
पार्णायाः ॥ तास्तोऽ३हो ॥ क्षारन्तुमाऽ३१उवाऽ२३ । धुमदा । घृतं-
पयस्तवाभ्राऽ१ताऽ२इ ॥ सोमौऽ३हो । ताइष्ठन्तुकाऽ३१उवाऽ२३ ॥ एऽ३ ।
ष्ट्यआऽ३२ ॥ दी. १९. उ. ८. मा. ३६. दू. ॥९०७॥

[1] षडुत्तरशततमसूक्ते गोयते ।

१९. [1]इहवद्वामदेव्यम् ॥ वामदेवः । गायत्री । पवमानस्सोमः ॥

तन्त्वाविप्रावचोविदः । इहा ॥ परिष्कृण्वन्तिधर्णसाऽ२इम् । इहा ॥
सन्त्वामृजन्ताऽ२इ । इहाऽ३ ॥ याऽ२३४वोऽ६"हाइ ॥

दी. ४. उ. न. मा. ५. लु. ॥९०८॥

२०. [2]मार्गीयवम् ॥ मृगयुः । गायत्री । पवमानस्सोमः ॥

रसौहोवा ॥ तेमाऽ२इ । त्रोअर्याऽ२३४मा । पिबन्तुव । रुणा४-
काऽ१वाऽ२इ ॥ पवा ॥ हा । औऽ३हाइ । माऽ२३४ना ॥ स्याऽ२मा-
ऽ२३४औहोवा ॥ एऽ३ । रुताऽ२३४५ः ॥

दी. ५. उ. २. मा. ६. फू. ॥९०९॥

तृतीयो विꣳशः ॥

त्रयाविꣳशस्यार्धप्रपाठकः ॥

१. [3]वार्त्रतुरम् ॥ वृत्रतुरः । त्रिष्टुप् । पवमानस्सोमः ॥

अयापत्रोवा ॥ पावस्वैना । वसूऽ२३नी । माꣳश्चत्वइन्दोसरसि ।
प्रधाऽ२३न्वा । ब्रध्नश्चिद्यस्य । वा । तोनाजूऽ२३४तीम् ॥ पुरू । माइ ।
घाश्चित्ताकाऽ२३ ॥ वाऽ२३इनाऽ३ । राऽ३४५न्धोऽ६"हाइ ॥ श्रीः ॥
उतनओवा ॥ नापत्रया । पवाऽ२३स्वा । अधिश्रुतेश्रवायिय । स्यता-
ऽ२३इर्थाइ । षष्टिꣳसहस्रानै । गू । तोवासूऽ२३४नो ॥ वृक्षाम् । ना ।
पाकन्धूनाऽ२३ ॥ वाऽ२३द्राऽ३ । णाऽ३४५योऽ६"हाइ ॥ श्रीः ॥ महीम-
ओवा ॥ स्यावृषना । मशूऽ२३षाऽ३ । माꣳश्चत्वेवापृशनेवा ॥ वधाऽ२३त्राइ ।
अस्वापयन्निगुतः । स्ने । हायाऽ२३४चा ॥ अपा । माइ । त्रꣳअपाचा-
ऽ२३इ ॥ तोऽ२३आऽ३ । चाऽ३४५इतोऽ६"हाइ ॥

दी. १८. उ. ११. मा. २०. टौ. ॥९१०॥

---

[1] एकोनचत्वारिंशदुत्तरशततमसूक्तस्य मध्यमस्तोत्रीयायां गीयते ।

[2] एकोनचत्वारिंशदुत्तरशततमसूक्तस्य तृतीयस्तोत्रीयायां गीयते ।

[3] एकोनपञ्चाशदुत्तरशततमसूक्ते गीयते ।

२. [1]जागतं वरुणसाम ।। वरुणः । जगती । पवमानस्सोमः ।।

ज्योतिर्य । ज्ञाऽ३स्यपवते । मधुप्रियाम् ।। पितादेवानांजनिता-
विभूवसूऽ२३होइ । दधातिरत्नंस्वधयोः । अपीचियाऽ२३म् । होइ ।।
मदाइन्ताऽ२३माः ।। मात्सरः । इन्द्रि । योऽ२३ । रसाउवाऽ३ ।।श्रीः।।
अभिक्र । दाऽ३न्कलशंवा । जियर्षताइ ।। पतिर्दिवश्शतधारोविचक्षणाऽ२३-
होइ । हरिर्मित्रस्यसदने । षुसीदताऽ२३इ । होइ ।। मर्मृजाऽ२३नाः ।।
आविभिः । सिन्धु । भाऽ२३इः । वृषाउवाऽ३ ।। श्रीः ।। अग्रेसि । धूऽ३-
नांपवमानः । अर्षसाइ ।। अग्रेवाचोअग्रियोगोषुगच्छसाऽ२३इहोइ । अग्रे-
वाजस्यभजसे । महद्धनाऽ२३म् । होइ ।। सुवायूऽ२३धाः । सोतृभिः ।
सोम । सूऽ२३ । यसाउवाऽ३ ।। एऽ३ । इन्दुस्समुद्रमुर्वियाविभाती-
ऽ२३४५ ।। दी. ३०. उ. ३. मा. २८. बै. ।।९११।।

३. [2]प्रवद्भार्गवम् ।। भृगुः । त्रिष्टुप् । पवमानस्सोमः ।।

प्रकावियाम् । उशनेवा । ब्रूऽ२वाणाः ।। देवोदेवा । नाञ्जनिमा ।
वाऽ२इवक्ताइ ।। महिव्रताः । शुचिबन्धूः । पाऽ२वाकाः ।। पदावरा ।
होअभियाइ । तीऽ२रेभाऽ२नाउ ।। श्रीः ।। प्रहंसासाः । तृपलावा ।
ग्नूऽ२मच्छा ।। अमादस्ताम् । वृषगणाः । आऽ२यासुः ।। अङ्गोषिणाम् ।
पवमानाम् । साऽ२खायाः ।। दुर्मर्षंवा । णंप्रवदा । तीऽ२साकाऽ२माउ ।।
श्रीः।। सयोजताइ । उरुगाया । स्याऽ२जूतीम् ।। वृथाक्रीडा । तंमिमते ।
नाऽ२गावाः ।। परीणसाम् । कृणुतेताइ । ग्माऽ२भृङ्गाः ।। दिवाहराइः ।
ददृशेना । क्ताऽ२मृज्राऽ३१उ । वाऽ२३४५ ।।

दी. २९. उ. २. ४. मा. २७. घे. ।।९१२।।

---

[1] एकोनत्रिंशदुत्तरशततमसूक्ते गीयते ।

[2] त्रिपञ्चाशदुत्तरशततमसूक्ते गीयते ।

४. [1]उद्वद्भार्गवम् ॥ भृगुः । त्रिष्टुप् । पवमानस्सोमः ॥

शिशुञ्जाज्ञाऽ२३ । न॰ह्यताऽ२३म् । मृजन्ताइ ॥ शुम्भन्ताइवा-ऽ२३इ । प्रम्मरुतोऽ२३ । गणेना ॥ कविर्गाइर्भाऽ२३इः । काव्यियेनाऽ२३ । कविस्सान् ॥ सोम॰पावाऽ२३इ । व्रमताइयेऽ२३ । तिरेभाऽ३नाउ ॥ श्रीः॥ ऋषिमानाऽ२३ः । यऋषीकृऽ२३त् । सुवर्षाः ॥ सहस्रानाऽ२३इ । थ॰पदावाऽ२३इः । कवीनाम् ॥ तृतीयान्धाऽ२३ । ममहाइषाऽ२३ः । सिषासान् ॥ सोमोवाइराऽ२३ । जमनूराऽ२३ । जतिष्ठाऽ३१उ ॥ श्रीः ॥ चमूषाछ्याऽ२३इ । नशकूनोऽ२३ । विभृत्वा ॥ गोविन्दूद्राऽ२३ । प्सआयूधाऽ२३ । निबिभ्रात् ॥ अपामूर्माऽ२३इम् । सचमानाऽ२३ः । समुद्राम् ॥ तुरीयान्धाऽ२३ । ममहाइषोऽ२३ । विवक्ताऽ३१उवाऽ२३४५ ॥

दी. १४. उ. ३६. मा. ३३. ति. ॥९१३॥

५. [2]सामराजम् ॥ अङ्गिरसः । त्रिष्टुप् । पवमानस्सोमः ॥

हाउहोवाऽ३हाइ । अक्रान्त्समुद्रऽ३॰प्रा । थमेऽ३वीऽ३ । धर्मा-ऽ२३४५न् ॥ जनयन्प्रजाऽ३भू । वनाऽ३स्याऽ३ । गोपाऽ२३४५ः ॥ वृषापवित्रेऽ३आ । धिसाऽ३नोऽ३ । अव्याऽ२३४५इ ॥ बृहत्सोमोऽ३वा । वृधेसूऽ३वाऽ३ । नोअद्राऽ३२उ ॥श्रीः॥ मत्सिवायुऽ३माइ । ष्टयेराऽ३धाऽ३ । सेनाऽ२३४५ः ॥ मत्सिमित्राऽ३वा । रुणापूऽ३याऽ३ । मानाऽ२३४५ः । मत्सिशर्द्धोऽ३मा । रुतम्माऽ३त्सीऽ३ । देवाऽ२३४५न् ॥ मत्सिद्यावाऽ३पा । थिवीदेऽ३वाऽ३ । सोमाऽ३॰उ ॥ श्रीः ॥ महत्तत्सोमोऽ३मा । हिषा-ऽ३श्चाऽ३ । काराऽ२३४५ ॥ अपांयदूगर्भोऽ३आ । वृणीऽ३ताऽ३ । देवाऽ२३४५न् ॥ अदधादिन्द्रेऽ३पा । वमाऽ३नाऽ३ः । ओजाऽ२३४५ः ॥ हाउहोवाऽ३हाइ । अजनयत्सूऽ३री । येज्योऽ३तीऽ३ः । इन्दाऽ३२उ॰वा-ऽ३४५ ॥

दी. ३६. उ. न. मा. २१. ह. ॥९१४॥

---

[1] सप्तषष्ट्युत्तरशततमसूक्ते गीयते ।  [2] सप्ताशीत्युत्तरशततमसूक्ते गीयते ।

६. [1]कुत्सस्याधिरथीयम् ॥ कुत्सः । त्रिष्टुप् । पवमानस्सोमः ॥

होऽ४वा । उहुवाऽ३ । होवा । प्रकावियाम् । उशने । वब्रुवाणाः । देवोदेवा । नाऽ३ञ्जनि । माविवक्ती ॥ महिव्रताः । शुचिब । धुᳲप-वाकाः ॥ पदावरा । होऽ३अभि । एतिरेभान् ॥ श्रीः ॥ प्रहꣳसासाः । तृपला । वग्नुमच्छा ॥ अमादस्ताम् । वृषग । णाअयासूः ॥ अङ्गोषि-णाम् । पवमा । नꣳसखायाः ॥ दुर्मर्षवा । णाऽ३म्प्रव । दन्तिसाकाम् ॥ श्रीः॥ सयोजताइ । उरुगा । यस्यजूतीम् ॥ वृथाक्रीडा । ताऽ३म्मिम । तेनगावाः ॥ परोणसाम् । कृणुते । तिग्मशृङ्गाः ॥ दिवाहराइः । ददृशे । नक्तमृज्राः । होऽ४वा । उहुवाऽ३ । होवाऽ६ ॥ हाउवा ॥

दी. १९. उ. २०. मा, २२. ना. ॥९१५॥

७. [2]वैश्वज्योतिषम् ॥ विश्वज्योतिः । त्रिष्टुप् । पवमानस्सोमः ॥

हाउहावाऽ३हाइ । शिशुञ्जज्ञानꣳहर्यऽ३ताम्मृजन्ताऽ२३४५इ ॥ शुम्भन्तिविप्रम्मरुऽ३तोगणेनाऽ२३४५ ॥ कविर्गीर्भिᳲकाव्येऽ३नाकविस्सा-ऽ२३४५न् ॥ सोमᳲपवित्रमतिऽ३याइतिरेभाऽ२३४५न् ॥ श्रीः ॥ ऋषिम-नायऋषिऽ३कृत्सुवर्षाऽ२३४५ः ॥ सहस्रनीथᳲपदऽ३वाइᳲकवीनाऽ२३४५-म् ॥ तृतीयन्धाममहिऽ३षास्सिषासाऽ२३४५न् ॥ सोमोविराजमनुऽ३राज-तिष्टूऽ२३४५प् ॥ श्रीः ॥ चमूषच्छ्येनश्शकुऽ३नोविभृत्वाऽ२३४५ ॥ गोविन्दुर्द्रप्सआयुऽ३धानिबिभ्राऽ२३४५त् ॥ अपामूर्मिꣳसचमाऽ३नास्समुद्रा-ऽ२३४५म् ॥ तुरीयन्धाममहिऽ३षोविवक्ताऽ२३४५इ । हाउहोवाऽ३हाउ ॥ वाऽ३४५ ॥

दी. २९. उ. न. मा. १८. लै. ॥९१६॥

८. [3]वैश्वज्योतिषमुत्तरम् ॥ विश्वज्योतिः । त्रिष्टुप् । पवमानस्सोमः ॥

हाउहोवाऽ३हाइ । अक्रान्त्समुद्रᳲप्रथमेऽ३४३विधर्मन् ॥ जन-

---

[1] त्रिपञ्चाशदुत्तरशततमसूक्ते गीयते ।
[2] सप्तषष्ट्युत्तरशततमसूक्ते गीयते ।
[3] सप्ताशीत्युत्तरशततमसूक्ते द्वे सामनी गीयेते ।

यन्प्रजाभुवनाऽ३४३स्यगोपाः ॥ वृषापवित्रेअधिसाऽ३४३नोअव्याइ ॥
बृहत्सोमोवावृधेसुवाऽ३४३नोअद्राइ । नोआऽ५द्राउ ॥ श्रीः ॥ मत्सिवायु-
मिष्टयेराऽ३४३धसेनः ॥ मत्सिमित्रावरुणापूऽ३४३यमानः ॥ मत्सिशर्द्धो-
मारुतंमाऽ३४३त्सिदेवान् ॥ मत्सिद्यावापृथिवीदेऽ३४३वसोम । वसोऽ५माउ ॥
श्रीः ॥ महत्तत्सोमोमहिषाऽ३४३श्चकार ॥ अपांयद्गर्भोअवृणीऽ३४३तदेवान् ॥
अदधादिन्द्रेपवमाऽ३४३नओजः ॥ हाउहोवाऽ३हाइ । अजनयत्सूर्येज्यो-
ऽ३४३तिरिन्दुः । तिराऽ५इन्दाउ ॥वा॥ दी. ४३. उ. न. मा. २४. री. ॥९१७॥

९. वात्सप्राद्यम् ॥ वत्सप्रिः । त्रिष्टुप् । पवमानस्सोमः ॥

होईऽ२ (त्रिः) । अक्रान्त्समुद्रः प्रथ । मेविधार्माऽ२न् । धार्माऽ२न्
(द्विः) ॥ जनयन्प्रजाभुव । नस्यगोपाऽ२ः । गोपाऽ२ः (द्विः) ॥ वृषा-
पवित्रेअधिसा । नोआव्याऽ२इ । आव्याऽ२इ(द्विः) ॥ बृहत्सोमोवावृधेसुवा ।
नोआद्राऽ२इ । आद्राऽ२इ । आद्राऽ२इः ॥श्रीः॥ मत्सिवायुमिष्टये । राध-
सेनाऽ२ः । सेनाऽ२ः (द्विः) ॥ मत्सिमित्रावरुणा । पूयमानाऽ२ः । मानाऽ२ः
(द्विः) ॥ मत्सिशर्द्धोमारुतम् । मत्सिदेवाऽ२न् । देवाऽ२न्(द्विः) ॥ मत्सिद्या-
वापृथिवी । देवसोमाऽ२ । सोमाऽ२ । (द्विः) ॥ श्रीः ॥ महत्तत्सोमोमहि ।
षश्चकाराऽ२ । काराऽ२ ( द्विः ) ॥ अपांयद्गर्भोअवृ । णीतदाइवाऽ२न् ।
दाइवाऽ२न् (द्विः) ॥ अदधादिन्द्रेपव । मानओजाऽ२ः । ओजाऽ२ः(द्विः) ॥
अजनयत्सूर्येज्यो । तिराइन्दूऽ२ः । आइन्दूऽ२ः ( द्विः ) होईऽ२ ( द्विः )
होयाऽ२ । वाऽ२३४औहोवा ॥ ईऽ२३४५ ॥ दी.३८.उ.१६.मा.४९. टो. ॥९१८॥

१०. [1]गौश्रृङ्गम् ॥ गौश्रृङ्गः । त्रिष्टुप् । पवमानस्सोमः ॥

आजागृविर्विप्रः । ऋताऽ३म् । माऽ२३४ । तीनाऽसोमः ।
पूना ॥ नोअसदच्चमूषुसपन्तियंमिथुनासोनिकामाऽ२ध्वर्याऽ२ । हाऽ२ऊऊ-

---

[1] त्रयोदशोत्तरद्विशततमसूक्ते गीयते ।

र र २ १ ५ ४ ५
वाइ ॥ वोरथिरासस्सोवाऽ३ओऽ२३४वा ॥ हाऽ५स्तोऽ६"हाइ ॥ श्रीः ॥
३४३र४ ५ ३र२ १ र५रर ४५ १रर
सपुनानउप । सूराऽ३इ । दाऽ२३४ । धानओमेश्र । प्रारो ॥ दसीवीष-
र र र र र — १र — —१ र
आव४प्रियाचिद्यस्यप्रियसासऊतीसाऽ२तोधाऽ२ । हाऽ२ऊऊवाइ ॥ नंका-
र २ १ ५ ४ ५ ३४ ३र४५
रिणेनप्रोवाऽ३ओऽ२३४वा ॥ याऽ५७सोऽ६"हाइ ॥ श्रीः ॥ सत्वर्द्धितावर्द्धं ।
३ २ १ र५ र र र ४ ५ १ र र र र
न४पूऽ३ । याऽ२३४ । मानस्सोमोमी । दूव७आ ॥ भिनोज्योतिषावी-
रर र — १ — —ः१ र र
द्यत्रन४पूर्वंपितर४पदज्ञास्सू़ऽ२वर्वोऽ२इ । हाऽ२ऊऊवाइ ॥ दोश्रभिगाअद्रो-
२ १ ५ ४ ५
वाऽ३ओऽ२३४वा ॥ आऽ५इष्णोऽ६"हाइ ॥

दी. ४१. उ. न. मा. ३०. हौ. ॥९१९॥

११. [1]पूर्वयामम् ॥ यमः । गायत्री । पवमानस्सोमः ॥

१ अर ^ ३२^३ ५ १र ^ ३२३
पुनानोश्राऽ२ । क्रमीदाऽ२३४भी ॥ विश्वामृधोऽ२ । विचर्षा-
५ १ २ ४
ऽ२३४णाइः ॥ शुम्भन्तिवाऽ२३इ ॥ प्रन्धाऽ३इताऽ५इ"भाऽ६५६इः ॥
१र श्र ^ ३२^३ ५ १ ^ ३२^३
श्रीः॥ आयोनिमाऽ२ । रुणोरूऽ२३४हात् । गमदिन्द्रोऽ२ । वृषाबूऽ२३४-
५ १र २ ४ १र श्र
ताम् ॥ ध्रुवेमदाऽ२३ ॥ सिसाऽ३इदाऽ५"ताऽ६५६उ ॥ श्रीः ॥ नूनोर-
^ ३२^३ ५ १ ^ ३२३ ५
याऽ२इम् । महामाऽ२३४इन्दो ॥ अस्मभ्य७सोऽ२ । मविश्वाऽ२३४ताः ॥
१र २ ४
आपवस्वाऽ२३ ॥ सहाऽ३स्राऽ५इ"णाऽ६५६म् ॥

दी. ६. उ. न. मा. १८. है. ॥९२०॥

१२. यामोत्तरम् ॥ यमः । गायत्री । पवमानस्सोमः ॥

४र३र४ ३र४५ ३र२ ४५ ३४र र३४५ ३र२
पुनानोअक्रमीदर्भि । ओहाऽ३ओहा ॥ विश्वामृघोविचर्षणिः । ओहा-
४५ २१ २ ३२ ४
ऽ३ओहा ॥ शुम्भन्ताऽ२३इवि ॥ प्रन्धाऽ३इताऽ५इ"भाऽ६५६इः ॥ श्रीः ॥
३र४र ३४ःर४५ ३र२ ४५ ३४३ ४र ३र४५ ३र२
आयोनिमरुणोरुहत् । ओहाऽ३ओहा ॥ गमदिन्द्रोवृषासुतम् । ओहाऽ३-
४५ २१र २ ३२ ४ ३र४र ३
ओहा ॥ ध्रुवेसाऽ२३दा । सिसाऽ३इदाऽ५"ताऽ६५६उ । ।श्रीः ॥ नूनोरयिं-
४३र४ ५ ३र२ ४५ ३४ र ३४५ ३र२ ४५ २र१
महामिन्द । ओहाऽ३ओहा ॥ अस्मभ्य७सोमविश्वतः । ओहाऽ३ओहा ॥ आप-
२ ३२ ४
वाऽ२३स्व ॥ सहाऽ३स्राऽ५इ"णाऽ६५६म् ॥ दी.२२. उ.३. मा. २०. जौ. ॥९२१॥

---

[1] पञ्चनवतितमसूक्ते त्रीणि सामानि गीयन्ते ।

१३. गोराङ्गिरसस्यसाम ॥ गोतमः । गायत्री । पवमानस्सोमः ॥

२र र　१　२३२　र र　४　२र ३ ५
ओहोइहुऽ३वाऽ२३इ । हुवए । पुनानोआऽ३क्राऽ३मीदभि ॥
२ र　४　२ ३ ५　२　३ २　४
विश्वामृघोऽ३वीऽ३चर्षणिः ॥ शुम्भन्तिवि ॥ प्रन्धाऽ३इताऽ५इ"भाऽ६५६इः ॥
२र र　४　२र ३५　२　४　२र ३५　२ र
॥श्रीः॥आयोनिमाऽ३रूऽ३णोरुहत् ॥ गमदिन्द्रोऽ३वाऽ३र्षासुतम् ॥ ध्रुवेसद ॥
३ २　४　२र र　४　२र ३ ५र
सिसाऽ३इदाऽ५''ताऽ६५६उ ॥ श्रीः ॥ नूनोरयाऽ३इंमाऽ३हामिन्दो ॥
२　४　२ ३ ५　२र र　१　२३२　र
अस्मभ्य॰सोऽ३माऽ३विश्वतः ॥ ओहोइहुऽ३वाऽ२३इ । हुवए । आपवस्व ॥
३२　४
सहाऽ३स्राऽ५इ''णाऽ६५६म् ॥　　　दी. १८. उ. न. मा. २०. रौ. ॥९२२॥

१४. [1]अयासोमीयम् ॥ अयासोमः । गायत्री । पवमानस्सोमः ॥

५र४　२　४　५　२ १　अ　^३　५
एताऽ३मूऽ३त्यन्दशक्षिपाः ॥ मृजन्तिसाइ । धुमाऽ२ताऽ२३४राम् ।
१ २र　१　२　४　५ ४　२
सामादित्याऽ२३इ ॥ भिराऽ३ख्याऽ५"ताऽ६५६ ॥ ॥श्रीः॥ समाऽ३इन्द्रे-
४र　५र　२१र　अ　^ ३　५　१　२र　१
ऽ३णोतवायुना ॥ सुतएताइ । पत्राऽ२इत्राऽ२३४आ ॥ सा॰सूरियाऽ२३ ॥
२　४　५ ४　२　४र　५र　२र १र
स्यराऽ३श्माऽ५इ"भाऽ६५६इः ॥ सनोऽ३भाऽ३गायवायवाइ ॥ पूष्णेपवा ।
अ　^ ३　५　१ २　१　२　४
स्वमाऽ२धूऽ२३४मान् ॥ चारुमित्राऽ२३इ ॥ वरूऽ३णाऽ५इ"चाऽ६५६ ॥
दी. १०. उ. ३. मा. १६. बू. ॥९२३॥

१५. [2]वाराहम् ॥ वराहः । जगती । पवमानस्सोमः ॥

२र र　१　२र १ र　२ १　२ ३४　५
हाउहाउ । हुप् । प्रोअयासाइत् । इन्दुरि । द्रस्यनिष्कृताम् ॥
२ १र　२ १　२र ३ ४　५　२ १　२ १　२ ३४
सखासख्यूः । नप्रमि । नातिसङ्गिराम् ॥ मर्यइवा । युवति । भिस्समर्ष-
५　२र १　२र१　२र　३ २　४
ताइ ॥ सोमऽकला । शेशत । या । मनाऽ३पाऽ५"थाऽ६५६ ॥ श्रीः ॥
२ १र　२ १　२र ३ ४　५　२१　२१　२र३ ४　५
प्रवोधियो । मन्द्रयु । वोत्रपन्युवाः ॥ पनस्युवाः । संवर । णेषुवक्रमूः ॥
२ १ र　२१　२र३४　५　२ १ र　२　१　२र
हरिक्रीडा । तमभ्य । नूषतस्तुभाः ॥ अभिधेना । वऽपय । सेत् ।
३ २　४　२र १ र　२ १　२ ३४र
अशाऽ३इश्राऽ५''यूऽ६५६ः ॥ श्रीः ॥ आनस्सोमा । संयतम् । पिप्युषी-
५　२ १र　२ १　२र ३४र　५　२र १र र　२र १
मिषाम् ॥ इन्दोपवा । स्वपव । मानऊर्मिणा ॥ यानोदोहा । तेत्रिर ।

---

[1] एकचत्वारिंशदुत्तरशततमसूक्ते गीयते ।

[2] एकोनषट्युत्तरशततमसूक्ते गीयते ।

२ ३४ ५ २र र १ २ १ र २ १ २ ३ २
ह्न्नसश्चुषाइ ॥ हाउहाउ । हुप् । च्छुमद्वाजा । वन्मधु । मत् । सुवाऽ३-
४
इराऽ५''याऽ६५६म् ॥ दी. २९. उ. २४. मा. २८. धै. ॥९२४॥

१६. [1]पूर्ववासिष्ठम् ॥ वसिष्ठः । जगती । पवमानस्सोमः ॥

३ २ ^ ३ २ ३र४र५ १ २१र २ ३ ४र ५
उहुवाइ । घर्त्ताऽ३४औहोवा । दिवाः । पवते । कृत्वियोरसाः ॥
३ २ ३र४र५ १र २ १ २र३४र ५ ३२
दक्षाऽ३४औहोवा । देवा । नाऽ३मनु । मादियोनृभाइः ॥ हराऽ३४-
३र४र५ १ २ १ २र३४ ५ ३ २ ३र र५
औहोवा । सृजा । नोऽ३अति । योनसत्वभाइः ॥ वृथाऽ३४औहोवा ।
१र २ १ २र ३ २ ४ ३र२
पाजा । सिकृणु । षे । नदाऽ३इषुऽ५''वाऽ६५६ ॥ श्रीः ॥ शूराऽ३४-
३र४र५ १ २ १र २र ३ ४ ५ ३ २ ३र४र ५
औहोवा । नधा । ताऽ३आयु । धागभस्तियोः ॥ सुवाऽ३४औहोवा ।
१ २ १ २र३ ४ ५ ३ २ ३र४र५ १ २
सिषा । साऽ३न्रथि । रोगविष्टिषू ॥ इन्द्राऽ३४औहोवा । स्यशू । ष्माऽ३-
१र २ ३ ४ ५ ३ २ र४र५ १ २र १ २र
मीर । यन्नपस्युभाइः ॥ इन्दूऽ३४औहोवा । हिन्वा । नोअज्य । ते ।
३ २ ४ ३ २ ३र४र५ १
मनाऽ३इषाऽ५इ''भाऽ६५६इः ॥ श्रीः ॥ इन्द्राऽ३४औहोवा । स्यसो ।
२ १ २र३४र ५ ३ २ ३र४र५ १ २ १
माऽ३पव । मानऊर्मिणा ॥ तवाऽ३४औहोवा । ष्यमा । णोऽ३जठ ।
२र३४र ५ ३२ ३र४र ५ १ २ १ २र३४र ५
रेषुआविशा ॥ प्रनाऽ३४औहोवा । पिन्वा । विद्युद । अभ्रेवादमाइ ॥
३ २ ^ ३ २ ३र४र५ १र २र १ २र ३ २
उहुवाइ । धियाऽ३४औहोवा ॥ नोवा । जा७उप । मा । हिशाऽ३-
४
श्वाऽ५''ताऽ६५६ः ॥ दी. ४८. उ. ५. मा. ३६. ग्रू. ॥९२५॥

१७. [2]वासिष्ठम् ॥ वसिष्ठः । जगती । पवमानस्सोमः ॥

२ ^ ३ २ ३र४र५ १ २ १
हाइ । उहुवाइ । असाऽ३४आहावा । विसो । मोऽ३अरु ।
२र३४र ५ ३र२ ३र४र५ १ २ १ २र ३ ४ ५
षोवृषाहराइः ॥ राजेऽ३४औहोवा । वदा । स्मोऽ३अभि । गाअचिक्रदात् ॥
३ २ ३र४र५ १र २ १ २र ३ ४ ५ ३र
पुनाऽ३४औहावा । नोवा । राऽ३मति । एषिअव्ययाम् ॥ श्येनोऽ३४-
३र४र५ १ र १ २ ३ २ ४
औहोवा । नयो । निंघृत । व । तमाऽ३साऽ५''दाऽ६५६त् ॥ श्रीः ॥
३ २ ३र४र५ १ २ १ २ ३४ ५ ३र २
पर्जाऽ३४औहोवा । न्य४पाइ । ताऽ३महि । षस्यपर्णिनाः ॥ नाभा-
३र४र५ १ २ १ २ ३ ४ ५ ३ २
ऽ३४औहोवा । पृथाइ । व्याऽ३गिरि । षुक्षयन्दधाइ ॥ स्वसाऽ३४-

[1] अष्टसप्तत्युत्तरशततमसूक्ते गीयते । [2] एकोनद्विशततमसूक्ते गीयते ।

औहोवा । रश्मा । पोऽ३अभि । गाउदासरान् । संग्राऽ३४औहोवा ।
वभाइः । वसते । वी । तेआऽ३४वाऽ५''राऽ६५६इ ॥ श्रीः ॥ कवा-
ऽ३४औहोवा । वेधा । स्याऽ३परि । एषिमाहिनाम् ॥ अत्योऽ३४-
औहोवा । नमा । ष्टोऽ३अभि । वाजमर्षसाइ ॥ अपाऽ३४औहोवा ।
सेधान् । दुरिता । सोमनोमृडा ॥ हाइ । उहुवाइ । घृताऽ३४औहोवा ।
वसा । न॰परि । या । सिनाऽ३इर्णाऽ५इ''जाऽ६५६म् ॥

दी. ४६. उ. ४. मा. ४४. घी. ॥९२६॥

१८. [1]इन्द्रस्यापामीवम् ॥ इन्द्रः । जगती । पवमानस्सोमः ॥

प्रोश्रा । यासीदिन्दुरिन्द्राऽ३स्याऽ३निष्कृतम् ॥ सखा । सख्युर्न-
प्रमिनाऽ३तीऽ३सङ्गिरम् ॥ मर्याः । इवयुवतिभाऽ३इस्साऽ३मर्षति ॥
सोमाः । कलशेशतया । मनाऽ३पाऽ५''थाऽ६५६ ॥श्रीः॥ प्रवो । धियो-
मन्द्रयुवोऽ३वाऽ३इपन्युवः ॥ पना । स्युवस्संवस्णाऽ३इषूऽ३वक्रमुः ॥ हरा-
इम् । क्रीडन्तमभ्यनूऽ३षाऽ३तस्तुभः ॥ अभाइ । धेनव॰पयसेत् । अशा-
ऽ३इश्राऽ५''यूऽ६५६ः ॥श्रीः॥ आनाः । सोमसंयतंपाऽ३इप्यूऽ३षीमिषम् ॥
इन्दो । पवस्वपवमाऽ३नाऽ३ऊर्मिणा ॥ यानो । दोहतेत्रिरहाऽ३नाऽ३-
सश्चुषी ॥ क्षुमात् । वाजवन्मधुमत् । सुवाऽ३इराऽ५''याऽ६५६म् ॥

दी. २०. उ. १२. मा. २५. फु. ॥९२७॥

१९. [2]वायोरभिक्रन्दः ॥ वायुः । जगती । पवमानस्सोमः ॥

घर्तादिव॰पवतेकृत्वियौ । होइरासाः ॥ दक्षोदेवानामनुमादियो-
ऽ१नूऽ३भाइः । हरिस्सृजानोअतियोनसाऽ१त्वाऽ३भाइः ॥ वाऽ२३४र्था ।
पाऽ२३४जा ॥ साइकृणुषाऽ३इ । हाऽ२३इ । नदाऽ३इषूऽ५''वाऽ६५६ ॥
श्रीः ॥ शूरोनधत्तआयुधागभौ । होस्तायोः ॥ स्वस्सिषासन्रथिरोगवाऽ१-
इष्टाऽ३इषू । इन्द्रस्यशुष्ममीरयन्नपाऽ१स्यूऽ३भाइः ॥ आऽ२३४इन्दूः ।

---

[1] एकोनषष्ट्युत्तरशततमसूक्ते गीयते । [2] अष्टसप्तत्युत्तरशततमसूक्ते गीयते ।

७६

हाऽ२३४इन्वा ॥ नोअज्यताऽ२इ । हाऽ२३इ । मनाऽ३इषाऽ५इ''भा-
ऽ६५६इः ॥ श्रीः ॥ इन्द्रस्यसोमपवमानऔ । होर्माइणा ॥ तविष्यमाणो-
जठरेष्वाऽ१वाऽ३इशा । प्रन४पिन्वविद्युदभ्रेवरोऽ१दाऽ३साइ ॥ घाऽ२३४-
या । नोऽ२३४वा ॥ ज७उपमाऽ२ । हाऽ२३इ । हिशाऽ३श्वाऽ५ताऽ६५६ः ॥

दी. २६. उ. १. मा. ३५. कु. ॥९२८॥

२०. [1]सिमानां निषेधः ॥ सिमा । जगती । पवमानस्सोमः ॥

असो । वाहाइ ॥ वाइसोमोअरुषो । वृषाहाराऽ२इः । राजेवदस्मो-
अभिगाः । अचिक्रादाऽ२३त् । पूऽ२३ना । नोऽ२३वाऽ३४ । रमतियेषिअ ।
व्याऽ३याम् ॥ श्याऽ२३इनो ॥ नाऽ२३योऽ३४ । निंघृतव । तमाऽ३-
साऽ५"दाऽ६५६त् ॥श्रीः॥ पर्जो । वाहाइ ॥ न्या४पितामहिषा । स्यपर्णा-
इनाऽ२ः । नाभापृथिव्यागिरिषू । क्षयन्दाधाऽ२३इ । स्वाऽ२३सा ।
राऽ२३आऽ३४ । पोअभिगाउदा । साऽ३रान् ॥ साऽ२३स्रा ॥ वाऽ२३-
भाऽ३४इः । वसतेवी । तेआऽ३ध्वाऽ५"राऽ६५६इ ॥श्रीः॥ कवो । वाहाइ ॥
वाइघस्यापरियाइ । षिमाहाइनाऽ२म् । अत्योनमृष्टोअभिवा । जमर्षाता-
ऽ२३इ । आऽ२३पा । साऽ२३इघाऽ३४न् । दुरितासोमनः । माऽ३र्डा ।
घाऽ२३र्ता ॥ वाऽ२३साऽ३४। न४परिया । सिनाऽ३इर्णाऽ५इ"जाऽ६५६म् ॥

दी. २२. उ. ९. मा. ३७. झे. ९२९॥

चतुर्थो विंशः ॥

त्रयोविंशस्य द्वितीयार्धे प्रथमो विभागः ॥

१. [2]जराबोधीयम् ॥ अग्निः । द्विपदाविराट् ॥ पवमानस्सोमः ॥

प्रवाजियोवा ॥ क्षाः । सहाऽ२३स्रा । धारस्ताइराः ॥ पवाइत्रा-
ऽ१म्वाऽ२३इ''वा । रम् । अन्योऽ३४५इ ॥ डा ॥ श्रीः ॥ सवाजियोवा ॥
क्षाः । सहाऽ२३स्रा । रेताअद्धाइः ॥ मृजानाऽ१गोऽ२३''भाइः । श्री ।

[1] एकोनद्विशततमसूक्ते गीयते । [2] द्विषष्ट्युत्तरशततमसूक्ते गीयते ।

णानोऽ२४५इ ॥ डा ॥ श्रीः ॥ प्रसोमयोवा ॥ हाइ । इन्द्रास्याऽ२३कू । क्षानृभाइः ॥ येमानोऽ१आऽ२३''द्राइ । भिः । सुतोऽ३४५इ ॥डा॥

दी. १०. उ. ९. मा. २१. भ. ॥९३०॥

२. [1]अभिनिधने काण्वे ॥ कण्वः । बृहती । अग्निः ॥

औहोहोहाइ । आइही । अदा ॥ शीऽ२३४गा । तूवित्ताऽ२३४-माः । यास्मिन्स्थिब्राऽ२३४ता । नीयादधूः । ऐहोइ । आऽ२३४इही । ऊपोषूऽ२३४जा । तामारीऽ२३४या । स्यावर्द्धनाम् । ऐहोइ । आऽ२३४-इही ॥ आग्निन्नाऽ२३४क्षा । तुनोऽ३गाऽ५इराऽ६५६ः ॥ श्रीः ॥ औहो-होहाइ । आइही । यास्मात् ॥ रेऽ२३४जा । ताकृष्टाऽ२३४याः । चार्का-ऽ२३४र्त्या । नीकृण्वताः । ऐहोइ । आऽ२३४इही । साहस्राऽ२३४साम् । माइघासाऽ२३४ताउ । ईवत्मना । ऐहोइ । आऽ२३४इही ॥ आग्निन्धी-ऽ२३४भीः ॥ नमाऽ३स्याऽ५ताऽ६५६ ॥ श्रीः ॥ औहोहोहाइ । आइही । प्रादै ॥ वोऽ२३४दा । सोआऽ२३४ग्नाइः । दाइवाआऽ२३४इन्द्रो । नामज्मना । ऐहोइ । आऽ२३४इही । आनूमाऽ२३४ता । शाम्पृथीऽ२३४-वीम् । वीवावृताइ । ऐहोइ । आऽ२३४इही ॥ तास्थौनाऽ२३४का ॥ स्यशाऽ३र्माऽ५"णाऽ६५६इ ॥

दी. १७. उ. १५. मा. ४०. चौ. ॥९३१॥

३. [2]कण्वः । बृहती । इन्द्रः ॥

औहोहोहाइ । आइही । आत्वा ॥ साऽ२३४हा । स्रामाशा-ऽ२३४ताम् ॥ यूक्ताराऽ२३४थाइ । हीरण्ययाइ । ऐहोइ । आऽ२३४इही । ब्राह्मायूऽ२३४जो । हारायाऽ२३४ई । द्राकेशिनाः । ऐहोइ । आऽ२३४-इही ॥ वाहन्तूऽ२३४सो ॥ मपाऽ३इताऽ५याऽ६५६इ ॥ श्रीः ॥ औहोहो-हाइ । आइही । आत्वा ॥ राऽ२३४थाइ । हाइरण्याऽ२३४याइ । हारी-

---

[1] एकोनसप्तत्युत्तरद्विशततमसूक्ते गीयते । [2] पञ्चविंशत्युत्तरद्विशततमसूक्ते गीयते ।

माऽ२३४यू । राशेपिया । ऐहोइ । आऽ२३४इही । शाइताइपाऽ२३४ष्ठाँ ।
वाहाताऽ२३४म्मा । ध्वोअन्धसाः । ऐहोइ । आऽ२३४इही ॥ वाइवक्षा-
ऽ२३४णा ॥ स्यपाऽ३इताऽ५याऽ६५६इ ॥श्रीः॥ औहोहोहाइ । आइही ।
पाइबा ॥ तूऽ२३४वा । स्यागिर्वाऽ२३४णाः । सुतस्याऽ२३४पू । र्वापा-
इवा । ऐहोइ । आऽ२३४इही । पारिष्काऽ२३४र्ता । स्यारासोऽ२३४नाः ।
इयमासुताइ । ऐहोइ । आऽ२३४इही ॥ चारुर्माऽ२३४दा ॥ यपाऽ३त्याऽ५-
ताऽ६५६इ ॥ आऽ२३४भी ॥

दी. १८. उ. १५. मा. ४१. ण. ॥९३२॥

४. [1]नैपातिथानि ॥ निपातिथिः । बृहती । अग्निः ॥

अग्नआयाह्यग्निभाऽ३इरे ॥ होतारन्त्वा । वृणाइमहाऽ३इ । हा ।
औहोऽ२३४हा । आत्वामनक्तुप्रयता । हवाइष्मताऽ२३इ । हा । औहो-
ऽ२३४हा ॥ यजाइष्ठाम्बाऽ३ । हा । औहोऽ२३४हा ॥ हाऽ२इराऽ२३४-
औहोवा ॥ साऽ२३४दे ॥ श्रीः ॥ यजिष्ठंबर्हिरासदाऽ३ए ॥ याजिष्ठंब ।
र्हिरासदाऽ३इ । हा । औहोऽ२३४हा । अच्छाहित्वासहसस्सू । नोआङ्गिरा-
२३ः । हा । औहोऽ२३४हा ॥ स्रुचाश्चाराऽ३ । हा । औहोऽ२३४हा ॥
ताऽ२आऽ२३४औहोवा ॥ ध्वाऽ२३४रे ॥ श्रीः ॥ स्रुचश्चरन्त्यध्वराऽ३ए ॥
स्रूचश्चर । तियाध्वराऽ३इ । हा । औहोऽ२३४हा । ऊर्जोनपातंघृतके ।
शमाइमहाऽ२३इ । हा । औहोऽ२३४हा ॥ अग्नाइंयाज्ञाऽ३ । हा ।
औहोऽ२३४हा ॥ षूऽ२पूऽ२३४औहोवा । वींऽ२३४याम् ॥

दी. ३१. उ. ७. मा. २२. खा. ॥९३३॥

५. [2]निपातिथिः । बृहती । इन्द्रः ॥

इन्द्रमिद्देवतातयाऽ३ए ॥ आइन्द्रंप्रय । तियाध्वराऽ३इ । हा ।
औहोऽ२३४हा । इन्द्रꣳसमीकेवनिनः । हवामहाऽ२३इ । हा । औहो-

[1] एकाशीत्युत्तरद्विशततमसूक्ते गीयते ।   [2] षण्णवत्युत्तरद्विशततमसूक्ते गीयते ।

ऽ२३४हा ॥ इन्द्रांघानाऽ३ । हा । औहोऽ२३४हा ॥ स्याऽ२साऽ२३४-
औहोवा ॥ ताऽ२३४ये ॥ श्रीः ॥ इन्द्रंघनस्यसातयाऽ३ए ॥ आइन्द्रंघन ।
स्यसातयाऽ३इ । हा । औहोऽ२३४हा । इन्द्रोमह्वारोदसीप । प्रथाच्छ-
वाऽ२३ः । हा । औहोऽ२३४हा ॥ इन्द्रास्सूर्याऽ३म् । हा । औहोऽ२३४-
हा ॥ आऽ२रोऽ२३४औहोवा ॥ चाऽ२३४यात् ॥ श्रीः ॥ इन्द्रस्सूर्यमरोच-
याऽ३दे ॥ आइन्द्रस्सूर्यम् । अरोचयाऽ३त् । हा । औहोऽ२३४हा ।
